९१/१०

91/10

अथ

ग्रन्थनामः— "महाभारतम्"

पर्वनामः— "आश्वमेधिकपर्व म्" (मूलम्)

कर्तृनामः— "व्यासः"

विषयः— "इतिहासः"

Mahabharatam.

451

९१
10

अभ

वेदेत्रास्पैवे 

श्री महाभारते अश्वमेधिकपर्व

९१
१०

... ःकत ः। शिलः।
ओमयेतुकनी वर्क॥
...नः सृणवातिस्या
...लःकुमदुमः।
...मे गाडचेकें तोम
...दंनयोः॥

श्रीढुंढिराजायनमः॥ वैशंपायन उवाच॥ कृतोदकं तु राजानं धृतराष्ट्रं युधिष्ठिरः। पुरस्कृत्य महाबाहो उत्ततारा
कुलेंद्रियः। उत्तीर्य च महीपालं धृतराष्ट्रं युधिष्ठिरः। पपात कूले गंगाया व्याधविद्ध इव द्विपः। तं सीदमानं जग्रा
ह भीमः कृष्णेन नोदितः। मैवमित्यब्रवीच्चैनं कृष्णः परबलार्दनः। तमार्त्तं पतितं भूमौ निःश्वसंतं पुनःपुनः
ददृशुः पांडवा राजन् धर्मात्मानं युधिष्ठिरं। तं दृष्ट्वा दीनमनसं गतसत्वं जनेश्वरं। भूयः शोकसमाविष्टाः
पांडवाः समुपाविशन्। राजा च धृतराष्ट्रस्तमुपासीनः सहानुजः। वाक्यमाह महाप्राज्ञो महाबुद्धिर्जनेश्वरं
उत्तिष्ठ नरशार्दूल कुरु कार्यमनंतरं। क्षत्रधर्मेण कौरव्य जितेयमवनिस्त्वया। तां भुंक्ष्व भ्रातृभिः सा
र्द्धं सुहृद्भिश्च जनेश्वर। न शोचितव्यं पश्यामि त्वयि धर्मभृतां वर। शोचितव्यं मया चैव गांधार्या च विशां
पते। यस्याः पुत्रशतं नष्टं स्वप्नलब्धं धनं यथा। अश्रुत्वा हितकामस्य विदुरस्य महात्मनः। वाक्यानि सु
महार्थानि परितप्यामि दुर्मतिः। उक्तवानेष मां पूर्वं धर्मात्मा दिव्यदर्शनः। दुर्योधनापराधेन कुलं ते विन
शिष्यति। स्वस्ति चेदिच्छसे राजन् कुलस्यात्मन एव च। त्यज्यतामेष दुष्टात्मा मंदो राजा सुयोधनः। कर्णश्च
शकुनिश्चैव मैनं पश्यतु कर्हिचित्। द्यूतसंपातमप्येषामप्रमत्तो निवारय। अभिषेचय राजानं धर्मा
त्मानं युधिष्ठिरं। स पालयिष्यति वशी धर्मेण पृथिवीमिमां। अथ नेच्छसि राजानं धर्मपुत्रं युधिष्ठि
रं। ~~स पालयिष्यति वशी धर्मेण पृथिवीमिमां। अथ नेच्छसि राजानं धर्मपुत्रं युधिष्ठिरं~~ मेदीभूतः स्वयं रा १
ज्यं परिगृह्णीष्व पार्थिव। समं सर्वेषु पुत्रेषु वर्त्तमानं नराधिप। अनुरज्यंतु सर्वे त्वां ज्ञातयो ज्ञातिवर्द्धनं।

=पेतः पिशाचो मरणे पंचत्वे प्रेतसंज्ञिके=

वस्या

एवं दुर्वृत्तिकौंतेय विदुरे दीर्घदर्शिनि। दुर्योधनमहं पापं अन्वचर्त्तं वृथामतिः। अश्रुत्वा तस्य धीरस्य वाक्यानि म
धुराण्यहं। फलं प्राप्य महद्दुःखं निमग्नः शोकसागरे। वृद्धौ हि तौ ते पितरौ पश्यावां दुःखितौ नृप। न शोचितव्यं
भवता पश्यामीह जनाधिप। इति श्रीमहाभारते आश्वमेधिके पर्वणि धृतराष्ट्रवाक्यं॥ वैशंपायन उ० एवमुक्त
स्तु राजा स धृतराष्ट्रेण धीमता। तूष्णीं बभूव नृपतिस्तमुवाचाथ केशवः। अतीव मनसा शोकः क्रियमाणो
जनाधिप। संतापयति वै तस्य पूर्वप्रेतान् पितामहान्। त्वद्विधेषु महाबुद्धे नैतद्द्योपपद्यते। यजस्व बहुभि
र्यज्ञैर्विधिवच्चाप्तदक्षिणैः। देवांस्तर्पय सोमेन स्वधया च पितॄनपि। अतिथीनन्नपानेन कामैरन्यैरकिं
चनान्। विदितं वेदितव्यं ते कर्त्तव्यमपि ते कृतं। श्रुताश्च राजधर्मास्ते भीष्माद्भागीरथीसुतात्। कृष्णद्वै
पायनाच्चापि नारदाद्विदुरात्तथा। नेमामर्हसि मूढानां वृत्तिं त्वमनुवर्त्तितुं। पितृपैतामहं वृत्तमास्थाय धुर
मुद्वह। युक्तं हि यशसा क्षत्रं स्वर्गं प्राप्तमसंशयं। न हि कश्चन शूराणां निहतोत्र पराङ्मुखः। त्यज शोकं
महाराज भवितव्यं हि तत्तथा। न शक्यास्ते पुनर्द्रष्टुं त्वया येस्मिन् रणे हताः। एतावदुक्त्वा गोविंदो धर्मराजं
युधिष्ठिरं। विरराम महातेजास्तमुवाच युधिष्ठिरः। गोविंद मयि या प्रीतिस्तव सा विदिता मम। सौहृदेन त
था प्रेम्णा सदा मामनुकंपसे। प्रियं तु मे स्यात्सुमहत्कृतं चक्रगदाधर। श्रीमत्प्रीतेन मनसामयायादवनं
दन। यदि मामनुजानीयाद्भवान् गंतुं तपोवनं। न हि शांतिं प्रपश्यामि घातयित्वा पितामहं। कर्णं च पुरु
षव्याघ्रं संग्रामेष्वपलायिनं। कर्मणा येन मुच्येयं तस्मात्क्रूरादरिंदम। कर्मणस्तद्विधत्स्वेह न हि शुध्यति
मे मनः। तमेवं वादिनं पार्थं व्यासः प्रोवाच धर्मवित्। सांत्वयन् सुमहातेजाः शुभं वचनमर्थवत्। अकृता

नः। दान्तधर्मपराः संतः सततं प्रियवादिनः। तेषां श्रेष्ठः रवनीनेत्रः सतान् सर्वान्नपीडयत्। रवनीनेत्रस्तु
विक्रान्तो जित्वा राष्ट्रमकंटकं। नराक्रौ रसितुं राज्यं नान्वरज्यंत तं प्रजाः। तमपास्य तु तद्राष्ट्रात्तस्य पुत्रं
सुवर्चसं। अस्त्यभिषिक्तराजेंद्रमुदितश्चाभवत्तदा। स पितुर्निःक्रियां दृष्ट्वा राज्यात्तु निरसनं वतता। निपतो
वर्त्तयामास प्रजाहितचिकीर्षया। ब्रह्मण्यः सत्यवादी च शूरो दाक्षिण्यसंयुतः। प्रजानामन्वरज्यंत धर्मनि
त्यं मनस्विनं। तस्य प्रवृत्तधर्मस्य व्यरोऽयत् कोशवाहनं। तं क्षीणकोशं सामंताः समंतात्पर्यपीडयन्। स
पीड्यमानो बहुभिः क्षीणकोशाश्ववाहनः। आर्त्तिमार्छत्परां राजन् राज्यान्निःस्वत्ये. पुरेणवानवेनं परिहंतुं तेत्रा कु
वन्नृपरिसंक्षयो। समभ्यहत्तो हि राजा स धर्मनिष्ठत्वाद्युधिष्ठिरः। यदा तु परमामार्त्तिं गतो वै सोऽनरोत्तमः। प्रदध्यौ स क
रं तस्य प्रादुरासीत्ततो बलं। ततस्तान् जयसत्वान्स्प्रातिसीमान्नराधिपान्। एतस्मात्कारणाद्राजन्नविमृतः सन
रं धर्मः। तस्य कारं धर्मः पुत्रस्त्रेतायुगमुखे स च न्। इंद्राद्दनवरः श्रीमान् विक्रमेणारिदुर्जयः। तस्य सर्वं मही
पाला वर्त्तते स्म वशे तदा। स हि संम्राड्भवत्तेषां धृतेन च बलेन च। अविद्विन्नाम धर्मात्मा शौर्येणेंद्रसमो रणे
तु। यज्ञशीलः कर्मरतो धृतिमान्संयतेंद्रियः। तेजसादित्यसदृशः क्षमया पृथिवीसमः। बृहस्पतिसमो बुध्या
हिमवानिव सुस्थिरः। कर्मणा मनसा वाचा दमेन प्रशमेन च। मनांस्याराधयामास प्रजानां स महीपतिः।
इयाज चाश्वमेधानां शतेन विधिवत्पुनः। याजयामास तं विद्वान्स्वयमेवांगिराः प्रभुः। तस्य पुत्रोऽत्तिर्ना
म पितरं गुणवत्तया। मरुतो नाम धर्मज्ञश्चक्रवर्ती महायशाः। नागायुतसमप्राणः साक्षाद्विष्णुरिवापरः। स
यक्ष्यमाणोऽथ मत्तिमान् शातकौंभमयान्युत। कारयामास शुभ्राणि भाजनानि सहस्रशः। श्वेतं पर्वतमासाद्य हि २

तेमतिस्तात पुनः कालेन मुह्यसे। किमाकाशे वयं सर्वे प्रलयाम मुहुर्मुहुः। विदिताः क्षत्रधर्मास्ते येषां युद्धेन
जीविका। यथा प्रवृत्तो नृपतिर्नाधिबंधेन युज्यते। मोक्षधर्माश्च निखिला यथातथ्येन ते श्रुताः। असकृच्चैव
संदेहाः छिन्नास्ते कामजा मया। श्रद्दधानो दुर्मेधा लुप्तस्मृतिरसि ध्रुवं। मैवं भव न ते युक्तमिदमज्ञानमी
दृशं। प्रायश्चित्तानि सर्वाणि विदितानि च तेनघ। राजधर्माश्च ते सर्वे दानधर्माश्च विश्रुताः। स कथं सर्वध
र्मज्ञ सर्वागमविशारद। परिमुह्यसि भूयस्त्वं अज्ञानादिव भारत॥ इत्याश्वमेधिके २ व्यास उवाच॥ युधि
ष्ठिर तव प्रज्ञा न सम्यगिति मे मतिः। नहि कश्चित्स्वयं मर्त्यः स्ववशः कुरुते क्रियां। ईश्वरेण नियुक्तोयं
पुरुषः साध्वसाधु वा। करोति विवशः कर्म तत्र का परिदेवना। आत्मानं मन्यसे चाथ पापकर्माणमंततः।
शृणु तत्र त्वया पापं अपकृष्येत भारत। तपोभिः क्रतुभिश्चैव दानेन च युधिष्ठिर। तरंति नित्यं पुरुषा ये
स्म पापानि कुर्वते। यज्ञेन तपसा चैव दानेन च नराधिप। पूयंते नरशार्दूल नरा दुःकृतकर्मिणः। अ
सुराश्च सुराश्चैव पुण्यहेतोर्मखक्रियाः। प्रयतंते महात्मानस्तस्माद्यज्ञाः परायणं। यज्ञैर्देवा महात्मा
नो बभूवुरधिकाः सुराः। ततो देवाः क्रियावंतो दानवानभ्यधर्षयन्। राजसूयाश्वमेधौ च सर्वमेधं च भा
रत। नरमेधं च नृपते त्वमाहर युधिष्ठिर। यजस्व वाजिमेधेन विधिवद्दक्षिणावता। बहुकामान्नयु
क्तेन रामो दाशरथिर्यथा। यथा च भरतो राजा दौष्यंतिः पृथिवीपतिः। शाकुंतलो महावीर्यस्तव पूर्वपि
तामहः। युधिष्ठिर० असंशयं वाजिमेधः पावयेत्पृथिवीपतिं। अभिप्रायस्तु मे कश्चित्तत्तं शृणुष्व म
हामुने। इमं ज्ञातिवधं कृत्वा सुमहांतं द्विजोत्तम। दानमल्पं न शक्ष्यामि दातुं वित्तं च नास्ति मे। न च बा

एवं ह्यर्वैति कौंतेय विदुरे दीर्घदर्शिनि। दुर्योधनमहं पापं अन्ववर्त्तं वृथामतिः। अश्रुत्वा तस्य धीरस्य वाक्यानि म
धुराण्यहं। फलं प्राप्य महद्दुःखं निमग्नः शोकसागरे। वृद्धौ हि तौ ते पितरौ पश्य याचे च दुःखितौ नृप। न शोचितव्यं
त्वया तात पश्यामि हि जनाधिप। इति श्रीमहाभारते आश्वमेधिके पर्वणि धृतराष्ट्रवाक्यं॥ वैशंपायन उ०। एवमुक्त
स्तु राजा स धृतराष्ट्रेण धीमता। तूष्णीं बभूव नृपतिस्तमुवाचाथ केशवः। अतीव मनसा शोकः क्रियमाणो
जनाधिप। संतापयति वै तस्य पूर्वप्रेतान् पितामहान्। त्वद्विधेषु महाबुद्धे नैतदद्योपपद्यते। यजस्व बहुभि
र्यज्ञैर्विविधैश्चाप्तदक्षिणैः। देवांस्तर्पय सोमेन स्वधया च पितॄनपि। अतिथीनन्नपानेन कामैरन्यैरकिं
चनान्। विदितं वेदितव्यं ते कर्त्तव्यमपि ते कृतं। श्रुताश्च राजधर्मास्ते भीष्माद्भागीरथीसुतात्। कृष्णद्वै
पायनाच्चापि नारदाद्विदुरात्तथा। नेमामर्हसि मूढानां वृत्तिं त्वमनुवर्त्तितुं। पितृपैतामहं वृत्तमास्थाय धुर
मुद्वह। युक्तं हि यशसा क्षत्रं स्वर्गं प्राप्तमसंशयं। न हि कश्चन शूराणां निहतोत्र पराङ्मुखः। त्यज शोकं
महाराज भवितव्यं हि तत्तथा। न शक्यास्ते पुनर्द्रष्टुं त्वया येस्मिन् रणे हताः। एतावदुक्त्वा गोविंदो धर्मराजं
युधिष्ठिरं। विरराम महातेजास्तमुवाच युधिष्ठिरः। गोविंद मयि या प्रीतिस्तव सा विदिता मम। सौहृदेन त
था प्रेम्णा सदा मामनुकंपसे। प्रियं तु मे स्यात् सुमहत्कृतं चक्रगदाधर। श्रीमत्प्रीतेन मनसा सर्वं यादवनं
दन। यदि मामनुजानीया भवान् गंतुं तपोवनं। न हि शांतिं प्रपश्यामि घातयित्वा पितामहं। कर्णं च पुरु
षव्याघ्रं संग्रामेष्वपलायिनं। कर्मणा येन मुच्येयं तस्मात् क्रूरादरिंदम। कर्मणस्तद्विधत्स्वेह न हि शुध्यति
मे मनः। तमेवं वादिनं पार्थं व्यासः प्रोवाच धर्मवित्। सांत्वयन् सुमहातेजाः शुभं वचनमर्थवत्। अकृता

मवत्पार्श्वे उत्तरे। कांचनं सुमहोत्साहस्तत्र सर्वं चकार ह। ततः कुंडानि पात्रीश्च पाध्यवरान्यासनानि च। यत्र कुंभाः सु
वर्णकिर्त्तारो येषां संख्या न विद्यते। तस्यैव तत्समीपे स यज्ञवाटो बभूव ह। ईजे स तत्र धर्मात्मा विधिवत्पृथि
वीपतिः। मरुत्तः सहितैः सर्वैः प्रजापाले नराधिपः॥ आश्वमेधिके मरुत्तीये। कथंवीर्यः समभवत्स राजा वद
तांवर। कदा च जातरूपेण समायुज्यत स द्विज। क्व च तत्सांप्रतं द्रव्यं भगवन्नवतिष्ठते। कथं च शक्यमस्मा
भिस्तदवाप्तुं तपोधन। व्यास०। असुराश्च सुराश्चैव दक्षस्यासन्प्रजापतेः। अपत्यं बहुलं तात अस्पर्द्धं
परस्परं। तथैवांगिरसः पुत्रौ पितृतुल्यौ बभूवतुः। बृहस्पतिर्बृहत्तेजाः संवर्तश्च तपोधनः। तावपिस्प
र्द्धिनौ राजन्पृथगास्तां परस्परं। बृहस्पतिस्तु संवर्तं बाधते स्म पुनः पुनः। स बाध्यमानः सततं भ्रात्रा ज्ये
ष्ठेन भारत। अर्थानुत्सृज्य दिग्वासा वने वासमरोचयत्। वासवोप्यसुरान्सर्वान्निर्जित्य विनिपात्य च। इंद्रत्वं
प्राप्य लोकेषु ततो वव्रे पुरोहितं। पुत्रमांगिरसः श्रेष्ठं विप्रं ज्येष्ठं बृहस्पतिं। याज्यस्त्वंगिरसः पूर्वमासीद्राजा
करंधमः। वीर्येणाप्रतिमो लोके वृत्तेन च बलेन च। शतक्रतुरिवौजस्वी धर्मात्मा संसितव्रतः। वाहनं यस्य यो
धाश्च द्रव्याणि विविधानि च। ध्यानादेवाभवद्राजन्मुखवातेन सर्वशः। ग्रायनानि च मुख्यानि महार्हाणि
च सर्वशः। स गुणैः पार्थिवान्सर्वान्वशे चक्रे नराधिपः। संजीव्य कालमिष्टं च सशरीरो दिवं गतः। बभूव
तस्य पुत्रस्तु ययातिरिव धर्मवित्। अविक्षिन्नाम शत्रुजित्स वशे कृतवान्महीं। विक्रमेण गुणैश्चापि पि
तेवासीत्स पार्थिवः। तस्य वासवतुल्योभून्मरुत्तो नाम वीर्यवान्। पुत्रस्तमनुरक्ताभूत्पृथिवी सागरांबरा।
स्पर्द्धते सततं स स्म देवराजेन पार्थिवः। वासवोपि मरुत्तेन स्पर्द्धते पांडुनंदन। शुचिः स गुणवानासीन्

मरुत्तःपृथिवीपतिः।यतमानोपियंशक्रोनविशेषयतिस्मह।सोशक्नुवन्विशेषायसमाहूयबृहस्पतिं।उवाचे
दंवचोदेवैःसहितोहरिवाहनः।बृहस्पतेमरुत्तस्यमास्मकार्षीःकथंचन।दैवंकर्माथवापित्र्यंकर्त्तासिममचेत्
प्रियं।अहंहित्रिषुलोकेषुसुराणांबृहस्पते।इंद्रत्वंप्राप्तवानेकोमरुत्तस्तुमहीपतिः।कथंह्यमर्त्यंब्रह्मंस्त्वंयाज
यित्वासुराधिपं।याजयेत्मृत्युसंयुक्तंमरुत्तमविशंकया।मांवावृणीष्वभद्रंतेमरुत्तंवामहीपतिं।परित्यज्यमरु
त्तंवायथाजोषंभजस्वमां।एवमुक्तःसकौरव्यदेवराज्ञाबृहस्पतिः।मुहूर्त्तमिवसंचिंत्यराजन्नुवचनमब्र
वीत्।त्वंभूतानामधिपतिस्त्वयिलोकाःप्रतिष्ठिताः।नमुचेर्विश्वरूपस्यनिहंतात्वंबलस्यच।समाजह
र्देवानामेकोवीरःश्रियंपरां।त्वंबिभर्षिभुवंद्यांचसदैवबलवाहनः।पौरोहित्यंकथंहित्वाकथंदेवग
णेश्वर।याजयेयंकथंमर्त्यंमरुत्तंपाकशासन।समाश्वसिहिदेवेशनाहंमर्त्यस्यकस्यचित्।ग्रहीष्या
मिस्रुवंयज्ञेश्रृणुचेदंवचोमम।हिरण्यरेताःशीतःस्यात्परिवर्त्तेतमेदिनी।भासंचनरविःकुर्यात्मत्सत्यंवि
चलेद्यदि।व्यासउ०।बृहस्पतेर्वचःश्रुत्वाशक्रोविगतमत्सरः।प्रशस्यैनंविवेशाथस्वमेवभवनंततः।
आश्वमेधिकेसंवर्त्तमरुत्तीये।५।व्यासउ०।अत्राप्युदाहरंतीममितिहासंपुरातनं।बृहस्पतेश्चसंवादंमरु
त्तस्यचभारत।देवराजेनसमयंकृतमांगिरसेनह।श्रुत्वामरुत्तोनृपतिःक्रतुमाहारयत्तदा।संकल्प्यमनसा
यज्ञंकरंधमसुतात्मजः।बृहस्पतिमुपागम्यवाग्मीवचनमब्रवीत्।भगवन्यत्त्वांमयापूर्वमभिगम्यतपोधन। ४
कृतोभिसंधिर्यज्ञायभवतोवचनाद्गुरोः।तमहंयष्टुमिच्छामिसंभारान्संभ्रियंतुमे।याज्योस्मिभगवान्साधो

तत्राभ्युहितविधस्त्वच। बृहस्पतिरुवाच। नकामये याजयितुं त्वामहं पृथिवीपते। वृतोस्मि देवराजेन प्रतिज्ञातं च
तस्य मे। मरुत्त उवाच। पित्र्यमस्मि तव क्षेत्रं बहु मन्ये च ते भृशं। न वास्म्ययाज्यतां प्राप्तो भजमानं भजस्व मां। बृ
हस्पतिरुवाच॥ अमर्त्यं याजयित्वाहं याजयिष्ये न मानुषं। मरुत्त गच्छ वा मा वा निवृत्तोस्म्यद्य याजनात्। न
त्वां याजयितास्मि वृणु त्वं यमिहेच्छसि। उपाध्यायं महाबाहो यस्ते यज्ञं करिष्यति। व्यास उ०। एवमुक्तः स न
पतिर्मरुत्तो व्रीडितोऽभवत्। प्रत्यागच्छच्च संविग्नो ददर्श पथि नारदं। देवर्षिणा समागम्य नारदेन स पार्थिवः
विधिवत्प्रांजलिस्तत्रे स्थौ अथैनं नारदोब्रवीत्। नारद उ०। राजर्षे नातिहृष्टोसि कच्चित्क्षेमं तवानघ। क्व
गतोसि कुतो तेद मप्रीतिस्थानमागतं। श्रोतव्यं चेन्मया राजन् ब्रूहि मे पार्थिवर्षभ। व्यपनेष्यामि ते मन्युं सर्व
यत्नैर्नराधिप। एवमुक्तो मरुत्तस्तु नारदेन महर्षिणा। विप्रलंभमुपाध्यायात् सर्वमेव न्यवेदयत्। मरुत्त
उवाच। गतोहमंगिरसः पुत्रं देवाचार्यं बृहस्पतिं। यज्ञार्थमृत्विजं द्रष्टुं स च मां नाभ्यनंदत। प्रत्याख्यातस्तु
तेनाहं जीवितुं नाद्य कामये। परित्यक्तः स्वगुरुणा दूषितश्चास्मि नारद। व्यास उ०। एवमुक्तस्तु राज्ञा स नार
दः प्रत्युवाच ह। आविक्षितं महाराज संवर्तो याजयिष्यति। नारद उवाच॥ राजन्नंगिरसः पुत्रः संवर्तो ना
म धार्मिकः। चंक्रमीति दिशः सर्वा दिग्वासा मोहयन् प्रजाः। तं गच्छ यदि याज्यं त्वां न वांछति बृहस्पतिः। प्र
सन्नस्त्वां महाराज संवर्तो याजयिष्यति। मरुत्त उ०। संजीवितोहं भगवन् वाक्येनानेन नारद। पश्येयं क्व
नु संवर्तं शंस मे वदतां वर। कथं च तस्मै वर्तेयं कथं मां न परित्यजेत्। प्रत्याख्यातो हि तेनापि नाहं जीवितु
मुत्सहे। नारद उ०। उन्मत्तवेषं बिभ्रत्स चंक्रमीति यथासुखं। वाराणसीं तु नगरीमभीक्ष्णमुपसेवते। तस्या

द्वारं समासाद्य न्यसेथा कुणपं क्वचित्। तं दृष्ट्वा यो निवर्तेत स संवर्तो महीपते। तं पृष्ठतोनुगच्छेथाः यत्र गच्छेत् स वीर्यवा
न्। तमेकांते समासाद्य प्रांजलिः शरणं व्रजेः। पृच्छेथा यदि केनाहं तवाख्यात इति स्म ह। ब्रूयास्त्वं नारदेनेति सं
तप्तश्च शत्रुहन्। स चेत्त्वामनुयुंजीत ममानुगमनेप्सया। शंसेथा वह्निमारूढं मामपि त्वमशंकया। व्यास उ० स
बाढेति प्रतिश्रुत्य पूजयित्वा च नारदं। तमनुज्ञाय राजर्षिर्ययौ वाराणसीं पुरीं। तत्र गत्वा यथोक्तः स पुर्या द्वारे महाय
शाः। कुणपं स्थापयामास नारदस्य वचः स्मरन्। यौगपद्येन विप्रस्तु स पुरीद्वारमाविशत्। ततः स कुणपं दृष्ट्वा स
हसा स न्यवर्तत। स तं निवृत्तमालोक्य प्रांजलिः पृष्ठतोन्वयात्। आविक्षितो महीपालः संवर्तमुपशिक्षितुं। स
एनं विजने दृष्ट्वा पांसुभिः कर्दमेन च। श्लेष्मणा चापि राजानं ष्ठीवनैः समवाकिरत्। स तथा बाध्यमानोपि सं
वर्तेन महीपतिः। अन्वगादेव तमृषिं प्रांजलिः संप्रसादयन्। ततो निवर्त्य संवर्तः परिश्रांतमुपाविशत्। शीत
लच्छायमासाद्य न्यग्रोधं बहुशाखिनं। इत्याश्वमेधिके संवर्तमरुत्तीये।। संवर्त उ० कथमस्मि त्वया ज्ञातः केन वा
कथितोस्मि ते। एतदाचक्ष्व मे सत्यं ईप्सिते मे प्रियं प्रति। सत्यं ते ब्रुवतः सर्वे संपत्स्यंते मनोरथाः। मिथ्या ते
ब्रुवतो मूर्द्धा सप्तधा ते भविष्यति। मरुत्त उ० नारदेन भवान्मह्यं आख्यातो ह्यटता पथि। गुरुपुत्रो ममेति त्वं त
तो मे प्रीतिरुत्तमा। संवर्त उ० सत्यमेतद्भवानाह स मां जानाति सत्रिणं। कथयस्वेति एतन्मे क्व नु संप्रति नारदः
मरुत्त उ० भवंतं कथयित्वा च मम देवर्षिसत्तमः। ततो मामभ्यनुज्ञाय प्रविष्टो हव्यवाहनं। व्यास उ० श्रु
त्वा तु पार्थिवस्यैतत् संवर्तः परया मुदा। एतावदहमप्येनं कुर्यामिति तमब्रवीत्। ततो मरुत्तं संवृत्तो वाचा वा नि
र्भर्त्सयन्निव। रूक्षया ब्राह्मणो राजन् पुनः पुनरथाब्रवीत्। वातप्रधानेन मया स्वचित्तवशवर्तिना। एवं विकृ ५

तद्रूपेण कथं याजितुमिच्छसि। भ्राता मम समर्थश्च वासवेन च सत्कृतः। वर्त्तते याजने चैव तेन कर्माणि
कारय। गृहं स्वं चैव यज्ञाश्च सर्वयज्ञाश्च दैवताः। पूर्वजेन समाक्षिप्तं शरीरं वर्जितं त्विदं। नाहं तेनाननुज्ञा
तस्त्वामाविक्षित कर्हिचित्। याजयेयं कथं विद्वे स हि पूज्यतमो मम। स त्वं बृहस्पतिं गच्छ तमनुज्ञाप्य
चाव्रज। ततोहं याजयिष्ये त्वां यदि यज्ञमिहेच्छसि। मरुत्त उ०। बृहस्पतिं गतः पूर्वमहं संवर्त्त तच्छृणु। न मां
रोचयते याज्यं असौ वासववारितः। अमरं याज्यमासाद्य मामृषे मा स्म मानुषं। याजयेथा मरुत्तं च म
र्त्यधर्माणमातुरं। स्पर्द्धते च मया विप्र सदा वै स हि पार्थिवः। एवमस्त्विति चाप्युक्तो भ्रात्रा ते बलवृत्रहा। समाम
त्रिगतं प्रेम्णा याज्यवन्न बृहस्पते। देवराजमुपाश्रित्य तद्विद्धि मुनिपुंगव। सोहमिच्छामि भवता सर्वस्वेना
पि याजितुं। कामये समतिक्रान्तुं वासवं त्वत्कृते गुणैः। नाहि मे वर्त्तते बुद्धिर्ब्रह्मन्गन्तुं बृहस्पतिं। प्रत्या
ख्यातोस्मि तेनापि तथा नापकृते सति। संवर्त्त उ०। चिकीर्षसि यथाकामं सर्वमेतत्पार्थिव। यदि सर्वानभिप्रा
यान्कर्त्तासि मम पार्थिव। याज्यमानं मया हि त्वां बृहस्पतिपुरंदरौ। द्विष्येतां समभिक्रुद्धावेतदेकं समर्थय।
स्थैर्यमत्र कथं मे स्यात्तस्मात्त्वं निःसंशयं कुरु। कुपितस्त्वां नहीदानीं भस्म कुर्यां सबांधवं। मरुत्त उ०। याव
त्तपेत्सहस्रांशुस्तिष्ठेरंश्चापि पर्वताः। तावल्लोकान्न लभेयं त्यजेयं संगतं यदि। मा चापि शुभबुद्धित्वं लभे
यमिह कर्हिचित्। विषयैः संगतं मास्तु त्यजेयं यदि संगमं। संवर्त्त उ०। आविक्षित शुभा बुद्धिर्धीयतां तव
कर्मसु। याजनं हि ममाप्येवं वर्त्तते तव पार्थिव। संविधास्ये च ते राजन्नक्षयं द्रव्यमुत्तमं। येन देवान्सगंध
र्वान्शक्रं चाभिभविष्यसि। न तु मे वर्त्तते बुद्धिर्धने याज्येषु वा पुनः। विप्रियं तु चिकीर्षामि भ्रातुश्चेंद्रस्य चोत्त

योःगमयिष्यामि वेंद्रेण समतामपि ते ध्रुवं। प्रियं तु ते चिकीर्षामि सत्यमेतद्ब्रवीमिते॥ इत्याश्वमेधिके संवर्त्तमरुत्ती
योसंवर्त्तउ० गिरेर्हिमवतः पृष्ठे मुंजवान्नाम पर्वतः। तप्यते यत्र भगवान्नृतपो नित्यमुमापतिः। वनस्प
तीनां मूलेषु टंकेषु शिखरेषु च। गुहासु शैलराजस्य यथाकामं यथासुखं। उमासहायो भगवान्यत्र नित्यं
महेश्वरः। आस्ते शूली महातेजा नानाभूतगणैर्वृतः। तत्र रुद्राश्च साध्याश्च विश्वेथ वसवस्तथा॥ यमश्च वरु
णश्चैव कुबेरश्च सहानुगः। भूतानि च पिशाचाश्च नासत्यावपि चाश्विनौ। गंधर्वाप्सरसश्चैव यक्षा दे
वर्षयस्तथा॥ आदित्या मरुतश्चैव यातुधानाश्च सर्वशः। उमापतिं महात्मानं बहुरूपमुपासते। र
मते भगवांस्तत्र कुबेरानुचरैः सह। विकृतैर्विकृताकारैः क्रीडद्भिः पृथिवीपते। श्रिया ज्वलन्दृश्यते वै
बालादित्यसमद्युतिः। न रूपं विद्यते तस्य संस्थानं वा कथंचन। निर्देष्टुं प्राणिभिः केश्चित्प्राकृतैर्मांस
लोचनैः। नोष्णं न शिशिरं तत्र न वायुर्न च भास्करः। न जरा क्षुत्पिपासे वा न मृत्युर्न भयं नृप। तस्य शैल
स्य पार्श्वेषु सर्वेषु जयतां वर। धातवो जातरूपस्य रश्मयः सवितुर्यथा। रक्ष्यंते ते कुबेरस्य सहायैरुद्य
तायुधैः। चिकीर्षद्भिः कुबेरस्य प्रियं राजन्महात्मनः। तस्मै भगवते कृत्वा नमः शर्वाय वेधसे। रु
द्राय शितिकंठाय सुरूपाय सुवर्चसे। कपर्दिने करालाय हर्यक्ष्णे वरदाय च। पूष्णो दंतविनाशाय ता
म्रसाय शिवाय च। याम्यायाव्यक्तकेशाय महते शंकराय च। भास्कराय सुतीर्थाय देवदेवाय रंहसे।
बिल्वदंडाय सिद्धाय सर्वदंडधराय च। मृगव्याधाय महते धन्विने भार्गवाय च। लेलिहानाय गोष्ठाय श्रे२
च सिद्धमंत्राय वृष्णये। हिरण्यवाससे राजन्नुग्राय पतये दिशां। पशूनां पतये चैव भूतानां पतये तथा॥६

हृस्वायमातत्नसायसेनान्येवाव्ययायच।शूलहस्तायसर्वेषांदेवानांपतयेनमः।श्वेतायकृष्णनेत्रायविश्वरूपाय
चैवहि।तीक्ष्णतापायतीक्ष्णायवैश्वानरमुखायच।महाद्युतेरनंगायसर्वांगायप्रसूतये।तथाशुक्राधिपतयेपृथवे
कृत्तिवाससे।कपालमालिनेनित्यंसुवर्णमुकुटायच।महादेवायकृष्णायत्र्यंबकायाव्ययायच।क्रोधनायान्
नृशंसायमृदवेबाहुशालिनेमुंडिनेतप्ततमसेतथैवाक्रूरकर्मिणे।सहस्रशिरसेचैवसहस्रचरणायच।नमस्तथा
सुरूपायबहुरूपायदंष्ट्रिणे।पिनाकिनंमहात्मानंमहायोगिनमव्ययं।त्रिशूलपाणिंवरदंत्र्यंबकंभुवनेश्वरं।
त्रिपुरघ्नंत्रिनयनंत्रिलोकेशंमहौजसं।प्रभवंसर्वभूतानांधारणंधरणीधरं।ईशानंशंकरंशर्वंसर्वंविश्वे
श्वरंविभुं।उमापतिंपशुपतिंविश्वरूपंमहेश्वरं।विरूपाक्षंदशभुजंदिव्ययोगवृषध्वजं।उग्रंस्थाणुंशिवंरौद्रंश
र्वंगौरीशमीश्वरं।शितिकंठमजंशुक्रंपृथुंपृथुहरंरिपुं।विश्वरूपंविरूपाक्षंबहुरूपमरूपकं।प्रणम्यशिरसा
देवमनंगांगहरंहरं।शरण्यंशरणंयाहिमहादेवंचतुर्मुखं।एवंकृत्वानमस्तस्मैमहादेवायधीमते।महा
त्मनेक्षितिपतेतत्सुवर्णमवाप्स्यसि।सुवर्णमाहरिष्यंतितत्रगच्छंतुतेनराः।व्यासउवाच।इत्युक्तःसवचस्तच
क्रेकारंधमात्मजः।ततोतिमानुषंसर्वंचक्रेयज्ञस्यसंविधिं।सौवर्णानिचभांडानिसंचक्रुस्तत्रशिल्पिनः।
बृहस्पतिस्तुतांश्रुत्वामरुत्तस्यमहीपतेः।समृद्धिमतिदेवेभ्यःसंतापमकरोद्भृशं।संतप्यमानोवैवर्ण्यंकृ
शत्वंचागमत्परं।भविष्यतिहिमेशत्रुःसंवर्त्तोवसुमानिति।तंश्रुत्वाभृशसंतप्तंदेवराजोबृहस्पतिं।अभि
गम्यामरवृतःप्रोवाचेदंवचस्तथा।इत्याश्वमेधिकेसंवर्त्तमरुत्तीये।इंद्रउवाच।कच्चित्सुखंस्वपिषित्वंबृ
हस्पतेकच्चिन्मनोज्ञाःपरिचारकास्ते।कच्चिद्देवानांसुखकामोसिविप्रकच्चिद्देवास्त्वांपरिपालयंति।बृहस्प

ति॰ सुखं शये त्वायने हं महेंद्र तथा मनोज्ञाः परिश्चारकाश्च। तथा देवानां सुखकामोस्मि शक्र देवाश्च मां सु
भृशं पालयंति। इंद्र उ॰। कुतो दुःखं देहजं मानसं वा पांडुर्विवर्णश्च कुतस्त्वमद्य। आचक्ष्व मे तत् द्विज यावदे
वं निहन्मि सर्वांश्च तव दुःखकर्तॄन्। बृहस्पतिरुवाच। मरुत्तमाहुर्मघवन् यक्ष्यमाणं महायज्ञेनोत्त
मदक्षिणेन। तं संवर्तो याजयितेति मे श्रुतं तदिच्छामि न स तं याजयेत। इंद्र उ॰। सर्वान् कामाननुजातो
सि विप्र यस्त्वं देवानां मंत्रयसे पुरोधाः। उभौ च ते मृत्युजरे व्यतीतौ किं संवर्तस्तव कर्ताद्य विप्र। बृह
स्पति॰। जिघांससि ह्यप्युत सानुबंधान् देवैः सह त्वं असुरान् संप्रणुद्य। यं यं समृद्धं पश्यसि तत्र तत्र
दुःखं सपत्नेषु समृद्धिभावः। अतोस्मि देवेंद्र विवर्णवर्णः सपत्नो मे वर्द्धते तन्निशम्य। सर्वोपायैर्म
घवन् संनियच्छ संवर्तमद्यैव तथा मरुत्तं। इंद्र उ॰। एहि गच्छ प्रहितो जातवेदो बृहस्पतिं परिदातुं मरुत्ते।
अयं वै त्वां याजयिता बृहस्पतिस्तथामरं चैव करिष्यतीति। अग्निरुवाच॥ अहं गच्छामि तव शक्राद्य
दूतो बृहस्पतिं परिदातुं मरुत्ते। वाचं सत्यां ते पुरुहूत कर्तुं बृहस्पतेश्चापचितिं चिकीर्षुः। ततः प्रायाद्धू
मकेतुर्महात्मा वनस्पतीन् वीरुधश्चोपमर्द्दन्। कामाद्धिमांते परिवर्त्तमानः काष्ठातिगो मातरिश्वेव नर्द
न्। मरुत्त उ॰। आश्चर्यमद्य पश्यामि रूपिणं वह्निमागतं। आसनं सलिलं पाद्यं गां चोपानय वै मुने। अ
ग्निरुवाच। आसनं सलिलं पाद्यं प्रतिगृह्णामि तेनघ। इंद्रेण तु समादिष्टं विद्धि मां दूतमागतं। मरुत्त उ॰।
कच्चित् श्रीमान् देवराजः सुखी च कच्चिदस्मान् प्रीयते धूमकेतो। कच्चिद्देवाश्च वशेस्य सर्वे तथा
त्वं सम मम कात्स्न्येन देव। अग्निरुवाच। शक्रो भृशं सुसुखी पार्थिवेंद्र प्रीतिं चेच्छन्नजरां वै त्वया स ७

वं दिवावशाग्रास्तस्य राजन्संदेशं तं शृणु मे देवराज्ञः। यदर्थं मां प्राहिणोत्त्वत्सकाशं बृहस्पतिं परिदातुं मरुत्ताऽ
यं पुनर्याजयिता तवास्तु मर्त्यं संतं माममरं वै करोतु॥ मरुत्त उवाच॥ संवर्तोयं याजयिता द्विजो मे बृहस्पतेरंजलि
रेष तस्मै। नासौ देवं याजयित्वा महेंद्रं मर्त्यं संतं याजयन्नद्य शोभ्यं॥ अग्निरुवाच॥ ये वै लोका देवलोके महांतस्ता
न्प्राप्स्यसे देवराजप्रसादात्। त्वां चेत्कामं याजयेदेष बृहस्पतिर्नरं स्वर्गं विजयेत्त्कीर्तियुक्तः। तथा लोका
मानुषा ये च दिव्याः प्रजापतेश्चापि ये वै महांतः। ते ते जिता देवराज्यं च कृत्स्नं बृहस्पतिश्चेद्याजयेत्त्वां न
रेंद्र। संवर्त उवाच। मा मेवं त्वं पुनरागाः कथंचिद्बृहस्पतिं परिदातुं मरुत्ते। मा त्वां धक्ष्ये चक्षुषा दारुणेन संक्रु
द्धोहं पावक त्वं निबोध॥ व्यास उवाच॥ ततो देवानगमद्धूमकेतुर्भयाद्भीतो व्याधितोश्वत्थपर्णवत्। तं वै दृष्ट्वा प्रा
ह शक्रो महात्मा बृहस्पतेः सन्निधौ हव्यवाहं॥ इंद्र उवाच॥ यस्त्वं गतः प्रहितो धूमकेतो बृहस्पतिं परिदातुं मरु
त्ते। तत्किं प्राह स नृपो यक्ष्यमाणः कच्चिद्वचः प्रतिगृह्णाति तच्च॥ अग्निरुवाच॥ न ते वाचं रोचयते मरुत्तो बृह
स्पतेरंजलिं प्राहिणोत्स। संवर्तो मां याजयितेत्यभीक्ष्णं पुनः पुनः स मया याच्यमानः। उवाचेदं मानुषा ये
च दिव्याः प्रजापतेर्ये च लोका महांतः। तांश्चेल्लभेयं संविदं तेन कृत्वा तथापि नेच्छेयमिति प्रतीतः॥ इंद्र उवाच॥ पु
नर्भवान्पार्थिवं तं समेत्य वाक्यं मदीयं प्रापय स्वार्थयुक्तं। पुनर्यदि युक्तो न करिष्यते वचस्ततो वज्रं संप्रह
र्तास्मि तस्मै॥ अग्निरुवाच॥ गंधर्वराड्यात्वयं तत्र दूतो बिभेम्यहं वासव तत्र गंतुं। संरब्धो मामाह सती
क्ष्णरोषः संवर्तो वाक्यं चरितब्रह्मचर्यः। यद्यागच्छेस्त्वं पुनरेवं कथंचित् बृहस्पतिं परिदातुं मरुत्ते। दहेयं
त्वां चक्षुषा दारुणेन संक्रुद्ध इत्येतदवेहि शक्र॥ इंद्र उवाच॥ त्वमेवान्यान्दहसे जातवेदा न हि त्वदन्यो विद्यते

न्नस्य कर्त्ता। त्वं संस्य शोसि सर्वलोको बिभेति अश्रद्धेयं वदसे हव्यवाह। अग्निरु० दिवं देवं दहं पृथिवीं वैवसर्व्वां
संवेष्टये लं स्वं स्वबलेन शक्र। एवं वृत्तस्य हसतस्तवाग्ने कथं वृत्रस्त्रिदिवं प्राक् जहार। इंद्र० नासंदी
कोतिक मनो न कलिंगान्नकारि सोमं प्रपिबामि वन्ध्यो। न ह बले हं प्रहिणोमि वज्रं को मे सुखाय प्रहरेत म
र्त्यः। प्रव्राजये यः कालिकेयान् पृथिव्याम् अपाकर्षं दानवानंतरिक्षात्। दिवः प्रह्लादम् अवसानम् आनयं को
मे सुखाय प्रहरेन्मनुष्यः। अग्नि० यत्र शर्यातिं च्यवनो याजयिष्यन् सहाश्विभ्यां सोमम् अगृह्णदेकः।
तं त्वं क्रुद्धः प्रत्यषेधीः पुरस्तात् शर्यातियज्ञं स्मर तं महेंद्र। वज्रं गृहीत्वा च पुरंदर त्वं संप्रहार्षीश्च्य
वनस्यातिघोरं। स ते विप्रः सह वज्रेण बाहुम् अपागृह्णात् तपसा जातमन्युः। ततो रोषात् सर्वतो घोररू
पं सपत्नं ते जनयामास विप्रः। मदो नामासुरं विश्वरूपं यं त्वं दृष्ट्वा चक्षुषी संन्यमीलः। हनुरेका
जगतीस्था तथैका दिवं गता अपरा दानवस्य। सहस्रं दंतानां शतयोजनानां सुतीक्ष्णानां घोररूपं बभू
व। वृत्ताः स्थूला राजतस्तंभवर्णा दंष्ट्राश्चतस्रो द्वे शते योजनानां। स त्वां दंतान् विदशन्नभ्यधावज्जिघां
सया शूलम् उद्यम्य घोरं। अपश्यस्त्वं तं तदा घोररूपं सर्वे चान्ये ददृशुर्दर्शनीयं। यतस्माद्भीतः प्रांजलि
स्त्वं महर्षिम् आगच्छेथाः शरणं दानवघ्न। तस्मात् क्षात्राद्बलात् ब्रह्मबलं गरीयो न ब्रह्मतः किंचिदन्यद्गरी
यः। सोहं जानन् ब्रह्मतेजो यथावन् न संवर्तं गंतुम् इच्छामि शक्र। इत्याश्वमेधिके संवर्तमरुत्तीये इंद्र०॥
एवमेतद्ब्रह्मबलं गरीयो न ब्रह्मतः किंचिदन्यद्गरीयः। आविक्षितस्य तु बलं न मृष्ये वज्रमस्मै प्रहरि
ष्यामि घोरं। धृतराष्ट्र प्रहितो गच्छ मरुत्तं संवर्तेन सहितं तं वदस्व। बृहस्पतिं त्वं मनु गच्छ राजन् वज्रं ८

वातेप्रहरिष्यामिघोरं।ततोगत्वाधृतराष्ट्रोनरेंद्रंप्रोवाचेदंवचनंवासवस्य।धृतराष्ट्रउवाच।गंधर्वंमांधृतराष्ट्रंनि
बोधत्वामागतंवक्तुकामंनरेंद्र।ऐंद्रंवाक्यंशृणुमेराजसिंह यदाहलोकाधिपतिर्महात्मा।बृहस्पतिंयाजकं
त्वंवृणीष्वावज्रंवातेप्रहरिष्यामिघोरं।वचस्त्वमेतन्नकरिष्यसेमेतत्प्राहैतदेवंदेतेवाचिंत्यकर्मा।मरुत्त उ०।त्वं
चैवैतद्वेत्थपुरंदरश्चविश्वेदेवावसवश्चाश्विनौच।मित्रद्रोहेनिःकृतिर्वैयथैवनास्तीतिलोकेषुसदैववा
दः।बृहस्पतिर्याजयितामहेंद्रंदेवश्रेष्ठंवज्रभृतांवरिष्ठं।संवर्तोमांयाजयिताद्यविप्रोनतेवाक्यंतस्यवारो
चयामि।गंधर्व उ०।घोरोनादःश्रूयतांवासवस्यनभस्तलेगर्जतोराजसिंह।व्यक्तंवज्रंमोक्ष्यतेतेमहेंद्रःक्षेमं
राजंश्चिंत्यतामेषकालः।व्यास उ०।इत्येवमुक्तोधृतराष्ट्रेणराजन्श्रुत्वारावंनदतोवासवस्य।तपोनित्यंब्र
ह्मविदांवरिष्ठंसंवर्तंतंज्ञापयामासकार्यं।मरुत्त उ०।इममात्मानंप्लवमानमारादध्वादूरंतेननदृश्यते
द्य।प्रपद्येहंशर्मविप्रेंद्रत्वत्तःप्रयच्छतस्मादभयंविप्रमुख्य।अयमायातिवैवज्री।विदिशोद्योतयन्
न्दिशः।अमानुषेणरूपेणसदस्यास्त्रासिताहिमे।संवर्त उ०।भयंशक्राद्व्येतुतेराजसिंहप्रणोत्स्येहंभय
मेतत्सुघोरं।संस्तंभिन्याविद्ययाक्षिप्रमेवमाभैस्त्वमस्माद्भवचापिप्रतीतः।अहंसंस्तंभयिष्यामिमाभैस्त्वं
शक्रतोनृप।सर्वेषामेवदेवानांक्षपितान्यायुधानिमे।दिशोवज्रंव्रजतांवायुरेतुवर्षंभूत्वानिपततुका
ननेषु।आपःप्लवंत्वंतरिक्षेवृथाचसौदामिनीदृश्यतांमाबिभेस्त्वं।ततोवह्निस्त्रायतांसर्वतस्त्वांकामं
वर्षंवर्षतुवासवोवा।वज्रंतथास्थापयतांचवायुर्महाघोरंप्लवमानंजलौघैः।मरुत्त उ०।घोरःशब्दःश्रू
यतेवैमहास्वनोवज्रस्यैषःसहितोमारुतेन।आत्माहिमेप्रव्यथतेमुहुर्मुहुःनमेस्वास्थ्यंजायतेवाद्यवि

विप्रा संवर्त्त॥ वज्राद्भयाद्यो तु जयं तवाद्य वातोऽस्त्वा हनिमि नरेंद्र वज्रं। जयं त्वत्का वरमन्यं वृणीष्व कं ते का
मं तपसा साधयामि। मरुत्त॥ इंद्रः साक्षात्सहसा भ्येतु विप्र हविर्यज्ञे प्रतिगृह्णातु चैव। स्वं स्वं धिष्ण्यं चैव वसंतु दे
वाः सोमं कृतं प्रतिगृह्णंतु देवाः॥ संवर्त्त॥ अयमिंद्रो हरिभिरायाति राजन् देवैः सर्वैः सहितः सोमपीथा। मं
त्राहूतो यज्ञमिमं मयाद्य पश्यस्वैनं मंत्रविश्रस्तकायं। ततो देवैः सहितो देवराजो रथे युक्त्वा तान् हरीन्
वाजिमुख्यान्। आयाति यज्ञमधिराजः पिपासुरविक्षितस्याप्रमेयस्य सोमं। तमायांतं सहितं देवसं
घैः प्रत्युद्ययौ सपुरोधा मरुत्तः। चक्रे पूजां देवराजाय चाग्र्यां यथाशास्त्रं विधिवत्प्रीयमाणः॥ संवर्त्त॥
स्वागतं ते पुरुहूत हविद्वान् यज्ञोऽद्यैवं सन्निहिते त्वयींद्र। शोशुभ्यते बलवृत्रघ्न भूयः पिबस्व सोम
मिमं मुद्यतं मया। मरुत्त॥ शिवेन मा पश्य नमोऽस्तु तेऽस्तु प्राप्तो यज्ञः सफलं जीवितं मे। अयं यज्ञं कुरुते मे सु
रेंद्र बृहस्पतेरवरोजन्मनायः। इंद्र॥ जानामि ते गुरुमेतं तपोधनं। बृहस्पतेरवरोजन्मनायः यस्याह्वा
नादागतोऽहं नरेंद्र प्रीतिर्मेद्य त्वयि मन्युः प्रनष्टः। संवर्त्त॥ यदि प्रीतस्त्वमसि वै देवराजस्तस्मात्स्वयं शाधि
यज्ञे विधानं। स्वार्थं मार्गान् कुरु सर्वान्नरेंद्र जानात्वयं सर्वलोकश्च देव॥ व्यास॥ एवमुक्तस्त्वांगिरसेन
शक्रः समादिदेश स्वयमेव देवान्। सभाः क्रियंतां शततश्च मुख्याः सहस्रशश्चित्रभौमाः समृद्धाः।
क्लृप्तस्थूणाः कुरुतारोहणानि गंधर्वाणामप्सरसां च शीघ्रं। येषु नृत्येरन्नप्सरसः सहस्रशः स्वर्गोद्देशः
क्रियतां यज्ञवाटः। इत्युक्तास्ते चक्रुराशु प्रतीता दिवौकसः शक्रवाक्यान्नरेंद्र। ततो वाक्यं प्राह राजा

नमिंद्रः प्रीतो राजन्नु प्रीयमाणो मरुत्तं । एवं बल्वा सहस्राजन्न समेत्य ये चाप्यन्ये तत्र पूर्वं नरेंद्राः सर्वाश्चान्या
देवताः प्रीयमाणा हविस्तत्त्वं प्रतिगृह्णंतु राजन्नु । आग्नेयं वै लोहितमालभंतां वैश्वदेवं बहुरूपं विरा
जन्नु । नीलं चोक्षाणं मेध्यमथालभंतां चलं शिश्नं मत्प्रदिष्टं द्विजेंद्राः । ततो यज्ञो ववृधे तस्य राज्ञो यत्र
देवाः स्वयमेवान्नमाजह्रुः । यस्मिन् शक्रो ब्राह्मणैः पूज्यमानः सदस्योभूद्धरिमान् देवराजः । ततः संवर्त्तश्चि
त्यगतो महात्मा यथा वह्निः प्रज्वलितो द्वितीयः । हवींष्युच्चैराह्वयन् देवसंघान् जुहावाग्नौ मंत्रवत्सुप्रतीतः ।
ततः पीत्वा बलभित्सोमममग्र्यं दिवौकसः सोमपायेतथान्ये । तेनुज्ञाताः प्रययुः पार्थिवेन यथा जोषं तर्पिताः
प्रीतिमंतः । ततो राजा जातरूपस्य राशीः पदे पदे कारयामास रम्याः । द्विजातिभ्यो व्यसृजद्भूरि वित्तं राज
वित्तेशो वा रिहंता । ततो वित्तं विविधं संनिधाय यथोत्साहं ग्राहयित्वा च कोशं । अनुज्ञातो गुरुणा संनिविश्य
शशास गां निखिलां सागरांतां । एवंगुणः समभवत्स राजा यस्य क्रतौ तत्सुवर्णं प्रभूतं । तत्त्वं समादाय नरेंद्र वि
त्तं यजस्व देवान् तर्पयानो विधानैः । वैशंपायनः । ततो राजा पांडवो हृष्टरूपः श्रुत्वा वाक्यं सत्यवत्याः सुतस्य ।
मनश्चक्रे तेन वित्तेन यष्टुं ततो मात्यैर्मंत्रयामास भूयः । इत्याश्वमेधिके संवर्तमरुत्तीयं संपूर्णं ॥ वैशं० ॥
इत्युक्ते नृपतौ तस्मिन् व्यासेनाद्भुतकर्मणा । वासुदेवो महातेजास्ततो वचनमब्रवीत् । तं नृपं दीनमनसं नि
हतज्ञातिबांधवं । उपप्लुतमिवादित्यं सधूममिव पावकं । निर्विण्णमनसं पार्थं ज्ञात्वा वृष्णिकुलोद्वह
आश्वासयन् धर्मसुतं प्रवक्तुमुपचक्रमे । श्रीकृष्ण उवाच ॥ सर्वं जिह्मं मृत्युपदं आर्जवं ब्रह्मणः पदं । एतावा
ज्ञानविषयः किं प्रलापः करिष्यति । नैव ते निष्ठितं कर्म नैव ते शत्रवो जिताः । कामत्रुं शरीरस्थं आत्मनो ना

वबुध्यसे॥ अत्र ते कीर्त्तयिष्यामि यथा प्रज्ञा तथा श्रुतिः॥ इंद्रस्य सह वृत्रेण यथा युद्धमवर्त्तत॥ वृत्रेण पृथि
वी व्याप्ता पुरा किल नराधिप॥ वृष्वा स पृथिवीं व्याप्तां गंधस्य विषये हृते। धराहरणदुर्गंधो विषमः समपद्यत।
शतक्रतुस्तस्य कोपात् गंधस्य विषये हृते। वृत्रस्य स ततः क्रुद्धो घोरं वज्रमवासृजत्॥ स वध्यमानो वज्रेण
पृथिव्यां भूरितेजसा॥ विवेश सहसा ह्यापो जग्राह विषयं ततः॥ व्याप्तासु वारिणि वृत्रेण रसे च विषये हृते॥ शत
क्रतुरभिक्रुद्धस्तत्र वज्रमवासृजत्॥ स वध्यमानो वज्रेण सभृशं भूरितेजसा॥ ज्योतिः समभिदुद्राव जग्राह
विषयं ततः॥ अग्नौ वृत्रेण व्याप्तेन तेजसो विषये हृते। शतक्रतुरभिक्रुद्धस्ततो वज्रमवासृजत्॥ स वध्य
मानो वज्रेण सुभृशं भूरितेजसा॥ विवेश सहसा वायुं जग्राह विषयं ततः॥ वायौ तु वृत्रव्याप्ते तु स्पर्शे वि
षये हृते॥ शतक्रतुरभिक्रुद्धस्ततो वज्रमवासृजत्॥ स वध्यमानो वज्रेण तस्मिन्नमिततेजसा॥ विवे
श सहसाकाशं जग्राह विषयं ततः॥ आकाशे वृत्रव्याप्ते तु शब्दे च विषये हृते॥ शतक्रतुरभिक्रुद्धस्तत्र वज्र
मवासृजत्॥ स वध्यमानो वज्रेण तस्मिन्नमिततेजसा॥ विवेश सहसा शक्रं जग्राह विषयेषु वा॥ तस्य वृत्रगृ
हीतस्य मोहः समभवन्महान्॥ रथंतरेण तं तात वसिष्ठः प्रत्यबोधयत्॥ ततो वृत्रं शरीरस्थं जघान पुरुषर्ष
भः॥ इत्याश्वमेधिके पर्वणि॥ वासुदेव उवाच॥ द्विविधो जायते व्याधिः शारीरो मानसस्तथा॥ परस्परं तयोर्जन्म
निबंधे नोपलभ्यते॥ शरीराज्जायते व्याधिः शारीरो नात्र संशयः॥ मानसो जायते व्याधिर्मनस्येव न संश
यः॥ शीतोष्णे चैव वायुश्च गुणा राजन् शरीरजाः॥ तेषां गुणानां साम्यं च तदाहुः स्वस्थलक्षणं॥ तेषामन्यत
मोत्सेके विधानमुपदिश्यते॥ हर्षेण बाध्यते शोको हर्षः शोकेन बाध्यते॥ कश्चिद्दुःखे वर्त्तमानः सुखं संस्मर्त्तु १०

मिछति। कश्चित्सुखे वर्त्तमानो दुःखस्य स्मर्त्तुमिछति। सत्वं न दुःखी दुःखस्य न सुखी सुखस्य वा। स्म
र्त्तुमिछसि कौंतेय दृष्टं हि बलवत्तरं। अथवा ते स्वभावोयं येन पार्थ विकृष्यसे। दृष्ट्वा सभागतां कृष्णामेकव
स्त्रां रजस्वलां। मिषतां पांडवेयानां स तां संस्मर्त्तुमर्हसि। प्रव्राजनं च नगरादजिनैश्च विवासनं। महार
ण्यनिवासस्य न तस्य स्मर्त्तुमर्हसि। जटासुरात्परिक्लेशं चित्रसेनेन चाहवं। सैंधवाश्च परिक्लेशं न तत्सं
स्मर्त्तुमर्हसि। पुनरज्ञातचर्यायां कीचकेन पदावधं। याज्ञसेन्यास्तदा पार्थ न तत्संस्मर्त्तुमर्हसि। यच्चाते द्रोण
भीष्माभ्यां युद्धमासीदरिंदम। मनसैकेन योद्धव्यं तत्ते युद्धमुपस्थितं। तस्मादभ्युपगंतव्यं युद्धाय भरत
र्षभ। परमव्यक्तरूपस्य पारं युक्त्या स्वकर्मभिः। यत्र नास्ति शरैः कार्यं न मित्रैर्न च बंधुभिः। आत्मनैकेन
योद्धव्यं तत्ते युद्धमुपस्थितं। अस्मिन्ननिर्जिते युद्धे कामवस्थां गमिष्यसि। एतज्ज्ञात्वा तु कौंतेय कृतकृत्यो
भविष्यसि। एतां बुद्धिं विनिश्चित्य भूतानामागतिं गतिं। पितृपैतामहे वृत्ते शाधि राज्यं यथोचितं। इत्याश्वमे
धिके पर्वणि। वासुदेव उवाच न बाह्यं द्रव्यमुत्सृज्य सिद्धिर्भवति भारत। शारीरं द्रव्यमुत्सृज्य सिद्धिर्भवति वा न
वा। बाह्यद्रव्यविमुक्तस्य शारीरेषु च गृध्यतः। यो धर्मो यत्सुखं चैव द्विषतामस्तु तत्तथा। द्व्यक्षरस्तु भ
वेन्मृत्युस्त्र्यक्षरं ब्रह्म शाश्वतं। ममेति द्व्यक्षरो मृत्युर्न ममेति च शाश्वतं। ब्रह्ममृत्यू तु तौ राजन्नात्म
न्येव व्यवस्थितौ। अदृश्यमाने भूतानामहिंसां प्रतिपश्यसे। लब्ध्वापि पृथिवीं सर्वां सहस्थावरजंगमां।
ममत्वं यस्य नैव स्यात् किं तया स करिष्यति। अथवा वसतः पार्थ वने वन्यैर्न जीवतः। ममता यस्य वित्तेषु मृ
त्योरास्ये स वर्त्तते। बाह्यांतराणां शत्रूणां स्वभावं पश्य भारत। यो तु पश्यति तद्रूपं बाधते स महाभयात्। कामा

त्मानं न प्रशंसंति लोके न चाकामा काचिदस्ति प्रवृत्तिः। सर्वे कामा मनसो ऽंग प्रसूतास्तान् पंडितः संहरते विचिंत्य।
भूयो भूयो जन्मनो ऽभ्यासयोगात् योगं योगी सारमार्गं विचिंत्य। दानं हि वेदाध्ययनं तपश्च कामेन कर्माणि
च वैदिकानि। व्रतानि यज्ञान्नियमान् ध्यानयोगान् कामेन यो नारभते विदित्वा। यदेवायं कामयते स धर्मो ह्येय
धर्मो नियमस्तस्य मूलं। अत्र गाथाः काम गीताः कीर्तयंति पुराविदः। शृणु संकीर्त्यमानास्ता निखिले
न युधिष्ठिर। नाहं शक्यो ऽनुपायेन हंतुं भूतेन केनचित्। यो मां प्रयतते हंतुं ज्ञात्वा प्रहरणे बलं। तस्य तस्मिन्
प्रहरणे पुनः प्रादुर्भवाम्यहं। यो मां प्रयतते हंतुं यज्ञैर्विविधदक्षिणैः। जंगमेष्विव धर्मात्मा पुनः प्रादुर्भवा
म्यहं। यो मां प्रयतते हंतुं वेदैर्वेदांतसाधनैः। स्थावरेष्विव शांतात्मा तस्य प्रादुर्भवाम्यहं। यो मां प्रयतते हंतुं
धृत्या सत्यपराक्रमः। भावो भवामि तस्याहं स च मां नावबुध्यते। यो मां प्रयतते हंतुं तपसा संशितव्रतः। तत
स्तपसि तस्याथ पुनः प्रादुर्भवाम्यहं। यो मां प्रयतते हंतुं मोक्षमास्थाय पंडितः। तस्य मोक्षरतिस्थस्य नृत्या
मि च हसामि च। अवध्यः सर्वभूतानामहमेकः सनातनः। तस्मात्त्वमपि तं कामं यज्ञैर्विविधदक्षिणैः। धर्मं
कुरु महाराज तत्र ते संभविष्यति। यजस्व वाजिमेधेन विधिवद्दक्षिणावता। अन्यैश्च विविधैर्यज्ञैः समृद्धै
राप्तदक्षिणैः। मा ते व्यथास्तु निहतान् बंधून् वीक्ष्य पुनः पुनः। न शक्यास्ते पुनर्द्रष्टुं ये हतास्मिन् रणाजिरे।
स त्वमिष्ट्वा महायज्ञैः समृद्धैराप्तदक्षिणैः। लोके कीर्तिं परां प्राप्य गतिमग्र्यां गमिष्यसि। इत्याश्वमेधिके पर्वणि॥
वैशंपायन०॥ एवं बहुविधैर्वाक्यैर्मुनिभिस्तैस्तपोधनैः। समाश्वास्यत राजर्षिर्हतबंधुर्युधिष्ठिरः। सो ऽनु ११
नीतो भगवता विष्टरश्रवसा स्वयं द्वैपायनेन कृष्णेन देवस्थानेन चाभिभुः। नारदेनाथ भीमेन नकुलेन

वपार्थिवः। कृष्णया सहदेवेन विजयेन च धीमता। अन्यैश्च पुरुषव्याघ्रैर्ब्राह्मणैः शास्त्रदृष्टिभिः। व्यजह
तुः शोकजं दुःखं संतापं चैव मानसं। अर्चयामास देवांश्च ब्राह्मणांश्च युधिष्ठिरः। कृत्वाथ प्रेतकार्याणि बंधू
नां सतदानपं। अन्वशासत धर्मात्मा पृथिवीं सस्यमालिनीं। प्रशांतश्चापि कौरव्यस्वराज्ये प्राप्य केवलं। व्या
सं च नारदं चैव तांश्चान्यान्नब्रवीन्नृपः। आश्वासितोहं वाग्वृत्तैर्भवद्भिर्मुनिपुंगवाः। न सूक्ष्ममपि मे किं
चित्व्यलीकमिह विद्यते। अर्थश्च सुमहान्प्राप्तो येन यक्ष्यामि देवताः। पुरस्कृत्येह भवतस्तन्मिष्या
महे सुखं। हिमवंतं त्वया गुप्ता गमिष्यामः पितामह। वक्ष्वाश्चर्यो हि देशः सः श्रूयते द्विजसत्तम। तथा भग
वता चित्रं कल्याणं बहु भाषितं। देवर्षिणा नारदेन देवस्थानेन चैव हि। नाभागधेयः पुरुषः कश्चिद्देवं वि
धानु गुरूनालभते व्यसनं प्राप्य सुहृदः साधुसंमतान्। एवमुक्तास्तु ते राज्ञा सर्व एव महर्षयः। अभ्यनु
ज्ञाप्य राजानं तथोक्तो कृष्णफाल्गुनौ। पश्यतामेव सर्वेषां तत्रैवादर्शनं ययुः। ततो धर्मसुतो राजा तत्रैवो
पाविशत्प्रभुः। एवं नातिमहान्कालः स तेषामभ्यवर्तत। कुर्वतां शौचकर्माणि भीष्मस्य निधने तदा।
महादानानि विप्रेभ्यो ददतामौर्ध्वदेहिकं। भीष्मकर्णपुरोगाणां कुरूणां कुरुनंदनः। सहितो धृतराष्ट्रेण सद
दावौर्ध्वदेहिकं। ततो दत्वा बहुविधं विप्रेभ्यः पांडवर्षभः। धृतराष्ट्रं पुरस्कृत्य विवेश गजसाह्वयं। स समाश्वा
पिस्य तरं प्रज्ञाचक्षुषमीश्वरं। अन्वशाद्धर्मात्मा पृथिवीं भ्रातृभिः सह। इत्याश्वमेधिके पर्वणि। जन
मेजय उ०। विजिते पांडवेयैस्तु प्रशांते द्विजोत्तम। राष्ट्रे किं चक्रतुर्वीरौ वासुदेवधनंजयौ। वैशंपायन उ०। विज
क्राते मुदा युक्तौ दिवि देवेश्वराविव। तौ वनेषु विचित्रेषु पर्वतानां च सानुषु। शैलेषु रमणीयेषु पल्वलेषु नदीषु च।

वंक्रम्यमाणो संहृष्टोऽभ्यिनाविवनं दने। इंद्रप्रस्थे महात्मानौ रेमतुः कृष्णपांडवौ। प्रविश्य तां सभां दिव्यां विज
ह्रातेच भारत। तत्र युद्धकथाश्चित्राः परिक्लेशांश्च तारेतौ। पार्थिवा। कथयामथ योगेन कथयामासतुस्तदा। ऋषी
णां देवतानां च वंशांस्तावाहतुस्तदा। प्रीयमाणौ महात्मानौ पुराणावृषिसत्तमौ। मधुरास्तु कथाश्चित्रार्थपदनि
श्चयां। निश्चयज्ञः स पार्थाय कथयामास केशवः। पुत्रशोकात्तिसंतप्तं ज्ञातीनां च सहस्रशः। कथाभिः शमयामास
पार्थं शौरिरुदारधीः। सतमाश्वास्य विधिवद्विधानज्ञो महाकेशवः। अपहत्यात्मनो भारं विश्रश्राम्यत सात्व
तः। ततः कथांते गोविंदो गुडाकेशमुवाच ह। सांत्वयन् श्लक्ष्णया वाचा हेतुयुक्तमिदं वचः। श्रीवासुदेव उ०॥
विजितेयं धरा कृत्स्ना सव्यसाचिन् परंतप। त्वद्बाहुबलमाश्रित्य धर्मराजसुतेन वै। असपत्नो महीं भुंक्ते
धर्मराजो युधिष्ठिरः। भीमसेनप्रभावेन यमयोश्च नरोत्तम। धर्मेण राजन् धर्मज्ञ प्राप्तं राज्यमकंटकं। ध
र्मेण निहतः संख्ये स च राजा सुयोधनः। अधर्मरुचयो लुब्धाः सदा चाप्रियवादिनः। धार्त्तराष्ट्रा दुरात्मानः
सानुबंधा निपातिताः। प्रशांतामखिलां पार्थ पृथिवीं पृथिवीपतिः। भुंक्ते धर्मसुतो राजा त्वया गुप्तः
कुरूद्वह। रमे चाहं त्वया सार्द्धं अरण्येष्वपि पांडव। किमु यत्र जनोयं वै पृथा चामित्रकर्षण। यत्र धर्मसु
तो राजा यत्र भीमो महाबलः। यत्र माद्रवतीपुत्रौ रतिस्तत्र परा मम। तथैव स्वर्गकल्पेषु सभोद्देशेषु
भारत। रमणीयेषु पुण्येषु सहितस्य त्वयानघ। कालो महांस्त्वतीतो मे शूरपुत्रमपश्यतः। बलदेवं च
कौरव्य तथान्यान् वृष्णिपुंगवान्। सोहं गंतुमभीप्सामि पुरीं द्वारवतीं प्रति। रोचतां गमनं मह्यं तथापि
भरतर्षभ। तात उक्तो बहुविधं राजा तत्र युधिष्ठिरः। सह भीष्मेण संयुक्तो रस्मात्तिः शोककारिते। शिष्टेयु १२

धिष्ठिरेस्मात्तिः प्रशास्तोल्पसत्तमः। देवव्रतवत्सम्यक्कुमहा तं सुमहात्मना। धर्मपुत्रे हि धर्मज्ञे कृतज्ञे सत्य
वादिनि। सत्ये धर्मे मतिश्चाद्या स्थितिश्च सततं स्थिता। तन्मत्वा तं प्रहृतात्मानं यदि वै रोचतेर्जुन। तस्माद्गमनसंयु
क्तं वचो ब्रूहि जनाधिपं। न हि तस्याप्रियं कुर्यां प्राणत्यागेप्युपस्थिते। कुतो गंतुं महाबाहो पुरीं द्वारवतीं प्रति।
सर्वं त्विदमहं पार्थ त्वत्प्रीतिहितकाम्यया। ब्रवीमि सत्यं कौरव्य न मिथ्यैतत्कथंचन। प्रयोजनं ते निर्वृत्तं इह त्वा
सेऽममार्जुन। धार्त्तराष्ट्रो हतो राजा सबलः सपदानुगः। पृथिवी च वशे तात धर्मपुत्रस्य धीमतः। स्थिता समुद्र
वसना सशैलवनकानना। चिता रत्नैर्बहुविधैः कुरुराजस्य पांडव। धर्मेण राजन्धर्मज्ञ पाति सर्वां वसुंधरां।
उपास्यमानो बहुभिः सिद्धैश्चापि महात्मभिः। स्तूयमानश्च सततं धर्मित्तिर्भरतर्षभ। तन्मया सह गत्वा
द्य राजानं कुरुवर्द्धनं। तं दृष्ट्वा कुरुशार्दूल गमनं द्वारकां प्रति। इदं शरीरं वसु यच्च मे गृहे निवेदितं पार्थ सदा
युधिष्ठिरे। प्रियश्च मान्यश्च हि मे युधिष्ठिरः सदा कुरूणामधिपो महामतिः। प्रयोजनं चापि निवासकार
णे न विद्यते मे त्वदृते महाभुज। स्थिता हि पृथ्वी तव पार्थ शासने गुरोः सुवृत्तस्य इतीदं मुक्तेन युधिष्ठिरस्य। इतीद
मुक्तः स तदा महात्मना जनार्दनेनामितविक्रमोर्जुनः। तथेति कृच्छ्रादिव वाक्यमीरयन् जनार्दनं संप्रतिपूज्य
पार्थिवः। इत्याश्वमे[illegible]के पर्वणि। जनमेजय उवाच। सभायां वसतोस्तस्यां निहत्यारीन्महात्मनोः। केशवार्जुन
योः का नु कथा समभवद्द्विज। वैशं। कृष्णेन सहितः पार्थः स्वराज्यं प्राप्य केवलं। तस्यां सभायां रम्यायां विज
हार मुदा युतः। तत्र कंचित्स तो देशं स्वर्गोद्देशसमं नृप। यदृच्छया तौ मुदितौ जग्मतुः स्वजनावृतौ। ततः प्रतीतः
कृष्णेन सहितः पांडवोर्जुनः। निरीक्ष्य तां सभां रम्यामिदं वचनमब्रवीत्। विदितं ते महाबाहो संग्रामे प्रत्युप

स्थिते। माहात्म्यं देवकीपुत्र तच्च ते रूपमैश्वरं। यत्तु तद्भवता प्रोक्तं पुरा केशव सौहृदात्। तत्सर्वं पुंडरीकाक्ष
नष्टं मे नष्टचेतसः। मम कौतूहलं त्वस्ति तेष्वर्थेषु पुनः पुनः। भवांश्च द्वारकां गंता नचिरादिव माधव॥ वैशं॰॥
एवमुक्तस्ततः कृष्णः फाल्गुनं प्रत्यभाषत। परिष्वज्य महातेजा वचनं वदतां वरः। वासुदेव॰॥ श्रावितस्त्वं
मया गुह्यं ज्ञापितश्च सनातनं। धर्मं स्वरूपिणं पार्थ सर्वलोकांश्च शाश्वतान्। अबुद्ध्या नाग्रहीर्यस्तु तन्मे सु
महदप्रियं। न च पार्थ पुनस्तस्य स्मृतिर्मे संभविष्यति। नूनमश्रद्दधानोसि दुर्मेधाश्चासि पांडव। स हि
धर्मः सुपर्याप्तो ब्रह्मणः पदवेदने। न शक्यं तन्मया भूयस्तथा वक्तुं विशेषतः। परं हि ब्रह्म कथितं योगयु
क्तेन तन्मया। इतिहासं प्रवक्ष्यामि तस्मिन्नर्थे पुरातनं। यथा तां बुद्धिमास्थाय गतिमग्र्यां गमिष्यसि। शृणु
धर्मभृतां श्रेष्ठ गदतः सर्वमेव मे। आगच्छद्ब्राह्मणः कश्चित्स्वर्गलोकादरिंदम। ब्रह्मलोकाच्च दुर्धर्षः सो
स्माभिः पूजितोभवत्। अस्माभिः परिपृष्टश्च यदाह भरतर्षभ। दिव्येन विधिना पार्थ तच्छृणुष्वाविचा
रयन्॥ ब्राह्मण॰॥ मोक्षधर्मं समाश्रित्य यन्मां कृष्णानुपृच्छसि। भूतानामनुकंपार्थं मोहच्छेदनं विभो।
तत्तेहं संप्रवक्ष्यामि यथावन्मधुसूदन। शृणुष्वावहितो भूत्वा गदतो मम माधव। कश्चिद्विप्रस्तपोयुक्तः
काश्यपो धर्मवित्तमः। आससाद द्विजं कंचिद्धर्माणामागतागमं। गतागते सुबहुशो ज्ञानविज्ञानपा
रगं। लोकतत्वार्थकुशलं ज्ञातारं सुखदुःखयोः। जातीमरणतत्वज्ञं कोविदं पुण्यपापयोः। द्रष्टार
मुच्चनीचानां कर्मभिर्देहिनां गतिं। चरंतं मुक्तवत्सिद्धं प्रशांतं संयतेंद्रियं। दीप्यमानं श्रिया ब्राह्म्या क्रममा
णं च सर्वशः। अंतर्धानगतिज्ञं च श्रुत्वा तत्वेन काश्यपः। तथैवांतर्हितैः सिद्धैर्यांतं चक्रधरैः सहायद १२

थ्यावगछंतंअसक्तंपवनंयथा।तंसमासाद्यमेधावीसतदाद्विजसत्तमः।चरणौधर्मकामःसतपस्वीसुसमाहितःप्रति
पेदेयथान्यायंभक्त्यापरमयायुतः।विस्मितश्चाद्भुतंदृष्ट्वाकाश्यपस्तंद्विजोत्तमं।परिचारेणमहतागुरुंवैद्य
ह्यतोषयत्।प्रीतात्माचोपशांतश्चश्रुतचारित्रसंयुतः।भावेनातोषयच्चैनंगुरुवृत्त्यापरंतप।तस्मैतुष्टःस
शिष्यायप्रसन्नोवाक्यमब्रवीत्।सिद्धिंपरामभिप्रेक्ष्यशृणुयत्तज्जनार्द्दन।विविधैःकर्मभिस्तात पुण्ययोगै
श्चकेवलैः।गछंतीहगतिंमर्त्यादेवलोकेचसंस्थितिं।नक्वचित्सुखमत्यंतंनक्वचिच्छाश्वतीगतिः।
स्थानाच्चमहतोभ्रंशोदुःखलब्धात्पुनःपुनः।अशुभागतयःप्राप्ताःकष्टामेपापसेवनात्।काममन्युपरी
तेनतृष्णयामोहितेनच।पुनःपुनश्चमरणंजन्मचैवपुनःपुनः।आहाराविविधाभुक्ताःपीतानानाविधा
स्तनाः।मातरोविविधादृष्टाःपितरश्चपृथग्विधाः।सुखानिचविचित्राणिदुःखानिचमयानघ।प्रियैर्वि
वासोबहुशःसंवासश्चाप्रियैःसह।धननाशश्चसंप्राप्तोलब्ध्वादुःखेनतद्धनं।अवमानाःसुकष्टाश्च
परतःस्वजनात्तथा।शारीरामानसाश्चापिवेदनाभृशदारुणाः।प्राप्ताविमाननाश्चोग्रावधबंधाश्चदारुणाः।
पतनंनिरयेचैवयातनाश्चयमक्षये।जरारोगाश्चसततंव्यसनानिचभूरिशः।लोकेस्मिन्ननुभूतानिद्वं
द्वजानिभृशंमया।ततःकदाचिन्निर्वेदान्निकारान्निकृतेनच।लोकतंत्रंपरित्यक्तंदुःखार्त्तेनभृशंमया।
ततःसिद्धिरियंप्राप्ताप्रसादादात्मनोमया।नाहंपुनरिहागंतालोकानालोकयाम्यहं।आसिद्धेराप्रजास
र्गादात्मनोमेगतिःशुभा।उपलब्धाद्विजश्रेष्ठतथेयंसिद्धिरुत्तमा।इतःपरंगमिष्यामिततःपरतरंपुनः।
ब्रह्मणःपदमव्यग्रंमातेभूदत्रसंशयः।नाहंपुनरिहागंतामर्त्यलोकंपरंतप।प्रीतोस्मितेमहाप्राज्ञब्रू

हिकिंकरवाणिति।यदीप्सुरुपपन्नस्त्वंतस्यकालोऽयमागतः।अविरात्तुगमिष्यामियेनाहंत्वामचूचुदमु।
भृशंप्रीतोस्मिभवतश्चारित्रेणविचक्षणः।परिपृच्छयावद्भवतोभाषेयंतवयदीप्सितं।बहुमन्येचतेबुद्धिं
भृशंसंपूजयामिच।येनाहंभवताबुद्धोमेधावीह्यसिकाश्यप।इत्याश्वमेधिके॥वासुदेव०॥ततस्तस्योपसं
गृह्यपादौप्रश्नान्सुदुर्लभान्।पप्रच्छतांश्चसर्वान्सप्राहधर्मभृतांवरः।काश्यपउ०।कथंशरीरंच्यवते
कथंचैवोपपद्यते।कथंकष्टाच्चसंसारात्संसरन्प्रतिमुच्यते।आत्मानंवाकथंयुक्त्वातच्छरीरंविमुंच
ति।शरीरतःसुनिर्मुक्तःकथमन्यत्प्रपद्यते।कथंशुभाशुभेचायंकर्मणीस्वकृतेनरः।उपभुंक्तेक्ववाक
र्मविदेहस्योपतिष्ठते।ब्राह्मणउवाच।एवंप्रचोदितःसिद्धःप्रश्नांस्तान्प्रत्यभाषत।आनुपूर्व्येणवा
र्ष्णेययथातन्मेवचःशृणु।सिद्धउ०।आयुःकृत्यकराणीहयानिकर्माणिसेवते।शरीरग्रहणेन्यस्मिंस्ते
षुक्षीणेषुसर्वशः।आयुःक्षयपरीतात्माविपरीतानिसेवते।बुद्धिर्व्यावर्ततेचास्यविनाशेप्रत्युपस्थिते।स
त्वंबलंचकालंचविदित्वामनःप्रियं।अतिवेलमुपाश्नातिस्वविरुद्धान्यनात्मवान्।यदायमतिक
ष्टानिसर्वाण्युपनिषेवते।अत्यर्थमपिवाभुंक्तेनवाभुंक्तेकदाचन।दुष्टान्नंविषमान्नंचसोन्येनच
विरोधिचागुरुचाप्यमितंभुंक्तेनातिजीर्णेपिवापुनः।व्यायाममतिमात्रंचविहारंचोपसेवते।सततंक
र्मलोभाद्वाप्राप्तंवेगविधारणं।रसातिरिक्तमन्नंवादिवास्वप्नंनिषेवते।अपथ्यान्नंगतेकालेस्वयंदोषा
नुदीरयन्।सदोषकोपनाद्रोगंलभतेमरणांतिकं।अथचोद्बंधनादीनिपरीतात्माव्यवस्यति।तस्यतैः
कारणैर्जंतोःशरीरंच्यवतेतदा।जीवितंप्रोच्यमानंतद्यथावदुपधारय।ऊष्माप्रकुपितःकायेतीव्रवायुस १४

मीरितः।शरीरमथपर्येत्यसर्वान्प्राणान्रुणद्धिवै।अत्यर्थंबलवानूष्माशरीरेपरिकोपितः।भिनत्तिजीव
स्थानानितानिमर्माणिविद्धिच।ततःसवेदनःसद्योजीवःप्रच्यवतेक्षणात्।शरीरंत्यजतेजंतुश्छिद्यमानेषुमर्म
सुवेदनार्त्तिपरीतात्मा।तद्विद्धिद्विजसत्तम।जातीमरणसंविग्नाःसततंसर्वजंतवः।दृश्यंतेसंत्यजंतश्च
शरीराणिद्विजर्षभ।गर्भसंक्रमणेचापिकर्मणामतिसर्पणे।तादृशीमेवलभतेवेदनांमानवःपुनः।भिन्नसं
धिरथक्लेदंअद्भिःसलभतेनरः।यथापंचसुभूतेषुसंश्रितत्वंनिगच्छति।शैत्यात्प्रकुपितःकायेतीव्रवा
युसमीरितः।यःसपंचसुभूतेषुप्राणापानेव्यवस्थितः।सगच्छत्यूर्ध्वगोवायुःकृच्छ्रान्मुक्त्वाशरीरिणं।
शरीरंचजहात्येवनिरुच्छ्वासश्चदृश्यते।निरूष्मासनिरुच्छ्वासोनिःश्रीकोगतचेतनः।ब्रह्मणासंपरित्यक्तो
मृतइत्युच्यतेनरः।स्रोतोभिर्यैर्विजानातिइंद्रियार्थान्शरीरभृत्।तैरेवनविजानातिसततसाहारसंभवं
त्।तत्रैवकुरुतेकायेयःसजीवःसनातनः।तेषांयद्यद्भवेद्युक्तंसन्निपातेक्वचित्क्वचित्।तत्तन्मर्मविजा
नीहिशास्त्रदृष्टंहितत्तथा।तेषुमर्मसुभिन्नेषुततोवायुरुदीरयन्।आविश्यहृदयंजंतोःसत्वंचाशु
रुणद्धिवै।ततःसचेतनोजंतुर्नाभिजानातिकिंचन।तमसासंवृतज्ञानःसंवृतेष्वथमर्मसु।सजीवोनिरधि
ष्ठानश्च्याव्यतेमातरिश्वना।ततःसतंमहोच्छ्वासंभृशमुच्छ्वस्यदारुणं।निःक्रामन्कंपयत्याशुतच्छरीर
मचेतनं।सजीवःप्रच्युतःकायात्कर्मभिःस्वैःसमावृतः।अंकितःस्वैःशुभैःपुण्यैःपापैर्वाप्युपपद्य
ते।ब्राह्मणाज्ञानसंपन्नायथावच्छ्रुतनिश्चयाः।इतरंकृतपुण्यंवातंविजानंतिलक्षणैः।यथांधकारेख
द्योतंलीयमानंततस्ततः।चक्षुष्मंतःप्रपश्यंतितथातंज्ञानचक्षुषः।पश्यंत्येवंविधंसिद्धाःजीवंदिव्येन

वहुधा च्यवंतं जायमानं च योनिं चैव प्रवेशितं। तस्य स्थानानि दृष्टानि त्रिविधानीह शास्त्रतः। कर्मभूमिरियं
भूमिर्यत्र तिष्ठंति जंतवः। इतः शुभाशुभं कृत्वा लभंते चैव योगिनः। इहैवोच्चावचान्भोगान्प्राप्नुवंति स्वकर्म
भिः। इहै[illegible]शुभकर्मा तु कर्मभिर्निरयं गतः। अवाक् स निरये पापो मानवः पच्यते भृशं। तस्मात्सुदुर्लभो मो
स[illegible]त्स्यो ततः। ऊर्ध्वं तु जंतवो गत्वा येषु स्थाने व्यवस्थिताः। कीर्त्यमानानि तानीह तत्त्वतः संनिबो
ध मे। तच्छ्रुत्वा नैष्ठिकीं बुद्धिं बुध्येथाः कर्मनिश्चयात्। तारारूपाणि सर्वाणि तथैतच्चंद्रमंडलं। यत्र विभ्रा
जते लोके स्वभासा सूर्यमंडलं। स्थानान्येतानि जानीहि नराणां पुण्यकर्मणां। कर्मक्षयाच्च ते सर्वे च्यवंते वै पु
नः पुनः। तत्रापि च विशेषोऽस्ति दिवि नीचोच्चमध्यमाः। न तत्राप्यस्ति संतोषो दृष्ट्वा दीप्ततरां श्रियं। एवं ता गत
यः सर्वाः पृथक्कृते समुदीरिताः। उपपत्तिं तु गर्भस्य वक्ष्याम्यहमतः परं। यथावत्तां निगदतः शृणुष्वावहि
तो द्विज। इत्याश्वमेधिके पर्वणि अनुगीतायां। ब्राह्मण० शुभानामशुभानां च नेह नाशोऽस्ति कर्मणां। प्रा
प्य प्राप्य तु पच्यंते क्षेत्रं क्षेत्रं तथा तथा। यथा प्रसूयमानस्तु फली दद्यात्फलं बहु। तथा स्याद्विपुलं पुण्यं शु
द्धेन मनसा कृतं। पापं त्वपि तथैवं स्यात्पापेन मनसा कृतं। पुरोधाय मनो हीह कर्मण्यात्मा प्रवर्तते। यथा क
र्मसमादिष्टं काममन्युसमीरितः। नरो गर्भं प्रविशति तच्चापि शृणु चोत्तरं। शुक्रं शोणितसंसृष्टं स्त्रिया
गर्भाशये स्थितं। क्षेत्रं कर्मजमाप्नोति शुभं वा यदि वाशुभं। सौक्ष्म्यादव्यक्तभावाच्च न स क्वचन सज्जते। संप्रा
प्य ब्रह्मणः कायं तस्मात्तद्ब्रह्म शाश्वतं। तद्बीजं सर्वभूतानां तेन जीवंति जंतवः। स जीवः सर्वगात्राणि गर्भ
स्याविश्य भागशः। दधाति चेतसा सद्यः प्राणस्थाने व्यवस्थितः। ततः स्पंदयतेंगानि स गर्भश्चेतनान्वितः। यथा १५

लोहस्य विस्यंदोनि बिद्धो बिंबविग्रहं। उपैतीति तद्वज्ज्ञानीहि गर्भे जीवप्रवेशनं। लोहपिंडं यथा वह्निः प्रविश्यह्य
त्तितापयेत्। तथा त्वमपि जानीहि गर्भे जीवप्रवेशनं। यथा च दीपः शरणं दीप्यमानः प्रकाशयेत्। एवमेव शरी
राणि प्रकाशयति चेतना। यद्यच्च कुरुते कर्म शुभं वा यदि वाशुभं। पूर्वदेहकृतं सर्वमवश्यमुपपद्यते। ततस्त
त्क्षीयते चैव पुनश्चान्यत्प्रदीयते। यावद्वै मोक्षयोगस्थं धर्मं नैवावबुध्यते। तत्र धर्मं प्रवक्ष्यामि सुखी भव
ति येन वै। आवर्तमानो जातीषु अन्योन्यस्येति सत्तम। दानं तपो ब्रह्मचर्यं यथोक्तं व्रतधारणं। दमः प्रशांतता
चैव सर्वभूतानुकंपनं। संयमं चानृशंस्यं च परस्वादानवर्जनं। व्यलीकानामकरणं भूतानां यत्र चावनौ भुवि।
मातापित्रोश्च शुश्रूषा देवतातिथिपूजनं। गुरूणां च घृणा नित्यं दाक्ष्यं शौचं प्रियसंयमः। प्रवर्तनं शुभानां च तत्सतां
वृत्तमुच्यते। ततो धर्मः प्रभवति यः प्रजाः पाति शाश्वतीः। एवं सत्सु सदा पश्येत् तत्राप्येवं ध्रुवा स्थितिः। आचा
रो धर्ममाचष्टे यस्मिन् संतो व्यवस्थिताः। तेषु तद्धर्मनिर्दिष्टं यत्र धर्मः सनातनः। यस्तं समभिपद्येत न स दु
र्गतिमाप्नुयात्। अतो नियम्यते लोको मोक्षार्थी कर्मवर्त्मसु। यस्तु योगी च मुक्तश्च स एतेभ्यो विशिष्यते।
वर्तमानस्य धर्मेण पुरुषस्य यथा तथा। संसारतारणं ह्यस्य कालेन महता भवेत्। एवं पूर्वकृतं कर्म सर्वो
जंतुर्निषेवते। सर्वं तत्कारणं येन निःकृतोयमिहागतः। शरीरग्रहणं चास्य केन पूर्वं प्रकल्पितं। इत्येवं
संशये लोके तत्प्रवक्ष्याम्यतः परं। शरीरमात्मनः कृत्वा सर्वलोकपितामहः। त्रैलोक्यमसृजद्ब्रह्मा कृत्स्नं
स्थावरजंगमं। ततः प्रधानमसृजत् चेतना सा शरीरिणां। यया सर्वमिदं व्याप्तं यां लोके परमां विदुः। इह
तत्क्षरमित्युक्तं परं त्वमृतमक्षरं। त्रयाणां मिथुनं सर्वमेकैकस्य पृथक् पृथक्। असृजत्सर्वभूतानि पूर्वसृ
ष्टा प्रजापतिः। स्थावराणां च बीजानि इत्येषा वैदिकी श्रुतिः। तस्य कालपरीमाणमकरोत्स प्रजापतिः।

स्थावराणांचबीजानिश्चयेषावेदिकीप्रवृत्तिः।तस्यकालपरीमाणमकरोत्सप्रजापतिः।भूतेषुपरिविष्टांश्चपुन
रावृत्तिमेवच।यथात्रकश्चिन्मेधावीदृष्ट्वात्मापूर्वजन्मनि।यत्प्रवक्ष्यामितत्सर्वंयथावदुपपद्यते।सुख
दुःखेसदातस्यचानित्येयःप्रपश्यति।कायंचामेध्यसंघातंविनाशंकर्मसंज्ञितं।यच्चकिंचित्सुखंपूर्वंतत्
च्चदुःखमितिस्मरन्।संसारसागरंघोरंतरिष्यतिसुदुस्तरं।जातीमरणदुःखैश्चसमाविष्टःप्रधानवित्।
चेतनावान्सचैतन्यंसमंभूतेषुपश्यति।निर्विद्यतेततःकृत्स्नंमार्गमाणःपरंपदं।तस्योपदेशंवक्ष्यामियथातथ्ये
नसत्तम।शाश्वतस्याव्ययस्याथपदस्यज्ञानमुत्तमं।प्रोच्यमानंमयाविप्रनिबोधेममशेषतः॥इत्याश्वमेधि
केऽनुगीतायां॥ब्राह्मणउ०॥यःस्यादेकायनेलीनस्तूष्णींकिंचिदचिंतयन्।पूर्वंपूर्वंपरित्यज्यसनिरालं
बनोभवेत्।सर्वमित्रःसर्वसहःशमरक्तोजितेंद्रियः।व्यपेतभयमन्युश्चकामहामुच्यतेनरः।आत्मव
त्सर्वभूतेषुयश्चरेन्नियतःशुचिः।अमानीनिरभीमानःसर्वतोमुक्तएवसः।जीवितेमरणेचैवसुखदुःखे
तथैवच।लाभालाभेप्रियद्वेष्येयःसमःसचमुच्यते।नकस्यचित्स्पृहयतेनावजानातिकंचन।निर्द्वं
द्वोवीतरागात्मासर्वदामुक्तएवसः।नमित्रोथनिकेतश्चननिबंधश्चयःक्वचित्।त्यक्तधर्मार्थकामश्चनि
राकांक्षीसमुच्यते।नैवधर्मीनचाधर्मीपूर्वोपचितिहाचयः।धातुक्षयप्रशांतेश्चनिर्द्वंद्वःसविमुच्यते।अक
र्माचाविकांक्षश्चपश्येज्जगदशाश्वतं।अश्वत्थसदृशंनित्यंजन्मसंसारमोहितं।वैराग्यबुद्धिःसततंआत्म
दोषव्यपेक्षकः।आत्मबंधविनिर्मोक्षंसकरोत्यचिरादिव।अगंधरसमस्पर्शमशब्दमपरिग्रहं।अरूपम
नभिज्ञेयंदृष्ट्वात्मानंविमुच्यते।पंचभूतगुणैर्हीनंअमूर्तिमदलेपकं।अगुणंगुणभोक्तारंयःपश्यति १८

सपश्यति।विहायसर्वसंकल्पान्बुद्ध्याशारीरमानसान्शनैर्निर्वाणमाप्नोतिनिरिंधनमिवानिलः।विमुक्तः
सर्वसंस्कारैस्ततोब्रह्मसनातनं।परमाप्नोतिशांतोवैअचलंदिव्यमक्षरं।अतःपरंप्रवक्ष्यामियोगशास्त्रमनुत्त
मं।यंज्ञात्वासिद्धमात्मानंलोकेपश्यंतियोगिनः।तस्योपदेशंवक्ष्यामियथावत्तंनिबोधमे।यैर्द्वारैश्चारयंनित्यं
पश्यत्यात्मानमात्मनि।इंद्रियाण्युपसंहृत्यमनोहृदिविधारयन्।तीव्रंतप्त्वातपःपूर्वंततोयोगमुपक्रमेत्।
तपस्वीत्यक्तसंकल्पोदंभाहंकारवर्जितः।मनीषीमनसाविप्रपश्यत्यात्मानमात्मनि।सचेच्छक्नोत्ययंसा
धुयोक्तुमात्मानमात्मना।ततएकांतशीलःसपश्यत्यात्मानमात्मनि।संयतःसततंयुक्तआत्मवान्वि
जितेंद्रियः।तथायमात्मनात्मानंसाधुयुक्तःसपश्यति।यथाहिपुरुषःस्वप्नेदृष्ट्वापश्यत्यसाविति।
तथारूपमहात्मानंसाधुयुक्तःप्रपश्यति।इषीकावायथामुंजात्कश्चिन्निर्जित्यदर्शयेत्।योगीनिष्क
ष्टमात्मानंतथासंपश्यतेतनो।मुंजंशरीरंतस्याहुरिषीकांचात्मनिश्रितां।एतन्निदर्शनंप्रोक्तंयोगवि
द्भिरनुत्तमं।यदातुयुक्तमात्मानंसम्यक्पश्यतिदेहभृत्।तदास्यनेषतेकश्चित्त्रैलोक्यस्यापियःप्रभुः।अ
न्याअन्याश्चतनूर्यथेष्टंप्रतिपद्यते।निर्वृत्यजरामृत्यूनहृष्यतिनशोचति।देवानामपिदेवत्वंयुक्तः
कारयतेवशी।ब्रह्मचाव्ययमाप्नोतिहित्वादेहमशाश्वतं।विनश्यत्स्वपिलोकेषुनभयंतस्यजायते।क्लि
श्यमानेषुभूतेषुसनक्लिश्यतिकर्हिचित्।दुःखशोकमयैर्घोरैःसंगस्नेहसमुद्भवैः।नचाल्यतेहियुक्ता
त्मानिस्पृहःशांतमानसः।नैनंशस्त्राणिविंदंतिनमृत्युश्चास्यविद्यते।नातःसुखतरंकिंचित्लोकेक्व
चनविद्यते।यदेवमुक्तःसंसारात्स्तवत्यात्मनियोगतः।तदेवनस्पृहयतेसाक्षादपिशतक्रतोः।निर्वेदस्त

नकर्त्तव्योयुंजानेन कथंचनायोगमेकांतशीलस्तुयथायुंजीततच्छृणु॥ दृष्टपूर्वांदिशंज्ञात्वायस्मिन्संनि
विशेत्पुरे। पुरस्याभ्यंतरेतस्यमनश्चार्यंनबाह्यतः॥ पुरस्याभ्यंतरेतिष्ठन्यस्मिन्नावसथेवसेत्। तस्मिन्नाव
सथेधार्यंसबाह्याभ्यंतरंमनः॥ प्रचिंत्यावसथंकृत्स्नंयस्मिन्कायेवतिष्ठते। तस्मिन्कायेमनोधार्यंनकथंचन
बाह्यतः॥ संनियम्येंद्रियग्रामंनिर्घोषेनिर्जनेमुने। कायमभ्यंतरंकृत्स्नमेकाग्रःपरिचिंतयेत्॥ दंतांस्ता
लुचजिह्वांचगलंग्रीवांतथैवच। हृदयंचिंतयेच्चैवतथाहृदयबंधनं॥ इत्युक्तःसतदाशिष्योमेधावी
मधुसूदन। अपृच्छत्पुनरेवाथमोक्षधर्मंसुदुर्वचं॥ भुक्तंभुक्तंकथमिदमन्नंकोष्ठेविपच्यते। कथं
रसत्वंव्रजतिशोणितंजायतेकथं। कथंमांसंचमेदश्चस्नाय्वस्थीनिचबोवति। कथमेतानिसर्वाणि
शरीराणिशरीरिणां। वर्द्धंतेवर्द्धमानस्यवर्द्धतेचकथंबलं। निरोधानांनिःक्रमणंमलानांचपृथक्पृ
थक्॥ कुतोवायंनिश्वसितिउच्छ्वसित्यथवापुनः। कंचदेशमधिष्ठायतिष्ठत्यात्मायमात्मनि। जीवःकथं
वहतिचेष्टमानःकलेवरं। किंवर्णंकीदृशंचैवविनाशयतिवेमनः॥ यथातथ्येनभगवन्वक्तुमर्हसिमे
नघ। इतिसंपरिपृष्टोहंतेनविप्रेणमाधव। प्रत्यब्रवीन्महाबाहोयथाश्रुतमरिंदम। यथास्वकोष्ठेप्रक्षि
प्यकोष्ठंभांडमनाभवेत्। तथास्वकायेसंक्षिप्यमनोद्वारैरनिश्चलैः॥ आत्मानंतत्रमार्गेतप्रमादंपरि
वर्जयेत्॥ एवंसततमुद्युक्तःप्रीतात्मानचिरादिव। आसादयतितद्ब्रह्मयद्दृष्ट्वास्यात्प्रधानवित्॥ नत्वसौच
क्षुषाग्राह्योनचसर्वैरपींद्रियैः। मनसैवप्रदीपेनमहानात्मनिदृश्यते। सर्वतःपाणिपादोसौसर्वतो
क्षिशिरोमुखं। सर्वतःश्रुतिमाँल्लोकेसर्वत्रावृत्यतिष्ठति। जीवोनिःक्रांतमात्मानंशरीरात्संप्रपश्यति॥ ७

तमुत्सृज्य देहं स्वं धारयन्ब्रह्म केवलं। आत्मानमालोकयति मनसा वपिबन्निव। तदेवमाश्रयं कृत्वा मोक्षं
याति ततो मयि। इदं सर्वरहस्यं ते मयोक्तं द्विजसत्तम। आपृच्छे साधयिष्यामि गच्छ शिष्य यथासुखं। इत्युक्तः
स यदा कृष्ण तदा शिष्यो महातपाः। आगच्छत यदाकामं ब्राह्मणश्छिन्नसंशयः। वासुदेव उवाच। इत्युक्त्वा
स तदा वाक्यं मां पार्थ द्विजपुंगवः। मोक्षधर्माश्रितः सम्यक् तत्रैवांतरधीयत। कच्चिदेतत्त्वया पार्थ श्रुतमेकाग्र
चेतसा। तदापि हि रथस्थस्त्वं श्रुतवानेतदेव हि। नैतत्पार्थ सुविज्ञेयं व्यामिश्रेणेति मे मतिः। नरेणाकृतसंज्ञे
न कृतदग्धेनाकृतात्मना। सुरहस्यमिदं प्रोक्तं देवानां भरतर्षभ। कच्चिन्नेदं श्रुतं पार्थ मनुष्येण कर्हिचित्।
नह्येतत्श्रोतुमर्होन्यो मनुष्यस्त्वामृतेनघ। नह्येतत्सुविज्ञेयं व्यामिश्रेणांतरात्मना। क्रियावद्भिर्हि कौं
तेय देवलोकः समावृतः। न चैतदिष्टं देवानां मर्त्यरूपनिवर्त्तनं। परा हि सा गतिः पार्थ यत्तद्ब्रह्म सनात
नं। यत्रामृतत्वं प्राप्नोति त्यक्त्वा दुःखं सदा सुखी। एवं हि धर्ममास्थाय येपि स्युः पापयोनयः। स्त्रियो वैश्या
स्तथा शूद्रास्तेपि यांति परां गतिं। किं पुनर्ब्राह्मणाः पुण्याः क्षत्रिया वा बहुश्रुताः। स्वधर्मरतयो नित्यं ब्रह्म
लोकपरायणाः। हेतुमच्चैतदुद्दिष्टं उपायश्चास्य साधने। सिद्धेः फलं च मोक्षश्च दुःखस्य च विनिर्णयः। अ
तः परं सुखं त्वन्यत्किं तु स्याद्भरतर्षभ। श्रुतवान्बुद्धिमान्श्रद्दधानश्च पराक्रांतश्च पांडव। यः परित्यजते मर्त्यो
लोकतंत्रमसारवत्। एतैरुपायैः स क्षिप्रं परां गतिमवाप्नुयात्। एतावदेव वक्तव्यं नातो भूयोस्ति किंचन। ष
ण्मासान्नित्ययुक्तस्य पार्थ योगः प्रवर्त्तते। इत्याश्वमेधिके पर्वण्यनुगीतायां॥ श्रीवासुदेव उ। अत्राप्युदाहरं
तीममितिहासं पुरातनं। दंपत्योः पार्थ संवादमभयं नाम नामतः। ब्राह्मणी ब्राह्मणं कंचित्ज्ञानविज्ञानपारगं।

दृष्ट्वाविविक्तेएकमासीनंतत्रभर्तारमिदमब्रवीत्। कंतुलोकंगमिष्यामित्वामहंपतिमाश्रिता। न्यस्तकर्माणमासी
नंकीनाशमविचक्षणं। स्त्रियःपतिकृतांल्लोकानाप्नुवंतीतिनःश्रुतं। त्वामहंपतिमाश्रित्यकांगमिष्यामिवै
गतिं। एवमुक्तःसशांतात्मातामुवाचहसन्निव। सुभगेनाभ्यसूयामिवाक्यस्यास्यतवानघे। ग्राह्यंदृश्यंच
श्रव्यंचयदिदंकर्मविद्यते। एतदेवव्यवस्यंतिकर्मकर्मेतिकर्मिणः। मोहमेवनियच्छंतिकर्मणाज्ञानवर्जिताः।
नैःकर्म्यंनचलोकेस्मिन्मूर्त्तिमद्वापिविद्यते। कर्मणामनसावाचाशुभंवायदिवाशुभं। जन्मादिमूर्त्तिभेदां
तंकर्मभूतेषुवर्त्तते। रक्षोभिर्वध्यमानेषुदृश्यमानेषुकर्मिषु। आत्मस्थमात्मनातेनदृष्टमात्रतमंमया। यत्रत
द्ब्रह्मनिर्द्वंद्वंयत्रसोमःसहाग्निना। व्यवायंकुरुतेनित्यंधीरोभूतानिधारयन्। यत्रब्रह्मादयोयुक्तास्तदक्षर
मुपासते। विद्वांसःसुव्रतायत्रशांतात्मानोजितेंद्रियः। घ्राणेननतदाघ्रेयंनास्वाद्यंचैवजिह्वया। स्पर्शने
नतत्स्पर्शंमनसात्वेवगम्यते। चक्षुषामविषह्यंचयत्किंचित्श्रवणात्परं। अगंधरसमस्पर्शमरूपा
शब्दमव्ययं। यतःप्रवर्त्ततेतत्रयत्रचप्रतितिष्ठति। प्राणापानःसमानश्चव्यानश्चोदानएवच। एतेसर्वे
प्रवर्त्तंतेतत्रैवप्रविशंतिच। समानव्यानयोर्मध्येप्राणापानौविचेरतुः। तस्मिन्सुप्तेप्रलीयेतसमानव्यानए
व। अपानप्राणयोर्मध्येउदानोव्याप्यतिष्ठति। तस्माच्छयानंपुरुषंप्राणापानौनमुंचतः। प्राणानामाय
तत्वेनतमुदानंप्रचक्षते। तस्मात्तपोव्यवस्यंतितद्गतंब्रह्मवादिनः। तेषामन्योन्यभक्षाणांसर्वेषांदेहचारि
णां। अग्निर्वैश्वानरोमध्येसप्तधाविहितांतरा। घ्राणंजिह्वाचचक्षुश्चत्वक्चश्रोत्रंचपंचमं। मनोबुद्धिश्चसप्तै
ताजिह्वावैश्वानरार्चिषः। घ्रेयंपेयंचदृश्यंचस्पृश्यंश्रव्यंतथैवच। मंतव्यमथबोद्धव्यंताःसप्तसमिधोमम। १८

घ्राताभक्षयिताद्रष्टास्प्रष्टाश्रोताचपंचमः।मंताबोद्धाचसप्तैतेभवंतिपरमर्त्विजः।घ्रेयेपेयेचदृश्येचस्पृ
श्येश्रव्यएवच।मंतव्येथचबोद्धव्येसुभगेपश्यसर्वदा।हवींष्यग्निषुहोतारःसप्तधासप्तसप्तसु।सम्यक्प्र
क्षिप्यविद्वांसोजनयंतिस्वयोनिषु।पृथिवीवायुराकाशमापोज्योतिश्चपंचमं।मनोबुद्धिश्चसप्तैतेयोनि
रित्येवशब्दिताः।हविर्भूतागुणाःसर्वेप्रविशंत्यग्निजंमुखं।अंतर्वासमुषित्वाचजायतेस्वासुयोनिषुत
त्रैवचनिरुध्यंतेप्रलयेभूतभावने।ततःसंजायतेगंधस्ततःसंजायतेरसः।ततःसंजायतेरूपंततःस्पर्शोभिजा
यते।ततःसंजायतेशब्दःसंशयस्तत्रजायते।ततःसंजायतेनिष्ठाजन्मैतत्सप्तधाविदुः।अनेनैवप्रकारेण
प्रगृहीतंपुरातनैः।पूर्णाहुतिभिरापूर्णास्तेभिपूर्यंतितेजसा।इत्याश्वमेधिकेपर्वणिब्राह्मणगीतासु॥
ब्राह्मणउवाच॥अत्राप्युदाहरंतीममितिहासंपुरातनं।निबोधदशहोतॄणांविधानमिहयादृशं।श्रोत्रंत्वक्च
क्षुषीजिह्वानासिकाचरणौकरौ।उपस्थंपायुरितिवाक्होतॄणिदशभामिनि।शब्दस्पर्शौरूपरसौगं
धोवाक्यंक्रियागतिः।रेतोमूत्रपुरीषाणांत्यागोदशहवींषिवा।दिशोवायुरविश्चंद्रःपृथ्व्यग्निर्विष्णुरेव
च।इंद्रःप्रजापतिर्मित्रंअग्नयोदशभामिनि।दशेंद्रियाणिहोतॄणिहवींषिदशभामिनि।विषयानामस
मिधोहूयंतेतुदशाग्निषु।सर्वमेवाथविज्ञेयंचित्तंज्ञानमवेक्षते।रेतःशरीरभृत्कायेविज्ञातातुशरीरभृ
त्।शरीरभृद्गार्हपत्यस्तस्मादन्यःप्रणीयते।मनश्चाहवनीयश्चयस्मिन्संक्षिप्यतेहविः।ततोवाच
स्पतिर्जज्ञेतंमनःपर्यवेक्षते।रूपंभवतिवैवर्णोवर्णमनुद्रवतेमनः।ब्राह्मण्युवाच।कस्माद्वागभव
त्पूर्वंकस्मात्पश्चान्मनोभवत्।मनसाचिंतितंवाक्यंयदासमभिपद्यते।केनविज्ञानयोगेनमतिश्चित्तंस

मास्थिता। समुन्नीता वाध्यगच्छत्कोवेतां प्रतिबोधते। ब्राह्मण उवाच। वाताप्ययानः पतित्वात्तस्मात्श्रेष्ठत्वपा
नतां। तां मतिं मनसा प्राह मनस्तस्मादवेक्ष्यते। प्रश्नं तु वाङ्मनसोर्यस्मात्त्वमनुपृच्छसि। तस्मात्ते वर्तयिष्यामि
तयोरेव समाह्वयं। उभे वाङ्मनसी गत्वा भूतात्मानमपृच्छतां। आवयोः श्रेष्ठमाचक्ष्व छिन्धि नौ संशयं
विभो। मन इत्येव भगवान् तदा प्राह सरस्वतीं। अयं वै कामधुक् नित्यमिति तं प्राह वाग्यथा। ब्राह्मण उ०॥
स्थावरं जंगमं चैव विद्ध्युभे मनसी मम। स्थावरं मत्सकाशे वै जंगमं विषये तव। यस्तु ते विषयं गच्छेत्तत्व
र्णो मंत्रः स्वरोपि वा। तन्मनो जंगमं नाम तस्मादसि गरीयसी। यस्मादसि च मे वाच्ये स्वयमभ्येत्य शोभने। त
स्मादुच्छ्वासमासाद्य न वाग्वदति कर्हिचित्। प्राणापानांतरे नित्यं वाग्देवी सम्यक् प्रतिष्ठिता। प्रेर्यमाणा मह
भागे विना प्राणानपानतः। प्रजापतिमुपाधावत् प्रसीद भगवन्निति। ततः प्राणः प्रादुरभूत् वाचमाप्या
ययत्पुनः। तस्मादुच्छ्वासमासाद्य न वाग्वदति कर्हिचित्। घोषिणी जातनिर्घोषा नित्यमेव प्रवर्तते। त
योरपि च घोषिण्या निर्घोषैव गरीयसी। गौरिव प्रस्रवत्येषा रसमुत्तमशालिनी। सततं स्यंदते ह्येषा शाश्व
तीं ब्रह्मवादिनी। दिव्यादिव्यप्रकारेण शारती गौः शुचिस्मिते। एतयोरंतरं पश्य सूक्ष्मयाः स्यंदमानयोः।
ब्राह्मण्युवाच। अनुत्पन्नेषु वाक्येषु चोद्यमाना विवक्षया। किं नु पूर्वं ततो देवी व्याजहार सरस्वती। ब्राह्म
ण उ०॥ प्राणेन या संभवते शरीरे प्राणादपानं प्रतिपद्यते वा। उदानभूता न विसृज्य देहं व्यानेन सर्वं दिव
माऽऽवृणोति। ततः समाने प्रतितिष्ठतीह इत्येव पूर्वं प्रजजल्प वाणी। तस्मान्मनः स्थावरत्वात् विशिष्टं तथा
देवी जंगमत्वाद्विशिष्टा। इत्याश्वमेधिके पर्वणि ब्राह्मणगीतासु॥ ब्राह्मण उ०॥ अत्राप्युदाहरंतीममितिहासं १२

पुरातनं।सुभगे सप्तहोतॄणां विधानमिह यादृशं।घ्राणं चक्षुश्च जिह्वा च त्वक् श्रोत्रं चैव पंचमं।मनो बुद्धिश्च
सप्तैते होतारः पृथगाश्रिताः।सूक्ष्मेवकाशे संतस्ते न पश्यंतीतरेतरं।एतान्वै सप्तहोतॄंस्त्वं स्वभावाद्विद्धि शो
भने।ब्राह्मण्युवाच।सूक्ष्मेवकाशे संतस्ते कथं नान्योन्यदर्शिनः।कथं स्वभावा भगवन्नेतदाचक्ष्व मे वि
भो।ब्राह्मण उवाच।गुणाज्ञानमविज्ञानं गुणज्ञानमभिज्ञता।परस्परं गुणानेते न विजानंति कर्हिचित्।जिह्वा
चक्षुस्तथा श्रोत्रं त्वङ्मनो बुद्धिरेव च।न गंधानधिगच्छंति घ्राणं तानधिगच्छति।घ्राणं चक्षुस्तथा श्रोत्रं त्वङ्मनो
बुद्धिरेव च।न रसानधिगच्छंति जिह्वा तानधिगच्छति।घ्राणं जिह्वा तथा श्रोत्रं त्वङ्मनो बुद्धिरेव च।न रूपाण्य
धिगच्छंति चक्षुस्तान्यधिगच्छति।घ्राणं जिह्वा ततश्चक्षुः श्रोत्रं बुद्धिर्मनस्तथा।न स्पर्शानधिगच्छंति त्वक् च ता
नधिगच्छति।घ्राणं जिह्वा च चक्षुश्च त्वङ्मनो बुद्धिरेव च।न शब्दानधिगच्छंति श्रोत्रं तानधिगच्छति।घ्राणं
जिह्वा च चक्षुश्च त्वक् श्रोत्रं बुद्धिरेव च।संशयान्नाधिगच्छंति मनस्तानधिगच्छति।घ्राणं जिह्वा च चक्षुश्च त्व
क् श्रोत्रं मन एव च।न निष्ठामधिगच्छंति बुद्धिस्तानधिगच्छति।अत्राप्युदाहरंतीममितिहासं पुरातनं।
इंद्रियाणां च संवादं मनसश्चैव भामिनि।मन उवाच।न घ्राति मामृते घ्राणं रसं जिह्वा न बुध्यते।रूपं चक्षु
र्न गृह्णाति त्वक् स्पर्शं नावबुध्यते।न श्रोत्रं बुध्यते शब्दं मया हीनं कथंचन।प्रवरं सर्वभूतानां अहमस्मि
सनातनं।अगाराणीव शून्यानि शांतार्चिष इवाग्नयः।इंद्रियाणि न भासंते मया हीनानि नित्यशः।काष्ठानी
वार्द्रशुष्काणि यतमानैरपींद्रियैः।गुणार्थान्नाधिगच्छंति मामृते सर्वजंतवः।इंद्रियाण्यूचुः।एवमेतद्भवे
त्सत्यं यथैतन्मन्यते भवान्।ऋते त्वस्मानस्मदर्थांस्त्वं भोगान्भुंक्ष्व यादृशान्।यद्यस्मासु प्रलीनेषु तर्पणं प्रा

णधारणं। भोगान्भोक्तुं स्वरसान्भोक्तुं स्व यथैतन्मन्यसे तथा। अथ वा संप्रलीनेषु तिष्ठत्सु विषयेषु यदि संक
ल्पमात्रेण भोक्तुं स्व भोगान् यथा यथावान्॥ अथ चेन्मन्यसे सिद्धमस्मदर्थेषु नित्यदा। घ्राणेन रूपमादत्स्व रसा
नादत्स्व चक्षुषा। श्रोत्रेण गंधानादत्स्व नो छिष्टं त्वो ह्रुमहसि। यथा शिष्यो न शास्तस्त्वे त्वमस्त्वयर्थमतिथ्यावति।
ततः अस्तमुपादाय अस्तार्थं अपतिष्ठति। विषयानेवमस्मान्निर्दिष्टितान्त्तिमन्यसे। अनागतानतीतांश्च स्वप्ने जाग
रणे तथा। वैमनस्यगतानां च जंतूनामल्पचेतसां। अस्मदर्थे कृते कार्ये दृश्यते प्राणधारणं। बहूनपि हि
संकल्पान्मत्वा स्वप्नानुपास्य च। बुभुक्षया पीड्यमानो विषयानेव धावसि। अगारमद्वारमिव प्रविश्य सं
तप्यमानो विषयान विंदन्। प्राणक्षये शांतिमुपैति नित्यं दारुक्षयेग्निर्ज्वलितो यथैव। कामं तु नः स्वेषु गुणे
षु संगः कामं च नान्योन्यगुणोपलब्धिः। अस्मान्ऋते नास्ति तवोपलब्धिस्त्वामप्यृते ऽस्मान्न भजेत हर्षः॥ इ
त्याश्वमेधिके ब्राह्मणगीतासु ब्राह्मण ०। अत्राप्युदाहरंतीममितिहासं पुरातनं। सुभगे पंचहोतॄणां
विधानमिह यादृशं। प्राणापानावुदानश्च समानो व्यान एव च। पंचहोतॄनथैतान्वै परं तत्त्वं विदुर्बुधाः ब्रा
ह्मणी०। स्वभावात्सप्त होतार इति ते पूर्विका मतिः। यथा वै पंच होतारः परो भावस्तदुच्यतां। ब्राह्मण०। प्राणेन सं
भृतो वायुस्ततो व्यानः प्रवर्तते। अपाने संभृतो वायुस्ततो व्यानः प्रवर्तते। व्यानेन संभृतो वायुस्ततोदा
नः प्रवर्तते। उदाने संभृते वायुः समानो नाम जायते। तेऽपृच्छंत पुरा गत्वा पूर्वजातं प्रजापतिं। यो नो ज्येष्ठस्तमाच
क्ष्व सनः श्रेष्ठो भविष्यति। ब्रह्मोवाच। यस्मिन्प्रलीने प्रलयं व्रजंति सर्वे प्राणाः प्राणभृतां शरीरे। यस्मि
न्प्रचीर्णे च पुनश्चरंति स वः श्रेष्ठो गच्छत यत्र कामः। प्राण०। मयि प्रलीने प्रलयं व्रजंति सर्वे प्राणा प्राण २०

स्ततां शरीरे। मयि प्रचीर्णे च पुनश्चरंति श्रेष्ठो ह्यस्मा हं पश्यत मां प्रलीनं। ब्राह्मण॰ प्राणः प्रलीयत ततः पुनश्च
विचचार ह। समानश्चाप्युदानश्च वाचं ब्रूतां ततः शुभे। न त्वं सर्वमिदं प्राप्य तिष्ठस्येव यथा वयं। न त्वं श्रेष्ठोसि
नः प्राण अपानो हि वशे तव। स चचार पुनः प्राणः स्तमपानो नो न्यभाषत। अपान उ॰ मयि प्रलीने प्रलयं व्र
जंति सर्वे प्राणाः प्राणास्ततां शरीरे। मयि प्रचीर्णे च पुनश्चरंति श्रेष्ठो ह्यहं पश्यत मां प्रलीनं। ब्राह्मण॰ व्यान
श्च तमुदानश्च भाषमाणमथोचतुः। अपान न त्वं श्रेष्ठोसि नः प्राणो हि वशगस्तव। अपानः प्रचचार ह व्या
नस्तं पुनरब्रवीत्। श्रेष्ठोहमस्मि सर्वेषां श्रूयतां येन हेतुना। मयि प्रलीने प्रलयं व्रजंति सर्वे प्राणाः प्रा
णस्ततां शरीरे। मयि प्रचीर्णे च पुनश्चरंति श्रेष्ठो ह्यहं पश्यत मां प्रलीनं। ब्राह्मण॰। प्रालीयत ततो व्यानः
पुनश्च प्रचचार ह। प्राणापानावुदानश्च समानश्च मथोब्रुवन्। ततः प्रलीयतोदानः पुनश्च प्रचचार ह।
प्राणापानसमानश्च व्यानश्चैव तमब्रुवन्। उदान न त्वं श्रेष्ठोसि व्यान एव वशे तव। न त्वं श्रेष्ठोसि नो व्यान सम
मानो हि वशे तव। प्रचचार पुनर्व्यानः समानः पुनरब्रवीत्। श्रेष्ठो हि मस्मि सर्वेषां श्रूयतां येन हेतुना। मयि
प्रलीने प्रलयं व्रजंति सर्वे प्राणाः प्राणास्ततां शरीरे। मयि प्रचीर्णे च पुनश्चरंति श्रेष्ठो ह्यहं पश्यत मां प्रलीनं।
ब्राह्मण॰। सर्वे श्रेष्ठा न वा श्रेष्ठाः सर्वे स्वस्व हि धर्मिणः। सर्वे स्वविषये श्रेष्ठाः सर्वे चान्योन्यरक्षिणः। इति तान्
अब्रवीत्सर्वान् समवेतान् प्रजापतिः। ब्रह्मोवाच। एकः स्थिरश्चलश्चान्यो विशेषात्पंचवायवः। एकएवममे
चात्मा बहुधाप्युपधीयते। परस्परस्य सुहृदो भावयंति परस्परं। स्वस्ति व्रजत भद्रं वो धारयंतः परस्परं। इत्या
श्वमेधिके ब्राह्मणगीतासु। ब्राह्मण॰। अत्राप्युदाहरंतीममितिहासं पुरातनं। नारदस्य च संवादं ऋषेर्देवम
तस्य च। देवमत॰। जंतोः संजायमानस्य किं नु पूर्वं प्रवर्त्तते। प्राणोपानः समानो वा व्यानो वोदान एव वा। ना

रद॥ येनायं सृज्यते जंतुस्ततोन्यः पूर्वमेति तं। प्राणद्वंद्वं हि विज्ञेयं प्राणापानं च योर्द्ध्वगं च यत्॥ देवमत उ॰ केनायं
सृज्यते जंतुः कश्चान्यः पूर्वमेति तं। प्राणद्वंद्वं च मे ब्रूहि यत्पूर्वं च। विनिश्चयं। नारद उ॰। संकल्पाज्जाय
ते हर्षः शब्दादपि च जायते। रसात्संजायते चापि रूपादपि च जायते। स्पर्शात्संजायते चापि गंधादपि च जायते। ए
तद्रूपमुदानस्य हर्षो मिथुनसंभवः। कामात्संजायते शुक्रं कामात्सर्वं च गच्छति। व्यानः समानश्चैवोभौ तिर्य
ग्द्वंद्वं विमुच्यते। अग्निर्वै देवताः सर्वाः इति वेदस्य शासनात्। संज्ञायते ब्राह्मणे बुद्ध्या न बुद्धिसमन्वितं। तस्यानु
तमो धूमं रजो भस्म सुतेजसः। सत्वं संजायते तस्य यत्र प्रक्षिप्यते हविः। सत्वात्समानो व्यानश्च इति यज्ञविदो
विदुः। प्राणापानावाज्यभागौ तयोर्मध्ये हुताशनः। एतद्रूपमुदानस्य परमं ब्राह्मणा विदुः। निर्द्वंद्वमिति यत्त्वेतत्तन्
मे निगदतः शृणु। अहोरात्रमिदं द्वंद्वं तयोर्मध्ये हुताशनः। एतद्रूपमुदानस्य परमं ब्राह्मणा विदुः। उभे चै
यने द्वंद्वं तयोर्मध्ये हुताशनः। एतद्रूपमुदानस्य परमं ब्राह्मणा विदुः। उभे सत्यानृते द्वंद्वं तयोर्मध्ये हुताशनः।
एतद्रूपमुदानस्य परमं ब्राह्मणा विदुः। प्रथमं समवर्तन्व्यानो व्यस्यते तेन कर्मणा। द्वितीयं तु समानस्तु पुन
रेव व्यवस्यति। शांत्यर्थं वामदेव्यं च शांतिर्ब्रह्म सनातनं। एतद्रूपमुदानस्य परमं ब्राह्मणा विदुः। इत्याश्वमे
धिके देवमतनारदसंवादः। ब्राह्मण०। अत्राप्युदाहरंतीममितिहासं पुरातनं। चातुर्होत्रविधानस्य विधान
मिह यादृशं। तस्य सर्वस्य विधिवत् विधानमुपदेक्ष्यते। शृणु मे गदतो भद्रे विधानमिदमुत्तमं। करणं कर्म कर्ता
च मोक्ष इत्येव भामिनि। चत्वार एते होतारो यैरिदं जगदावृतं। होतॄणां साधनं चैव शृणु सर्वमशेषतः। घ्रा
णं जिह्वा च चक्षुश्च त्वक् च श्रोत्रं च पंचमं। मनो बुद्धिश्च सप्तैते विज्ञेया गुणहेतवः। गंधो रसश्च रूपं च शब्दः २१

स्य तत्रश्चिव पंचमः ।मंतव्यमथ बोद्धव्यं सप्तैते कर्महेतवः ।विदुषां बुध्यमानानां स्वं स्वं स्थानं यथाविधि ।गुणास्ते देवता
भूतास्सततं भुंजते हविः ।अदंश्चन्नं निराकर्माणि मन्वानानि ममत्वेनोपहन्यते। आत्मार्थं पाचयन्नित्यं ममत्वे
नोपहन्यते। अभक्ष्यभक्षणं चैव मद्यपानं च हंति तं। स चान्नं हंति तं चान्नं स हत्वा हन्यते पुनः। अन्नाद्यन्नाम्
दन्नं विद्वान्पुनर्जनयतीश्वरः। न चान्नाज्जायते तस्मिन्सूक्ष्मो नाम व्यतिक्रमः। मनसा गम्यते यच्च यच्च वाचा नि
गद्यते। श्रोत्रेण श्रूयते यच्च चक्षुषा यच्च दृश्यते। स्पर्शेन स्पृश्यते यच्च घ्राणेन घ्रायते च यत्। मनःषष्ठानि सं
यम्य हवींष्येतानि सर्वशः। गुणवत्पावको मह्यं दीप्यते हव्यवाहनः। योगयज्ञः प्रवृत्तो वा ज्ञानब्रह्ममनो
भवः। प्राणस्तोत्रोऽपानशस्त्रः प्राणत्यागः सुदक्षिणः। कर्मानुमन्ता ब्रह्मा मे कर्ताध्वर्युः कृतस्तुतिः। ऋत
प्रशास्ता तच्छस्त्रं अपवर्गोस्य दक्षिणा। ऋचश्चाप्यत्र शंसंति नारायणविदो जनाः। नारायणाय देवाय यद्बे
ध्नन्पशून्पुरा। तत्र सामानि गायंति तत्र चाहुर्निदर्शनं। देवं नारायणं भीरु सर्वात्मानं निबोध मे। इत्याश्व
मेधिके ब्राह्मणगीतासु॥ ब्राह्मण० एकः शास्ता न द्वितीयोस्ति शास्ता हृद्येष तिष्ठन्पुरुषः शास्ति शास्ता। तेना
नियुक्तः प्रवणादिवोदकं यथा नियुक्तोस्मि तथा वहामि। एको गुरुर्नास्ति ततो द्वितीयो यो हृच्छयस्तमहमनु
ब्रवीमि। तेनानुशिष्टा बांधवा बंधुमंतः सप्तर्षयः सप्त दिवि प्रभांति। एकः श्रोता नास्ति ततो द्वितीयो यो हृच्छय
स्तमहमनुब्रवीमि। अयास्मिन्गुरौ गुरुवासं निरुष्य शक्रो गतः सर्वलोकामरत्वं। एको द्वेष्टा नास्ति ततो द्विती
यो यो हृच्छयस्तमहमनुब्रवीमि। तेनानुशिष्टा गुरुणा सदैव लोकद्विष्टाः पन्नगाः सर्व एव। अत्राप्यु
दाहरंतीममितिहासं पुरातनं। प्रजापतौ पन्नगानां देवर्षीणां च संविदं। देवर्षयश्च नागाश्च असुराश्च प्रजा

स्पर्शश्चैव पंचमः। मंतव्यमथ बोद्धव्यं सप्तैते कर्महेतवः॥ विदुषां बुध्यमानानां स्वं स्वं स्थानं यथाविधि। गुणास्ते देवता
रूपा सततं भुंजते हविः॥ अदन्ह्येनु निराकर्माणि मन्नानि ममत्वेनोपहन्यते। आत्मार्थं पाचयन्नित्यं ममत्वे
नोपहन्यते। अभक्ष्यभक्षणं चैव मद्यपानं च हंति तं। स्वान्नं हंति परान्नं स हत्वा हन्यते पुनः। अन्नाद्यन्नमि
दं विद्वान्पुनर्जनयतीश्वरः। न चान्नाज्जायते तस्मिन्सूक्ष्मो नाम व्यतिक्रमः। मनसा गम्यते यच्च यच्च वाचा नि
गद्यते। श्रोत्रेण श्रूयते यच्च चक्षुषा यच्च दृश्यते। स्पर्शेन स्पृश्यते यच्च घ्राणेन घ्रायते च यत्। मनःषष्ठानि सं
यम्य हवींष्येतानि सर्वशः। गुणवत्पावको मह्यं दीप्यते हव्यवाहनः। योगयज्ञः प्रवृत्तो वा ज्ञानब्रह्ममनो
भवः। प्राणस्तोत्रोऽपानशस्त्रः प्राणत्यागः सुदक्षिणः। कर्मानुमंता ब्रह्मा मे कर्ताध्वर्युः कृतस्तुतिः। ऋत
प्रशास्ता तच्छस्त्रमपवर्गोऽस्य दारुणा॥ ऋचश्चाप्यत्र शंसंति नारायणविदो जनाः। नारायणाय देवाय यदब
धन्पशून्पुरा। तत्र सामानि गायंति तत्र चाहुर्निदर्शनं। देवं नारायणं भीरु सर्वात्मानं निबोध मे॥ इत्याश्व
मेधिके ब्राह्मणगीतासु॥ ब्राह्मण उ०। एकः शास्ता न द्वितीयोऽस्ति शास्ता हृच्छयस्तिष्ठन्पुरुषः शास्ति शास्ता। तेना
नियुक्तः प्रवणादिवोदकं यथानियुक्तोऽस्मि तथा वहामि। एको गुरुर्नास्ति ततो द्वितीयो यो हृच्छयस्तमहमनु
ब्रवीमि। तेनानुशिष्टा बांधवा बंधुमंतः सप्तर्षयः सप्त दिवि प्रभांति। एकः श्रोता नास्ति ततो द्वितीयो यो हृच्छय
स्तमहमनुब्रवीमि। अयास्मिन्गुरौ गुरुतल्पं निरुष्याव निर्गतः सर्वलोकामरत्वं। एको द्वेष्टा नास्ति ततो द्विती
यो यो हृच्छयः क्रोधस्तमहमनुब्रवीमि। तेनानुशिष्टो गुरुणा सदैव लोकद्विष्टाः पन्नगाः सर्व एव। अत्राप्यु
दाहरंतीममितिहासं पुरातनं। प्रजापतेः पन्नगानां देवर्षीणां च संविदं। देवर्षयश्च नागाश्च असुराश्च प्रजा

न्ति। पर्य पृच्छन्नुपासीनाः श्रेयो नः प्रोच्यतामिति। तेषां प्रोवाच भगवान् श्रेयः समनुपृच्छतां। ॐ इत्येकाक्षरं ब्रह्म ते
श्रुत्वा प्राद्रवन् दिशः। तेषां प्रयतमानानां उपदेशार्थमात्मनः। सर्पाणां दशने भावः प्रवृत्तः पूर्वमेव तु। असु
राणां प्रवृत्तस्तु दंभभावः स्वभावजः। दानं देवा व्यवसिता दममेव महर्षयः। एकं शास्तारमासाद्य शब्दे
नैकेन संस्कृताः। नानाव्यवसिताः सर्वे सर्पदेवर्षिदानवाः। शृणोत्ययं प्रोच्यमानं गृह्णाति च यथातथं। पृच्छ
तस्तस्ततो भूयो गुरुरन्यो न विद्यते। तस्य चानुमते कर्म ततः पश्चात्प्रवर्तते। गुरुर्बोद्धा च श्रोता च द्वेष्टा च हृद
नित्यशः। पापेन विचरंल्लोके पापचारी भवत्ययं। ब्रह्मैव समिधस्तस्य ब्रह्माग्निर्ब्रह्मसंस्तरः। आपो ब्रह्म गु
रुर्ब्रह्म स ब्रह्मणि समाहितः। एतदेतादृशं सूक्ष्मं ब्रह्मचर्यं विदुर्बुधाः। विदित्वा चान्वपद्यंत क्षेत्रज्ञेनानुदर्शि
ताः। इत्याश्वमेधिके ब्राह्मणगीतासु। ब्राह्मण उ०। संकल्पदंशमशकं शोकहर्षहिमातपं। मोहांधकारतिमिरं
लोभव्यालसरीसृपं। विषयैकात्ययाध्वानं कामक्रोधविरोधकं। तदतीत्य महादुर्गं प्रविष्टोस्मि महद्वनं। ब्रा
ह्मण्युवाच। किं तद्वनं महाप्राज्ञ के वृक्षाः सरितश्च काः। गिरयः पर्वताश्चैव कियत्यध्वनि तद्वनं। ब्राह्म
ण उ०। न तदस्ति पृथग्भावः किंचिदन्यं ततः समं। न तदस्त्यपृथग्भावे किंचिद्दूरतरं ततः। तस्माद्ध्रस्व
तरं नास्ति न ततोस्ति बृहत्तरं। नास्ति तस्माद्दुःखतरं नास्त्यन्यत्तत्समं सुखं। न तत्प्रविश्य शोचंति न प्रहृष्यंति
च तद्विदः। न च बिभ्यति केषांचित्तेभ्यो बिभ्यति किंचन। तस्मिन्वने सप्त महाद्रुमाश्च फलानि सप्तातिथ
यश्च सप्त। सप्ताश्रमाः सप्त समाधयश्च दीक्षाश्च सप्तैतदरण्यरूपं। पंचवर्णानि दिव्यानि पुष्पाणि च
फलानि च। विसृजंतो महावृक्षा व्याप्य तिष्ठंति तद्वनं। चतुर्वर्णानि दिव्यानि पुष्पाणि च फलानि च। सृजंतः पा २२

द्रुपास्तत्र व्याप्य तिष्ठंति तद्वनं। त्रींकराणि त्रिवर्णानि पुष्पाणि च फलानि च। सृजंतः पादपास्तत्र व्याप्य तिष्ठंति तत्
द्वनं। द्वांकराणि त्रिवर्णानि पुष्पाणि च फलानि च। सृजंतः पादपास्तत्र व्याप्य तिष्ठंति तद्वनं। बहून्यव्यक्तवर्णा
नि पुष्पाणि च फलानि च। विसृजंतो महावृक्षा व्याप्य तिष्ठंति तद्वनं। एकोह्यग्निः सुमनाः ब्राह्मणोत्र पंचेंद्रि
याणि समिधश्चात्र संति। तेभ्यो मोक्षाः सप्त भवंति दीक्षा गुणाः फलान्यतिथयः पलाशाः। आतिथ्यं प्रतिगृह्णं
ति तत्र सप्त महर्षयः। अर्चितेषु प्रलीनेषु त्रिष्वन्यद्रोच्यते वनं। प्रतिज्ञा वृक्षमफलं शांतिच्छायासमन्वितं।
ज्ञानाश्रयं तृप्तितोयं अंतःक्षेत्रस्य भास्करं। ये धिगच्छंति तत्संतः तेषां नास्ति भयं पुनः। ऊर्ध्वं चाधश्च तिर्य
क्च तस्य नांतोधिगम्यते। सप्त स्त्रियस्तत्र वसंति सद्यो अवाङ्मुख्यो भानुमत्यो जनित्र्यः। ऊर्ध्वं रसानाददते
प्रजाभ्यः सर्वाण्यथा सर्वमनित्यतां च। तत्रैव प्रतितिष्ठंति पुनस्तत्रोदयंति च। सप्त सप्तर्षयः सिद्धा वसिष्ठप्र
मुखास्तथा। यशो वर्चो भगवतस्त्विष्टिर्विजयते जसी। एवमेवानुवर्तंते सप्त ज्योतींषि भास्करं। गिरयः पर्वता
श्चैव संति तत्र समासतः। नद्यश्च सरितो वारि वहंत्यो ब्रह्मसंभवं। नदीनां संगमस्तत्र वैतानः समुपह्वरे। स्वा
त्मतृप्ता यतो यांति साक्षाद्देवपितामहं। कृशाशाः सुव्रताः पीनास्तपसा दग्धकिल्बिषाः। आत्मन्यात्मानमाविश्य
ब्रह्माणं समुपासते। ऋचमप्यत्र शंसंति विद्यारण्यविदो जनाः। तदरण्यमभिप्रेत्य यथाधीरमजायत। एत
देतादृशं दिव्यमरण्यं ब्राह्मणा विदुः। विदित्वा चानुतिष्ठंति क्षेत्रज्ञेनानुदर्शितं। इत्याश्वमेधिके ब्राह्मणगी
तासु। ब्राह्मण। गंधान्न जिघ्रामि रसान्न वेद्मि रूपं न पश्यामि न च स्पृशामि। न चापि शब्दान्विविधान्
शृणोमि न चापि संकल्पमुपैमि किंचित्। अर्थानिष्टान्कामयते स्वभावः सर्वान्द्वेष्यान्प्रद्विषते स्वभा
वः। काम द्वेषावुद्भवतः स्वभावात्। प्राणापानौ जंतुदेहान्निविश्य तेभ्यश्चान्यास्तेषु नित्यस्वभावा।

स्थूलात्मानं लक्षयेयं शरीरे। तस्मिन्तिष्ठन्नास्मि शक्यः कथंचित्। कामक्रोधाभ्यां जरया मृत्युनाच।
कामयानस्य च सर्वकामान्न विद्विषाणस्य च सर्वदोषान्। न मे स्वभावेषु भवंति लेपास्तोयस्य बिंदोरिव पु
ष्करेषु। नित्यस्य मे नैव भवंति नित्या निरीक्षमाणस्य बहुस्वभावाः। सज्जते कर्मसु भोगजालं दिवी
व सूर्यस्य मयूखजालं। अत्राप्युदाहरंतीममितिहासं पुरातनं। अध्वर्युयतिसंवादं तन्निबोध यशस्विनि।
प्रोक्ष्यमाणं पशुं दृष्ट्वा यज्ञकर्मण्यथाकरोत्। यतिरध्वर्युमासीनं हिंसेयमिति कुत्सयन्। तमध्वर्युः प्रत्यु
वाच नायं छागो विनश्यति। श्रेयसा योक्ष्यते जंतुर्यदि श्रुतिरियं तथा। यो ह्यस्य पार्थिवो भावः पृथिवीं स ग
मिष्यति। यदस्य वारिजं किंचिदपस्तं परिपत्स्यते। सूर्यं चक्षुर्दिशः श्रोत्रं प्राणो मारुतमेव च। आगमे वर्तमा
नस्य न मे दोषोस्ति कश्चन। यतिरुवाच॥ प्राणैर्वियोगे छागस्य यदि श्रेयः प्रपश्यसि। छागार्थे वर्तते य
ज्ञो भवतः किं प्रयोजनं। अनु त्वा मन्यतां माता पिता भ्राता सखापि च। मंत्रयस्वैनमुन्नीय परवंतं विशे
षतः। य एवमनुमन्येरंस्तान्भवान्प्रष्टुमर्हसि। तेषामनुमतं श्रुत्वा शक्यं कर्तुं विचारणा। प्राणा अप्य
२४ स्य छागस्य प्रापितास्ते स्वयोनिषु। शरीरं केवलं शिष्टं निश्चेष्टमिति मे मतिः। इंधनस्य तु तुल्येन शरीरेण वि
चेतसा। हिंसां निर्वेष्टुकामानामिंधनं पशुसंज्ञितं। अहिंसा सर्वधर्माणामिति वृद्धानुशासनं। तदहिंस्रं भवेत्क
र्म तत्कार्यमिति विद्महे। अहिंसेति प्रतिज्ञेयं यदि वक्ष्याम्यतः परं। शक्यं बहुविधं कर्तुं भवतः कार्यदूषणं। अ
हिंसा सर्वभूतानां नित्यमस्मासु रोचते। प्रत्यक्षतः साधयामो न परोक्षमुपास्महे। अध्वर्युरुवाच। भू
मेर्गंधगुणान्भुंक्षे पिबस्यापोमयान्रसान्। ज्योतिषां पश्यसे रूपं स्पृशस्यनिलजान्गुणान्। शृणोष्याकाश

जंगाङ्गं मनसा मन्यसे गतिं। सर्वाण्येतानि भूतानि प्राणा इति च मन्यसे। प्राणदानेन नित्यासि हिंसया वर्त्तते त्ववा
नू। नास्ति चेष्टा विना हिंसा किं वा त्वं मन्यसे द्विज॥ यतिरुवाच॥ अक्षरं च क्षरं चैव द्वैधीभावोयमात्मनः। अक्षरं तत्र
सद्भावः स्वभावः क्षर उच्यते। प्राणो जिह्वा मनः सत्वं स्वभावो रजसा सह। भावैरेतैर्विमुक्तस्य निर्द्वन्द्वस्य नि
राशिषः। समस्य सर्वभूतेषु निर्ममस्य जितात्मनः। समंतात्परिमुक्तस्य न भयं विद्यते क्वचित्॥ अध्वर्युः॥ सद्भिरेव
ह संवासः कार्यो मतिमतां वर। भवतो हि मतं श्रुत्वा प्रतिभाति मतिर्मम॥ भगवन्भवतो बुद्ध्या प्रतिबुद्धो
ब्रवीम्यहं। मतिमद्भिः कृतं कर्तुं नापराधोस्ति मे द्विज॥ उपपत्त्या यतिस्तूष्णीं वर्त्तमानस्ततः परं। अध्वर्युर
पि निर्मोहं विप्रचार महामते। एवमेतावुभौ मोक्षं सुसूक्ष्मं ब्राह्मणाविधडः। विदित्वा चानुउतिष्ठंति सत्वज्ञै
नानुदर्शिताः। इत्याश्वमेधिके ब्राह्मणगीतासु ब्राह्मणपा॰ अत्राप्युदाहरंतीममितिहासं पुरातनं। कार्त्तवीर्य
स्य संवादं समुद्रस्य च भामिनि। कार्त्तवीर्यार्जुनो नाम राजा बाहुसहस्रवान्। येन सागरपर्यंता धनुषा
निर्जिता मही। स कदाचित्समुद्रांते विचरन्बलदर्पितः। अवाकिरच्छरशतैः समुद्रमिति नः श्रुतं। समुद्रोप्य तं
स्पेत्य कृतांजलिरुवाच ह। मा मुंच वीर नाराचान्ब्रूहि किं करवाणि ते। मदाश्रितानि भूतानि त्वद्विसृ
ष्टैर्महेषुभिः। वध्यंते राजशार्दूल तेभ्यो देह्यभयं विभो॥ अर्जुन उवाच॥ मत्समो यदि संग्रामे शरासनधरः
कश्चित्स विद्यते तन्ममाचक्ष्व यः समासीत मां मृधे॥ समुद्र उवाच॥ महर्षिर्जमदग्निस्ते यदि यदि राजन् परिश्रुतः।
तस्य पुत्रस्तवातिथ्यं यथावत्कर्तुमर्हति। ततः स राजा प्रययौ क्रोधेन महता वृतः। स तमाश्रममागम्य राममे
वान्वपद्यत। स रामप्रतिकूलानि करोति सह बंधुभिः। आयासं जनयामास रामस्य च महात्मनः। ततस्तेजः
प्रजज्वाल रामस्यामिततेजसः। प्रदहन्रिपुसैन्यानि तदा कमललोचनः। ततः परशुमादाय रातं बाहुसह

त्रिणां।चिछेदबहून्रुषारामोबहुशाखमिवद्रुमं।तंहतंपतितंदृष्ट्वासमेताःसर्वबांधवाः।असीनादायशक्ती
श्चभार्गवंपर्यवारयन्।रामोपिधनुरादायरथमारुह्यसत्वरः।विसृजन्शरवर्षाणिव्यधमत्पार्थिवंब
लं।ततस्तुक्षत्रियाःकेचित्जामदग्निंनिहत्यतं।विविशुर्गिरिदुर्गाणिमृगाःसिंहार्दिताइवा।तेषांस्ववि
हितंकर्मतद्भयान्नानुतिष्ठतां।प्रजावृषलतांप्राप्ताब्राह्मणानामदर्शनात्।तएतेद्रविडाःपुंड्राःशकाश्च
शबरैःसह।वृषलत्वंपरिगताव्युत्थानात्क्षत्रधर्मिणः।ततस्तुहतवीरासुक्षत्रियासुपुनःपुनः।द्विजैरु
त्पादितंक्षत्रंजामदग्न्योन्यकृंतत।एकविंशेततोघातेरामंवागशरीरिणी।दिव्याप्रोवाचमधुरासर्वलोक
नमस्कृता।रामरामनिवर्तस्वकंगुणंतातपश्यसि।क्षत्रबंधूनिमान्प्राणैर्विप्रयोज्यपुनःपुनः।तथैव
तंमहात्मानंऋचीकप्रमुखास्तथा।पितामहामहाभागनिवर्तस्वेत्यथाब्रुवन्।पितुर्वधममृष्यंस्तुरा
मःप्रोवाचतान्ऋषीन्।नार्हंतीहभवंतोमांनिवारयितुमप्युत।पितामहाऊचुः॥नार्हसेक्षत्रबंधूंस्त्वं
निहंतुंजयतांवर।नहियुक्तंत्वयाहंतुंब्राह्मणेनसतान्नृपान्॥इत्याश्वमेधिकेब्राह्मणगीतासु॥पितामहा
हाऊचुः।अत्राप्युदाहरंतीममितिहासंपुरातनं।श्रुत्वाचतत्तथाकार्यंभवताद्विजसत्तम।अलर्कोनाम
राजर्षिरभवत्सुमहातपाः।धर्मज्ञःसत्यसंधश्चमहात्मासुमहाव्रतः।ससागरांतांधनुषाविनिर्जित्यमही
मिमां।कृत्वासुदुःकरंकर्ममनःसूक्ष्मेसमादधे।स्थितस्यवृक्षमूलेतुतस्यचिंताबभूवह।उत्सृज्यसुमह
त्कर्मसूक्ष्मंप्रतिमहामतिः।अलर्कउवाच।मनसोमेबलंजातंमनोजित्वाध्रुवंजयः।अन्यत्रबाणान्मोक्ष्यामि
शत्रुभिःपरिवारितः।यदिदंचापलान्मर्त्यान्सर्वानेतान्चिकीर्षति।मनःप्रतिसुतीक्ष्णाग्रानहंमोक्ष्या २४

मिसायकानुमनन्तवान्। नतेबाणास्तरिष्यंतिमामलर्ककथंचन। तवैवमर्मत्तेस्यंतित्तिन्नमर्मामरिष्यसि।
अन्यान्बाणान्समीक्षस्वयेस्त्वंमांसूदयिष्यसि। तत्श्रुत्वासविचिंत्याथततोवचनमब्रवीत्। अलर्क०
आघ्रायसुबहून्गंधांस्तानेवप्रतिगृध्यसि। तस्मात्घ्राणंप्रतिशरान्प्रतिमोक्ष्याम्यहंशितान्॥ घ्राणं०
नतेबाणास्तरिष्यंतिमामलर्ककथंचन। तवैवमर्मत्तेस्यंतित्तिन्नमर्मामरिष्यसि। अन्यान्बाणान्समीक्ष
स्वयेस्त्वंमांसूदयिष्यसि। अलर्क०। इयंस्वादून्रसान्भुक्त्वातानेवप्रतिगृध्यति। तस्माज्जिह्वांप्रतिशरा
न्प्रतिमोक्ष्याम्यहंशितान्। जिह्वा०। नमेबाणास्तरिष्यंतिमामलर्ककथंचन। तवैवमर्मत्तेस्यंतित्तिन्नमर्मा
मरिष्यसि। अन्यान्बाणान्समीक्षस्वयेस्त्वंमांसूदयिष्यसि। तत्श्रुत्वासविचिंत्याथततोवचनमब्रवीत्।
अलर्क०। स्पृष्ट्वात्वग्विविधान्स्पर्शान्तानेवप्रतिगृध्यसि। तस्मात्वं पाटयिष्ये विविधैः कंकपत्रिभिः
त्वगुवाच। नतेबाणास्तरिष्यंतिमामलर्ककथंचन। तवैवमर्मत्तेस्यंतित्तिन्नमर्मामरिष्यसि। अन्यान्
बाणान्समीक्षस्वयेस्त्वंमांसूदयिष्यसि। अलर्क०। श्रुत्वात्वंविविधान्शब्दान्तानेवप्रतिगृध्यति। तस्मा
त्श्रोत्रंप्रतिशरान्प्रतिमोक्ष्याम्यहंसितान्। श्रोत्रं०। नमेबाणास्तरिष्यंतिमामलर्ककथंचन। तवैवमर्मत्ते
स्यंतित्तिन्नमर्मामरिष्यसि। अन्यान्बाणान्समीक्षस्वयेस्त्वंमांसूदयिष्यसि। तत्श्रुत्वा०। अलर्क०। दृष्ट्वा
वैविविधान्भावान्तानेवप्रतिगृध्यति। तस्माच्चक्षुःप्रतिशरान्प्रतिमोक्ष्याम्यहंसितान्। चक्षुरुवाच।
नमेबाणास्तरिष्यंतिमामलर्ककथंचन। तवैवमर्मत्तेस्यंतित्तिन्नमर्मामरिष्यसि। अन्यान्बाणान्समी
क्षस्वयेस्त्वंमांसूदयिष्यसि। अलर्क०। इयंनिश्चयबहुविधाप्रज्ञयाध्यवस्यसि। तस्मात्बुद्धिंप्रतिशरान्

प्रतिमोक्ष्याम्यहं सिता च बुद्धिरुवाच ॥ नैव बाणास्तरिष्यंति मामलर्क कथंचन । तवैव मर्म भेत्स्यंति भिन्नमर्मा म
रिष्यसि । अन्यान् बाणान् समीक्षस्व यैस्त्वं मां संदधिष्यसि । तच्छ्रुत्वा ० ॥ ब्राह्मण ० ॥ ततोऽलर्कस्तपो घोरं समा
स्थाय सुदुष्करं । नाध्यगच्छत्परं राजा बाणमेतेषु सप्तसु ॥ सुसमाहितचेतास्तु ततो विचिंतयत्प्रभुः ॥ स प्रविचिंत्य चि
रं कालं अलर्को द्विजसत्तम । नाध्यगच्छत्परं श्रेयो योगान्मतिमतां वरः ॥ स एकाग्रं मनः कृत्वा निश्चलो
योगमास्थितः ॥ इंद्रियाणि जघानाशु बाणेनैकेन वीर्यवान् ॥ योगेनात्मानमाविश्य सिद्धिं च परमां ययौ ।
विस्मितश्चापि राजर्षिरिमां गाथां जगाद ह ॥ अहो कष्टं यदस्माभिः पूर्वं राज्यमनुष्ठितं । इति पश्चान्मया
ज्ञातं योगान्नास्ति परं सुखं । इति त्वमपि जानीहि राम मा क्षत्रियान् जहि । तपो घोरमुपातिष्ठ ततः श्रेयोऽभि
पत्स्यसे । इत्युक्तः पितृभिः सोऽथ तपो घोरं समास्थितः । जामदग्न्यो महाभागः सिद्धिं च परमां गतः ॥ इत्या
श्वमेधिके ब्राह्मणगीतासु ॥ ब्राह्मण ० ॥ त्रयो वै रिपवो लोके नव वै गुणतः स्मृताः । प्रहर्षः प्रीतिरानंदस्त्र
यस्ते सात्त्विकाः स्मृताः ॥ शोकः क्रोधोऽतिसंरंभो राजसास्ते गुणाः स्मृताः ॥ स्वप्नस्तंद्री च मोहश्च त्रयस्ते ताम
सा गुणाः ॥ एतान्निकृत्य धृतिमान् ज्ञानबाणैरतंद्रितः । जेतुं परानुत्सहते प्रसन्नात्मा जितेंद्रियः ॥ अत्र गा
था कीर्त्तयंति पुराकल्पविदो जनाः ॥ अंबरीषेण या गीता राज्ञा राज्यं प्रशासता । समुदीर्णेषु दोषेषु बध्यमाने
षु साधुषु । जग्राह तरसा राज्यं अंबरीष इति श्रुतिः ॥ स निगृह्य महादोषान् साधून् समभिपूज्य च । जगाम मह
तीं सिद्धिं गाथां चेमां जगाद ह । भूयिष्ठं मे जिता दोषा निहताः सर्वशत्रवः ॥ एको दोषोऽवशिष्टस्तु वध्यः स न निह
तो मया । येन प्रयुक्तः पुरुषो वैतृष्ण्यं नाधिगच्छति । तृष्णार्त्त इव निम्नानि धावमानो न बुध्यते । अकार्यमपि सेवेत २५

प्रयुक्तो येन वै नरः॥ तं लोभमसिभिस्तीक्ष्णैर्निकृंतंतं निकृंतत॥ ततो लोभाद्विजायते तृष्णा ततश्चिंता प्रसज्जते॥
स लिप्समानो लभते भूयिष्ठं राजसान्गुणान्॥ तदवाप्तौ तु लभते भूयिष्ठं तामसान्गुणान्॥ स तैर्गुणैः संह-
तदेहबंधनः पुनः पुनर्जायति कर्म चैव हि तो जन्मक्षये भिन्नविकीर्णदेहः पुनर्मृत्युं गच्छति जन्मनैव॥ तस्मादे-
तं सम्यगवेक्ष्य लोभं निगृह्य धृत्यात्मनि राज्यमिच्छेत्॥ एतद्राज्यं नान्यदस्तीति विद्यात् यस्त्वं न राज्ये विदितो म-
मैकः॥ इति राज्ञांबरीषेण गाथा गीता यशस्विना॥ अधिराज्यं पुरस्कृत्य लोभमेकं परित्यज॥ इत्याश्वमेधिके
ब्राह्मणगीतासु॥ ब्राह्मण॥ अत्राप्युदाहरंतीममितिहासं पुरातनं॥ ब्राह्मणस्य च संवादं जनकस्य च भा-
मिनि॥ ब्राह्मणं जनको राजा सन्नं कस्मिंश्चिदागसि॥ विषये मे न वस्तव्यं इति शिष्ट्यर्थमब्रवीत्॥ इत्युक्तः प्र-
त्युवाचाथ ब्राह्मणो राजसत्तमं॥ आचक्ष्व विषयं राजन्यावांस्तव विशेषतः॥ अन्यस्य विषये राज्ञो वस्तु-
मिच्छाम्यहं विभो॥ वचस्ते कर्तुमिच्छामि यथाशास्त्रं महीपते॥ इत्युक्तः स तदा राजा ब्राह्मणेन यशस्विना॥
मुहुरुष्णं च निःश्वस्य न स तं प्रत्यभाषत॥ तमासीनं ध्यायमानं राजानममितौजसं॥ कश्मलं सहसागच्छ-
त्भानुमंतमिव ग्रहः॥ समाश्वास्य तदा राजा व्यपेते कश्मले तदा॥ ततो मुहूर्त्तादिव तं ब्राह्मणं वाक्यमब्रवीत्॥
जनक॥ पितृपैतामहे राज्ये वश्ये जनपदे सति॥ विषयं नाधिगच्छामि विचिन्वन्पृथिवीमिमां॥ नाध्यगच्छं य-
दा पृथ्व्यां मिथिला मार्गिता मया॥ ततो मे कश्मलस्यांते मतिः पुनरुपस्थिता॥ क्रियेतं विषयं मन्ये सर्वो वा विषयो म-
म॥ आत्मापि चायं न मम सर्वा वा पृथिवी मम॥ उष्यतां यावदुत्साहं भुज्यतां यावदिष्यते॥ यथा मम तथा-
न्येषामिति मन्ये द्विजोत्तम॥ ब्राह्मण॥ पितृपैतामहे राज्ये वश्ये जनपदे सति॥ ब्रूहि कां बुद्धिमास्थाय ममत्वं वर्जि-

तंचयाःकयाबुध्याविनिश्चित्यसर्वोवैविषयस्तव।जनकउ०।अंतवंतइहारंभाविदिताःसर्वकर्मसु।नाधिग
च्छाम्यहंबुध्याममेदमितियद्भवेत्।श्रृणुबुद्धिंतुयांज्ञात्वासर्वत्रविषयोमम।नाहमात्मार्थमिच्छामिगंधान्
घ्राणगतानपि।तथामेनिर्जिताभूमिर्वशेतिष्ठतिनित्यदा।नाहमात्मार्थमिच्छामिरसानास्येपिवर्तते।आपोमे
निर्जितास्तस्माद्वशेतिष्ठंतिनित्यदा।नाहमात्मार्थमिच्छामिरूपंज्योतिश्चचक्षुषा।तस्मान्मेनिर्जितंज्योतिर्वशे
तिष्ठतिनित्यदा।नाहमात्मार्थमिच्छामिस्पर्शान्त्वचिगताश्चये।तस्मान्मेनिर्जितोवायुर्वशेतिष्ठतिनित्यदा।
नाहमात्मार्थमिच्छामिशब्दान्श्रोत्रगतानपि।तस्मान्मेनिर्जिताःशब्दावशेतिष्ठंतिनित्यदा।नाहमात्मार्थमिच्छा
मिमनोनित्यंमनोंतरे।मनोमेनिर्जितंतस्माद्वशेतिष्ठतिसर्वदा।देवेभ्यश्चपितृभ्यश्चभूतेभ्योतिथिभिःस
ह।इत्यर्थंसर्वएवेमेआरंभाःसंभवंतिमे।ततःप्रहस्यजनकंब्राह्मणःपुनरब्रवीत्।त्वज्जिज्ञासार्थमद्येह
विद्धिमांधर्ममागतं।त्वमस्यब्रह्मलाभस्यबुध्याद्यारम्यानिवर्तितः।सत्वनेमिनिरुद्धस्यचक्रस्यैकःप्रवर्तते।
इत्याश्वमेधिकेपर्वणिब्राह्मणगीतासु॥ब्राह्मणउ०।नाहंतथाभीरुचरामिलोकेयथात्वंमांतर्कयसिस्व
बुद्ध्या।विप्रोस्मिमुक्तोस्मिवनेचरोस्मिगृहस्थधर्माब्रह्मचारीतथास्मि।नाहमस्मियथामांत्वंपश्यसेचक्षु
षा।भुक्तंमयाव्याप्तमिदंसर्वंयत्किंचिज्जगतीगतं।येकेचिज्जंतवोलोकेजंगमास्थावराश्चहतेषांमामं
तकंविद्धिदारूणामिवपावकं।राज्यंपृथिव्याःसर्वस्याअथवापित्रिविष्टपं।महाबुद्धिरियंमेस्तिबुद्धिरे
वधनंमम।एकःपंथाब्राह्मणानांयेनगच्छंतितद्विदः।गृहेषुवनवासेषुगुरुवासेषुभिक्षुषु।लिंगेर्बह्वभि
रव्यग्रैरेकाबुद्धिरुपास्यते।नानालिंगाश्रमस्थानांयेषांबुद्धिःशमात्मिका।तेभावमेकमायांतिसरितःसा २६

गरं यथा॥ बुद्ध्या यं गम्यते मार्गः शरीरेण न गम्यते। आद्यंतवंति कर्माणि शरीरं कर्मबंधनं। तस्मात्ते सुभगे नास्ति पर
लोककृतं भयं। तद्भावभावनिरता मामवेक्ष्यस्य थात्मना॥ इत्याश्वमेधिके पर्वणि ब्राह्मणगीतासु॥ ब्राह्मण्यु
वाच॥ नेदमल्पात्मना शक्यं वेदितुं नाकृतात्मना। बहु चाल्पं च संक्षिप्तं विप्लुतं च मतं मम। उपायं तु मम ब्रूहि
येनैषा लभ्यते मतिः। तं मन्ये कारणतमं यत एषा प्रवर्त्तते। ब्राह्मण उ॰ अरणीं ब्राह्मणीं विद्धि गुरुं तस्योत्तरार
णिं। तपः श्रुते हि मथ्नीते ज्ञानाग्निर्जायते ततः। ब्राह्मण्युवाच। यदिदं ब्रह्मणो लिंगं क्षेत्रज्ञ इति संज्ञितं। ग्र
हीतुं येन तच्छक्यं लक्षणं तस्य तद्वद। ब्राह्मण उ॥ अलिंगो निर्गुणश्चैव कारणं नास्य विद्यते। उपायमस्य वक्ष्या
मि येन गृह्येत वा न वा। सम्यगुपायो दृष्टोस्य भ्रमरैरिव लक्ष्यते। कर्मबुद्धिरबुद्धित्वात् ज्ञानलिंगैरनाश्रि
तं। इदं कार्यमिदं नेति न मोक्षेषूपदिश्यते। पश्यतः शृण्वतो बुद्धिरात्मनो येषु जायते। यावंत इह शक्येनस्ता
वतोंशान्प्रकल्पयेत्। अव्यक्तान्व्यक्तरूपांश्च शतशोथ सहस्रशः। सर्वान्नानात्वयुक्तांश्च सर्वान्प्रत्यक्षहे
तुकान्। यतः परं न विद्येत ततोभ्यासे भविष्यति। ततस्तु तस्या ब्राह्मण्या मतिक्षेत्रज्ञसंक्षये। क्षेत्रज्ञादेव प
रतः क्षेत्रज्ञांताः प्रवर्त्तते। अर्जुन उ॰ क्व नु सा ब्राह्मणी कृष्ण क्व चासौ ब्राह्मणर्षभः। याभ्यां सिद्धिरियं प्राप्ता
तावुभौ वद मेऽच्युत। श्रीभगवानुवाच। मनो मे ब्राह्मणं विद्धि ब्राह्मणीं बुद्धिमेव च। क्षेत्रज्ञ इति यः प्रोक्तः सो
हमेव धनंजय। इत्याश्वमेधिके पर्वणि ब्राह्मणगीतासु॥ अर्जुन उ॰ ब्रह्म वै यत्परं वेद्यं तन्मे व्याख्यातुमर्ह
सि। भवतो हि प्रसादेन सूक्ष्मे मे रमते मनः। श्रीभगवानुवाच॥ अत्राप्युदाहरंतीममितिहासं पुरातनं। सं
संवादं मोक्षसंयुक्तं शिष्यस्य गुरुणा सह। कश्चिद्ब्राह्मणमासीनं आचार्यं संशितव्रतं। शिष्यः पप्रच्छ मे

धावी श्रेयः किं स्वित्परं तप। भगवंतं प्रपन्नो हं निःश्रेयसपरायणं। याचे त्वां शिरसा विप्र यच्छ्रेयांस्तद्विवक्ष्व मे। तमेवंवा
दिनं विप्रं शिष्यं गुरुरुवाच ह। कथयस्व प्रवक्ष्यामि यत्र ते संशयो द्विजं। इत्युक्तः स गुरुश्रेष्ठ गुरुणा गुरुवत्सलः
प प्रांजलिः परिपप्रछ तत्स्म शृणुष्व महामते। शिष्य० कुतश्चात्वं कुतश्चाहं तत्सत्यं ब्रूहि यत्परं। कुतो जातानि भूतानि स्था
वराणि चराणि च। केन जीवंति भूतानि तेषामायुः किमात्मनां॥ किं सत्यं किं तपो विप्र के गुणाः सद्भिरीरिताः। के
पंथानः शिवाः संति किं सुखं किं च दुःकृतं। केनोक्तो कर्मपंथानो ममत्वं केन विंदते। एतन्मे भगवन् प्रश्नां यथातथ्ये
न सत्तम वक्तुमर्हसि विप्रर्षे यथावदसि तत्वतः। त्वदन्यः कश्च न प्रश्नानेतान्मे वक्तुमर्हति। ब्रूहि धर्मविदां श्रेष्ठ प
रं कौतूहलं हि मे। मोक्षधर्मान्भवान्वक्तुं शक्तो लोकेषु गीयते। सर्वसंशयछेत्ता हि त्वदन्यो न हि विद्यते। संसारभी
रवश्चैव मोक्षकामास्तथा वयं। वासुदेव० तस्मै संप्रपन्नाय यथावत्परिपृछते। शिष्याय गुरुभक्ताय शांताय
प्रियवर्तिने। छायाभूताय दांताय यतये ब्रह्मचारिणे। तान्प्रश्नानब्रवीत्पार्थ मेधावी सधृतव्रतः। गुरुः कुरुकु
लश्रेष्ठ सम्यक्सर्वमरिंदम। गुरु० ब्रह्मप्रोक्तमिदं धर्ममृषिप्रवरसेवितं। वेदविद्यासमवाप्तं तत्र तत्वार्थभा
वनं। ज्ञानत्वेव परं विद्मः सन्यासं तप उत्तमं। यस्तु वेद निराबाधं ज्ञानतत्वं विनिश्चयात्। सर्वभूतस्थमात्मानं स
सर्वगतिरिष्यते। यो विद्वान्सहवासं च विवासं चैव पश्यति। तथैकत्वे नानात्वे स दुःखात्परिमुच्यते। यो न कामयते
किंचित्न किंचिदभिमन्यते। इहलोकस्थ एवैष ब्रह्मभूयाय कल्पते। प्रधानगुणतत्वज्ञः सर्वभूतविधानवित्। नि
र्ममो निरहंकारो मुच्यते नात्र संशयः। अव्यक्तबीजप्रभवो बुद्धिस्कंधमयो महान्। महाहंकारविटप इंद्रियांकुरको
टरः। महाभूतविशेषश्च विशेषप्रतिशाखवान्। सदापर्णः सदापुष्पः शुभाशुभफलोदयः। आजीवः सर्वभूतानां २७

ब्रह्मबीजः सनातनं।एतत्तु ज्ञात्वा त्वरा तेन ज्ञानेन परमासिना।छित्वा चामरतां प्राप्य जहातीमं मृत्युजन्मनी।
मृततत्त्व्यक्तविष्यादिधर्मकामार्थनिश्चयं।सिद्धसंघपरिज्ञातं पुराकल्पं सनातनं।प्रवक्ष्येहं महाप्राज्ञ पदमु
त्तममद्य ते।बुध्वा यदिह संसिद्धा स्तवंतीह मनीषिणः।उपागम्यर्षयः पूर्वं जिज्ञासंतः परस्परं।बृहस्पतिर्भर
द्वाजो गौतमो भार्गवस्तथा।वसिष्ठः कश्यपश्चैव विश्वामित्रोऽत्रिरेव च।मार्गान्सर्वानतिक्रम्य परिश्रांताः स्व
कर्मभिः।ऋषिमांगिरसं वृद्धं पुरस्कृत्य तु ते द्विजाः।ददृशुर्ब्रह्मभुवने ब्रह्माणं वीतकल्मषं।तं प्रणम्य महात्मानं
सुखासीनं महर्षयः।पप्रच्छुर्विनयोपेता निःश्रेयसमिदं परं।कथं कर्म क्रियः साधु कथं मुच्येत किल्बिषात्।
के नो मार्गाः शिवाश्च स्युः किं सत्यं किं च दुःकृतं।केनोभौ कर्मणा मार्गौ प्राप्नुयुर्दक्षिणोत्तरौ।प्रलयं चापवर्गं च
भूतानां प्रभवाव्ययौ।आश्वमेधिके गुरुशिष्यसंवादे।गुरुः इत्युक्तः स मुनिःश्रेष्ठैर्यदाह प्रपितामहः।तत्ते
हं संप्रवक्ष्यामि शृणु शिष्य यथातथं।ब्रह्मोवाच।सत्याद्भूतानि जातानि स्थावराणि चराणि च।तपसा तानि जी
वंति इति इति तद्वित सुव्रताः।स्वां योनिं पुनराक्रम्य वर्तंते स्वेन कर्मणा।सत्यं हि गुणसंयुक्तं नियतं पंचलक्षणं।ब्र
ह्म सत्यं तपः सत्यं सत्यं चैव प्रजापतिः।सत्याद्भूतानि जायंते भूतं सत्यं ध्रुवं महत्।तस्मात्सत्याश्रया विप्रा नित्यं यो
गपरायणाः।अतीतक्रोधसंतापा नियता धर्मसेतवः।अन्योन्यान्सुनियतान्वैद्यान्धर्मसेतुप्रवर्तकान्।तान
हं संप्रवक्ष्यामि शाश्वताँल्लोककृतश्च नाना।चातुर्विद्यं तथा वर्णांश्चतुरश्चाश्रमान्पृथक्।धर्ममेकं चतुःपादं नि
त्यमाहुर्मनीषिणः।पंथानं वः प्रवक्ष्यामि शिवं क्षेमकरं द्विजाः।नियतं ब्रह्मभावाय गतं पूर्वं मनीषिभिः।गदतस्तं
ममाद्येह पंथानं दुर्विदं परं।निबोधत महाभागा निखिलेन परं पदं।ब्रह्मचारिकमेवाहुराश्रमं प्रथमं परं।
गार्हस्थ्यं तु द्वितीयं स्यात् वानप्रस्थमतः परं।ततः परं तु विज्ञेयमध्यात्मं परमं पदं।ज्योतिराकाशमादित्यो वा

पुरींद्रः प्रजापतिः। नापैति यावदध्यात्मं तावदेतान्न पश्यति। तस्योपायं प्रवक्ष्यामि पुरस्तात्तन्निबोधत। फलमूलानि
लभुजां मुनीनां वसतां वने। वानप्रस्थं द्विजातीनां त्रयाणामुपदिश्यते। सर्वेषामेव वर्णानां गार्हस्थ्य विधि
रुच्यते। श्रद्धालक्षणमित्येतद्धर्मं धीराः प्रचक्षते। इत्येते देवयाना वै पंथानः परिकीर्तिताः। तसमध्यसितादी
रैः कर्मभिर्धर्मसेतवः। एतेषां पृथगध्यास्ते यो धर्मं संशितव्रतः। कालात्पश्यति भूतानां सततं प्रभवाप्ययौ।
अतस्तत्त्वानि वक्ष्यामि याथातथ्येन हेतुना। विषयस्थानि सर्वाणि वर्तमानानि भागशः। महान्बुद्धिस्तथा
व्यक्तमहंकारस्तथैव च। इंद्रियाणि दशैकं च महाभूतानि पंच च। विशेषाः पंचभूतानां इत्येषा वैदिकी श्रु
तिः। चतुर्विंशतिरेका च तत्त्वानां परिकीर्तिता। तत्त्वानामथ यो वेद सर्वेषां प्रभवाप्ययौ। स धीरः सर्वभूते
षु न मोहमधिगच्छति। तत्त्वानि यो वेदयते यथातथं गुणांश्च सर्वान्निखिलाश्च देवताः। विधूतपाप्मा प्रवि
मुच्य बंधनं स सर्वलोकानमलान्समश्नुते। इत्याश्वमेधिके ब्रह्मगीतासु।। ब्रह्मोवाच।। तदव्यक्तमनुद्रिक्तं
सर्वव्यापि ध्रुवं स्थिरं। नवद्वारं पुरं विद्यात्त्रिगुणं पंचधातुकं। एकादशपरिक्षिप्तं मनो व्याकरणात्मकं। बुद्धिस्वा
मिकमित्येतत्परमेकादशं भवेत्। त्रीणि स्रोतांसि यान्यस्मिन्नाप्याययंते पुनः पुनः। प्रणाड्यस्तिस्र एवैताः
प्रवर्तंते गुणात्मिकाः। तमो रजस्तथा सत्त्वं गुणानेतान्प्रचक्षते। अन्योन्यमिथुनाः सर्वे तथान्योन्यानुवर्ति
नः। अन्योन्यापाश्रयाश्चापि तथान्योन्यानुपाश्रयाः। अन्योन्यव्यतिषक्ताश्च त्रिगुणाः पंचधातवः। तमसो मि
थुनं सत्त्वं सत्त्वस्य मिथुनं रजः। रजसश्चापि सत्त्वं स्यात्सत्त्वस्य मिथुनं तमः। नियम्यते तमो यत्र रजस्तत्र प्र
वर्तते। नियम्यते रजो यत्र सत्त्वं तत्र प्रवर्तते। नैशात्मकं तमो विद्यात्त्रिगुणं मोहसंज्ञितं। अधर्मलक्षणं चै
व नियमं पापकर्मसु। प्रवृत्त्यात्मकमेवाहू रजः पर्यायवाचकं। प्रवृत्तं सर्वभूतेषु दृश्यमुत्पत्तिलक्षणं।। २८

चापंसर्वस्तत्तेषुलाघवंश्रद्दधानता।सात्विकंरूपमेवंतुलाघवंसाधुसंमतं।एतेषांगुणसत्वानांलिख्यतेहेतु
हेतुभिः।समासव्याससयुक्तानितत्वतस्तानिचिंतयेत्।संमोहोमनसस्त्यागःकर्मणांमचिनिर्णयः।स्वप्न
स्तंभोभयंलोभःशोकःसुकृतिदूषणं।अस्मृतिश्चाविवेकश्चनास्तिक्यंभिन्नवृत्तिता।निर्विशेषत्वमंधत्वं
जघन्यगुणवृत्तता।अकृतेकृतमानित्वंअज्ञानेज्ञानमानिता।अमैत्रीविकृताभावोअश्रद्धामूढभावना।
अनार्जवमसाम्यंचकर्मपाकमचेतना।गुरुत्वंसन्नभावत्वंअसितत्वमवागतिः।सर्वएतेगुणाविज्ञास्तामस
साः परिकीर्तिताः।येचान्येनियताभावालोकेस्मिन्मोहसंज्ञिताः।तत्रतत्रनियम्यंतेसर्वेतेतामसागुणाः।परिवा
दकथानित्यंदेवब्राह्मणनिंदकाः।अत्यागश्चाभिमानश्चमोहोमन्युस्तथाक्षमः।मत्सरश्चैवभूतेषुतामसंवृत्त
मुच्यते।वृथारंभाश्चयेकेचिद्वृथादानानियानिच।वृथाभक्षणमित्येतत्तामसंवृत्तमुच्यते।अतिवाद
विचित्साचमात्सर्यमतिमानता।अश्रद्दधानताचैवतामसंवृत्तमिष्यते।एवंविधास्तुयेकेचित्लोकेस्मि
न्पापकर्मिणः।मनुष्याभिन्नमर्यादाःसर्वेतेतामसाजनाः।तेषांयोनिंप्रवक्ष्यामिनियतंपापकर्मिणां
अर्वाक्निरयभावायतिर्यक्निरयगामिनः।स्थावराणिचभूतानिपशवोवाहनानिच।क्रव्यादादंदश
काश्चकृमिकीटविहंगमाः।अंडजाजंतवोयेचसर्वेचापिचतुष्पदाः।उन्मत्ताबधिरामूकायेचान्येपापरो
गिणः।मग्नास्तमसिदुर्वृत्ताःस्वकर्मकृतलक्षणाः।अर्वाक्स्रोतसइत्येतेमग्नास्तमसितामसाः।तेषामुत्कर्ष
मुद्रेकंवक्ष्याम्यहमतःपरं।यथातेसुकृतान्लोकान्लभंतेपुण्यकर्मिणां।स्वकर्मनिरतानांचब्राह्मणा
नांजयोषिणां।संस्कारेणोर्ध्वमायांतियतमानाःसलोकतां।स्वर्गंगच्छंतिदेवानांइत्येषावैदिकीश्रुतिः।अन्यथाप्र

तिपन्नास्तु विहृष्टाः स्वेषु कर्मसु । पुनरावृत्तिकर्माणस्ते नर्त्तीह मानुषाः । पापयोनिसमापन्नाश्चांडालाम
कचूचुपाः । वर्णान्पर्यायशश्चापि प्राप्नुवंत्युत्तरोत्तरं । शूद्रयोनिमतिक्रम्य ये यान्ये तामसा गुणाः । श्रोतो मध्यमभा
गम्य वर्त्तते तामसे गुणे । अभिगमश्च कामेषु महामोह इति स्मृतः । ऋषयः पितरो देवा मुह्यंते त्र सुखेप्सवः । तमो
मोहो महामोहस्तामिश्रो ह्यंधसंज्ञितः । मरणं अंधतामिस्रं तामिस्रं क्रोध उच्यते । तत्र वृत्तो गुणतश्चैव जातित
श्चैव तत्वतः । सर्वमेतत्तु मे विप्राः कीर्त्तितं वो यथाविधि । को न्वेतत्पश्यते साधुः को न्वेतत्साधु मन्यते । अतत्वे तत्व
दर्शी यस्तमसस्तच्च लक्षणं । तमोगुणा वो बहुधा प्रकीर्त्तिता यथावियुक्तं च तमः परावरं । नरो हि यो वेद गुण
निमान्सदा स तामसैः सर्वगुणैः प्रमुच्यते । इत्याश्वमेधिके गुरुशिष्यसंवादः ॥ ब्रह्मोवाच ॥ रजोहं संप्रवक्ष्या
मि यथा सत्यं तथ्येन सत्तमाः । निबोधत महाभागा गुणवृत्तं सर्वशः । संघातो रूपमायासः सुखदुःखे हि
मातपौ । ऐश्वर्यं विग्रहः संधिर्हेतुवादोऽरतिः क्षमा । बलं शौर्यं मदो रोषो व्यायामकलहावपि । ईर्ष्येप्सा पैशुनं
युद्धं ममत्वं परिपालनं । वधबंधपरिक्लेशाः क्रयो विक्रय एव च । छिंधि भिंधि विद्धि ति वचनं परधर्मावकर्त्तनं । उग्रं
दारुणमाक्रोशं परवित्तानुजीवनं । लोकचिंतातिचिंता च मत्सरः परिपालनं । मृषावाक्यं मृषादानं विकल्प
परिकत्थनं । निंदा स्तुतिः प्रशंसा च प्रतापः परिसर्प्पणं । परेषां चैव शुश्रूषा सेवा तृष्णा व्यपाश्रयः । व्यूहो मो
हः प्रमोदश्च परितापः परिग्रहः । संस्कारा इति लोकेस्मिन्प्रवर्त्तते पृथक्पृथक् ॥ नरेषु नारीषु द्रव्येषु तेषु
वरणेषु च । संतापोऽप्रत्ययश्चैव व्रतानि नियमाश्च ये । आशीर्युक्तानि कर्माणि पौर्त्ताणि विविधानि च । स्वधा २९
कारो वषट्कारः स्वाहाकारो नमस्क्रिया । याजनाध्यापने चोभे तथैवाहुः प्रतिग्रहं । इदं मे स्यादिदं मे स्यात्

स्त्रि हो गुणास मुद्भवः। स्तैन्यं हिंसा परीवादः परितापप्रजागरः। दंभो दर्पोथ रागश्च भक्तस्य प्रीतिमोदनं। द्यूतं च ज
नवादश्च संबंधस्त्रीकृताश्च यः। नृत्यवादित्रगीतानि प्रसंगा ये न केन वा। सर्व एते गुणा विप्रा राजसा परिकीर्ति
ताः। भूतभव्यविष्याणां भावानां भुवि भावना। त्रिवर्गनिरतानित्यं धर्मोर्थः काम इत्यपि। कामवृत्ताः प्रमो
दंते सर्वकामसमृद्धिभिः। अर्वाक्स्रोतस इत्येते राजसा रजसावृताः। अस्मिन् लोके प्रमोदंते जायमानाः पुनः
पुनः। प्रेत्यभावकरीं सिद्धिं ईहंते राजसा जनाः। ददंति प्रतिगृह्णंति जपंत्यथ च जुह्वति। रजोगुणा मे बहुधानुकी
र्तिता यथावदुक्तं गुणवृत्तमेव च। नरो हि यो वेद गुणानिमान् सदा स राजसैः सर्वगुणैर्विमुच्यते॥ इत्याश्वमेधि
के पर्वणि॥ ब्रह्मोवाच। अतः परं प्रवक्ष्यामि तृतीयं गुणमुत्तमं। सर्वभूतहितं लोके सतां धर्ममनिंदितं। आ
नंदः प्रीतिरुद्रेकः प्राकाश्यं सुखमेव च। अकार्पण्यमसंरंभः संतोषः श्रद्दधानता। क्षमा धृतिरहिंसा च सम
ता सत्यमार्जवं। अक्रोधश्चानुसूया च शौचं दाक्ष्यं पराक्रमं। मुधा ज्ञानं मुधा वित्तं मुधा सेवा मुधाश्रमः।
एवं यो युक्तधर्मः स्यात्सोमुत्रात्यंतमश्नुते। निर्ममो निरहंकारो निराशीः सर्वतः समः। अकामहत इत्येवं
सतां धर्मः सनातनः। विश्रंभो ह्रीस्तितिक्षा च त्यागः शौचमतंद्रिता। आनृशंस्यमसंमोहो दया भूतेष्वपैशु
नं। हर्षस्तुष्टिर्विस्मयश्च विनयः साधुवृत्तता। शांतिकर्म विशुद्धिश्च शुभा बुद्धिर्विमोचनं। उपेक्षा ब्रह्मच
र्यं च परित्यागश्च सर्वशः। निर्ममत्वमनाशीत्वमपरिक्षीतधर्मता। मुधा दानं मुधा यज्ञं मुधाधीतं मुधा
व्रतं। मुधा प्रतिग्रहश्चैव मुधा धर्मो मुधा तपः। एवंवृत्तास्तु ये केचित् लोकेस्मिन् सत्वसंश्रयाः। ब्राह्मणा ब्र
ह्मयोनिस्था स्ते धीरा साधुदर्शिनः। हित्वा सर्वाणि पापानि निःशोका ह्यजरामराः। दिवं प्राप्य तु ते धीरा कुर्व

तेबै ततस्ततः। ईशित्वं च वशित्वं च लघुत्वं मनसश्च ते। ये ऊर्वंति महात्मानो देवास्ते दिविगा इव। ऊर्ध्वस्रोतासिद
द्येता देवा वैकारिकास्मृताः। विकुर्वंति प्रकृत्या वै दिवं प्राप्तास्ततस्ततः। यद्य दिछंति तत्सर्वं सृजंते विभजंति च। एतद्वि
ज्ञाय विधिवत्कल्पते यद्य दिछति। इत्येतत्सात्विकं वृत्तं कथितं वो द्विजर्षभाः। प्रकीर्तिताः सत्वगुणा विशेषतो यथा
वदुक्तं गुणवृत्तमेव वा। नरस्तु यो वेद गुणानिमान्सदा गुणांश्च भुंक्ते न गुणैः स युज्यते। इत्याश्वमेधिके ब्राह्म
णगीतासु॥ ब्रह्मोवाच। नैव शक्या गुणा वक्तुं पृथक्त्वेनेह सर्वशः। अविछिन्नानि दृश्यंते रजः सत्वं तमस्तथा।
अन्योन्यमत्तिसज्जंते अन्योन्यं चानुजीविनः। अन्योन्यापाश्रयाः सर्वे तथान्योन्यानुवर्तिनः। यावत्सत्वं तमस्ता
वत्वर्तते नात्र संशयः। यावत्तमश्च सत्वं च रजस्तावदिहोच्यते। संहिताः संकुर्वंति यात्रां संहिताः संघचारिणः।
संघातवृत्तयो ह्येते वर्त्तंते हेत्वहेतुभिः। उद्रेकव्यतिरिक्तानां तेषामन्योन्यवर्तिनां। वक्ष्यते तद्यथा न्यूनं व्यतिरिक्तं
च सर्वशः। व्यतिरिक्तं तमो यत्र तिर्यग्भावगतं भवेत्। अल्पं तत्र रजो ज्ञेयं सत्वमल्पतरं तथा। उद्रिक्तं तु रजो य
त्र मध्यस्रोतोगतं भवेत्। अल्पं तत्र तमो ज्ञेयं सत्वं चाल्पतरं ततः। सत्वं वैकारिकं योनिरिंद्रियाणां प्रकाशितां। न
हि सत्वात्परो भावः कश्चिदन्यो विधीयते। ऊर्ध्वं गछंति सत्वस्था मध्ये तिष्ठंति राजसाः। जघन्यगुणयुक्तास्तु यां
त्यधस्तामसा जनाः। तमः शूद्रे रजः क्षत्रे ब्राह्मणे सत्वमुत्तमं। इत्येवं त्रिषु वर्णेषु निवसंति गुणास्त्रयः। दूराद
पि हि दृश्यंते सहिताः संघचारिणः। तमः सत्वं रजश्चैव पृथक्त्वं नानुशुश्रुमः। दृष्ट्वा चादित्यमुद्यंतं कुचोराणां
भयं भवेत्। अध्वगाः परितप्येयुर्घर्मार्त्ता दुःखभागिनः। आदित्यः सत्वमुद्दिष्टं कुचोरास्तु यथा तमः। परि
तापोध्वगानां च राजसो गुण उच्यते। प्रकाश्यं सत्वमादित्ये संतापो राजसो गुणः। उपप्लवस्तु विज्ञेयस्तामसस्तु ३०

स्य पर्वसु एवं ज्योतिषु सर्वेषु निवर्त्तते गुणास्त्रयः। पर्यायेण प्रवर्त्तंते तत्र तत्र यथा तथा॥ स्थावरेषु च यत्तेषु तिर्य
ग्भावगतं तमः। राजसास्तु विवर्द्धंते स्नेहस्तावत्तु सात्विकः॥ अहस्त्रिधा तु विज्ञेयं त्रिधा रात्रिर्विधीयते। मासार्द्धमास
वर्षाणि ऋतवः संधयस्तथा॥ त्रिधा दत्तानि दीयंते त्रिधा यज्ञः प्रवर्त्तते। त्रिधा लोकस्त्रिधा वेदास्त्रिधा विद्यास्त्रिधा ग
तिः॥ भूतं भव्यं भविष्यच्च धर्मोऽर्थः काम इत्यपि। प्राणापानावुदानश्चाप्येत एव गुणास्त्रयः॥ पर्यायेण प्रवर्त्तंते तत्र
तत्र तथा तथा॥ यत्किंचिदिह वै लोके सर्वमेवैव तत्तु त्रिषु॥ त्रयो गुणाः प्रवर्द्धंते अव्यक्ता नित्यमेव तु॥ सत्वं रजस्त
मश्चैव गुणसर्गः सनातनः॥ तमो व्यक्तं शिवं नित्यं अयो योनिः सनातनः। प्रकृतेर्विकारः प्रलयः प्रधानं प्रभवाप्य
यो॥ अनुद्रिक्तमतंतं त्वं अकंप्यमचलं ध्रुवं॥ सदसच्चैव तत्सर्वमंतव्यं त्रिगुणं स्मृतं॥ ज्ञेयानि नामधेयानि नरै
रध्यात्मचिंतकैः॥ अव्यक्तनामानि गुणांश्च तत्त्वतो यो वेद सर्वाणि गतीश्च केवलाः॥ विमुक्तदेहः प्रविभागत
वित् स मुच्यते सर्वगुणैरनामयः॥ इत्याश्वमेधिके पर्वणि गुरुशिष्यसंवादे॥ ब्रह्मोवाच॥ अव्यक्तात्पूर्वमुत्प
न्नो महानात्मा महामतिः॥ आदिर्गुणानां सर्वेषां प्रथमः सर्ग उच्यते॥ महानात्मा मतिर्विष्णुर्विश्वः शंभुश्च वीर्यवा
न्॥ बुद्धिः प्रज्ञोपलब्धिश्च तथा ख्यातिः धृतिः स्मृतिः॥ पर्यायवाचकैः शब्दैर्महानात्मा विबोध्यते॥ तं जानन् ब्रा
ह्मणो विद्वान् प्रमोहं नाधिगच्छति॥ सर्वतः पाणिपादश्च सर्वतोक्षिशिरोमुखः॥ सर्वतः श्रुतिमल्लोके सर्वमावृ
त्य तिष्ठति॥ महाप्रभार्चिः पुरुषः सत्वस्य हृदि निश्रितः॥ अणिमा लघिमा प्राप्तिरीशानो ज्योतिरव्ययः॥ तत्र बुद्धिवि
दो लोके सन्यासनिरताश्च ये। ध्यानिनो नित्ययोगाश्च सत्यसंधा जितेंद्रियाः॥ ज्ञानवंतश्च ये केचित् अलुब्धा जित
मन्यवः॥ प्रसन्नमनसो धीरा निर्ममो निरहंकृताः॥ विमुक्ताः सर्व एवैते महत्वमुपयांति वै॥ आत्मनो महतो वेद यः पु

ष्यांगतिमुत्तमां।अहंकारात्प्रसूतानिमहाभूतानिपंचवै।पृथिवीवायुराकाशमापोज्योतिश्चपंचमं।तेषुभूतानियु
ज्यंतेमहाभूतेषुपंचसु।तेशब्दस्पर्शरूपरसगंधक्रियासुच।महाभूतविनाशांतेप्रलयेप्रत्युपस्थिते।सर्वप्राणभृ
तांधीरामहदुत्पद्यतेभयं।सधीरःसर्वलोकेषुनमोहमधिगच्छति।विष्णुरेवादिसर्गेषुस्वयंभूर्भवतिप्रभुः।एवंहि
योवेदगुहाशयंविभुंनरः।पुराणंपुरुषंविश्वरूपं।हिरण्मयंबुद्धिमतांपरांगतिं।सबुद्धिमान्बुद्धिमतीत्य
तिष्ठति।इत्याश्वमेधिकेपर्वणि॥ब्रह्मोवाच॥यद्यस्माज्जायतेभूतंतत्तुतत्रप्रलीयते।लीयंतेप्रतिलोमानिजा
यंतेचोत्तरोत्तरं।ततःप्रलीयतेसर्वंभूतंस्थावरजंगमं।स्मृतिमंतस्तथाधीरानलीयंतेकदाचन।शब्दःस्प
र्शस्तथारूपंरसोगंधश्चपंचमः।क्रियाकरणयुक्ताःस्युरनित्यामोहसंज्ञिताः।लोभप्रजनसंयुक्तानिर्विशेषा
ह्यकिंचनाः।मांसशोणितसंघाताअन्योन्यस्योपजीविनः।बहिरात्मानइत्येतेदीनाःकृपणवृत्तयः।प्राणापाना
वुदानश्चसमानोव्यानएवच।अंतरात्मनिचाप्येतेनियताःपंचवायवः।वाङ्मनोबुद्धिरित्येभिःसार्धमष्टा
त्मकंजगत्।त्वक्श्रोत्रंघ्राणचक्षुश्चरसनंवाक्चसंयतं॥विशुद्धंचमनोयस्यबुद्धिश्चाव्यभिचारिणी॥अ
ष्टौयस्याग्नयोह्येतेनदहंतेमनःसदा।सतद्ब्रह्मपरंयातियस्माद्भूयोनविद्यते।एकादशचयान्याहुरिं
द्रियाणिविशेषतः।अहंकारप्रसूतानितानिवक्ष्याम्यहंसदा।श्रोत्रंत्वक्चक्षुषीजिह्वानासिकाचैवपं
चमी।पादौपायुरुपस्थश्चहस्तौवाक्दशमीभवेत्।इंद्रियग्रामइत्येषमनएकादशंभवेत्।एतंग्रामंजये
त्पूर्वंततोब्रह्मप्रकाशते।बुद्धींद्रियाणिपंचाहुःपंचकर्मेंद्रियाणिच।श्रोत्रादीन्यपिपंचाहुर्बुद्धियुक्तानि
तत्त्वतः।अविशेषाणिचान्यानिकर्मयुक्तानितानिच।उभयत्रमनोज्ञेयंबुद्धिर्द्वादशमीभवेत्।इत्युक्तानींद्रि
याणीमान्येकादशमयाक्रमात्।मन्यंतेकृतमित्येवविदित्वैतानिपंडिताः।त्रीणिस्थानानिभूतानिचतुर्थंनो ३१

पलक्ष्यते। स्थूलमापस्तथाकाशं जन्म चापि चतुर्विधं। अंडजानि विजानीयात् सर्वांश्चैव सरीसृपान्। स्वेदा
कृमयः प्रोक्ता जंतवश्च तथाविधाः। जन्म द्वितीयमित्येतत् जघन्यतरमुच्यते। भित्त्वा तु पृथिवीं यानि जायंते का
लपर्ययात्। उद्भिज्जानीति तान्याहुर्भूतानि द्विजसत्तमाः। द्विपाद्बहुपादानि तिर्यग्गतिमतीनि च। जरायु
जानि भूतानि विद्धि तान्यपि सत्तमाः। द्विविधापीह विज्ञेया ब्रह्मयोनिः सनातना। तपः कर्म च यत्पुण्यं इत्येव
विदुषां नयः। द्विविधं कर्म विज्ञेयं इज्या दानं च यन्मखे। जातस्याध्ययनं पुण्यं इति वृद्धानुशासनं। एतद्यो वे
द विधिवत् स मुक्तः स्याद्द्विजोत्तमाः। विमुक्तः सर्वपापेभ्य इति चैव निबोधत। आकाशं प्रथमं भूतं। श्रोत्रमध्य
ध्यात्ममुच्यते। अधिभूतं तथा शब्दो दिशश्चात्राधिदैवतं। द्वितीयं मारुतं भूतं त्वगध्यात्मं च विश्रुतं। स्प्रष्टव्य
मधिभूतं च विद्युत्तत्राधिदैवतं। तृतीयं ज्योतिरित्याहुश्चक्षुरध्यात्ममुच्यते। अधिभूतं तथा रूपं सूर्यस्तत्रा
धिदैवतं। चतुर्थमापो विज्ञेयं जिह्वा चाध्यात्ममुच्यते। अधिभूतं रसश्चात्र सोमस्तत्राधिदैवतं। पृथिवी
पंचमं भूतं घ्राणं चाध्यात्ममिष्यते। अधिभूतं तथा गंधः दस्रो तत्राधिदैवतं। एष पंचसु भूतेषु चतुष्टयवि
धिः स्मृतः। इत्याश्वमेधिके पर्वणि। ब्रह्मोवाच॥ अतः परं प्रवक्ष्यामि सर्वं विविधमिंद्रियं। पादावध्यात्म
मित्याहुर्ब्राह्मणास्तत्त्वदर्शिनः। अधिभूतं तु गंतव्यं विष्णुस्तत्राधिदैवतं। अधोगतिरपानश्च पायुर
ध्यात्ममिष्यते। अधिभूतं विसर्गश्च मित्रस्तत्राधिदैवतं। प्रजनः सर्वभूतानां उपस्थो ध्यात्ममिष्यते। अ
धिभूतं तथा शुक्रं दैवतं च प्रजापतिः। हस्तावध्यात्ममित्याहुरध्यात्मविदो जनाः। अधिभूतं तु कर्माणि
शक्रस्तत्राधिदैवतं। वैश्वदेवमनः पूर्वा वागध्यात्ममिहोच्यते। वक्तव्यमधिभूतं च वह्निस्तत्राधिदैव

तं। अध्यात्ममनइत्याहुः पंचवृत्तानुकारणं। अधिवृत्तं तं च मंतव्यं चंद्रमाश्चाधिदैवतं। अध्यात्मं बुद्धिरित्याहुः
षडिंद्रियविचारिणी। अधिवृत्तं तु विज्ञेयं ब्रह्मा तत्राधिदैवतं। यथावदध्यात्मविधिरेष वः कीर्तितो मया।
ज्ञानमस्य हि धर्मज्ञाः प्राप्तं बुद्धिमतामिह। इंद्रियाणींद्रियार्थांश्च महाभूतानि पंच च। सर्वाण्येतानि संधाय
मनसा संप्रधारयेत्। क्षीणे मनसि सर्वस्मिन् न जन्मसुखमुच्यते। ज्ञानसंपन्नसत्वानां तत्सुखं विदुषां मतं। अ
तः परं प्रवक्ष्यामि सूक्ष्मभावकरीं शिवां। निवृत्तिं सर्वभूतेषु मृदुना दारुणेन वा। गुणागुणमनासंगमेक
चर्यमनंतरं। एतद्ब्राह्मणतो वृत्तमाहुरेकपदं सुखं। विद्वान्कूर्म इवांगानि कामान्संहृत्य सर्वशः। विरजाः सर्व
तो मुक्तो यो नरः स सुखी सदा। कामानात्मनि संयम्य क्षीणतृष्णः समाहितः। सर्वभूतसुहृन्मैत्रो ब्रह्मभूयं
स गच्छति। इंद्रियाणां निरोधेन सर्वेषां विषयैषिणां। मुनेर्जनपदत्यागात् अध्यात्माग्निः प्रदीप्यते। य
थाग्निरिंधनैरिद्धो महाज्योतिः प्रकाशते। तथेंद्रियनिरोधेन महानात्मा प्रकाशते। यदा पश्यति भूतानि
प्रसन्नात्मात्मनो हृदि। स्वयंज्योतिस्तदा सूक्ष्मं रूपमाप्नोत्यनुत्तमं। अग्निरूपं मनः स्रोतो वायुस्पर्शनमेव
च। महीपंकधरं घोरं आकाशश्रवणं तथा। रागशोकसमाविष्टं पंचस्रोतसमावृतं। रजस्वलमदृश्यं त्रि
गुणं च त्रिधातुकं। संसर्गनिरतं मूढं शरीरमिति धारणा। दुस्तरं जीवलोकेस्मिन् सत्वं प्रति समाश्रितं। एतदे
व हि लोकेस्मिन् कालचक्रं प्रवर्तते। एतन्महार्णवं घोरं अगाधं मोहसंज्ञितं। विसृजेत् संक्षिपेच्चैव बोधये
त्सामरं जगत्। कामं क्रोधं भयं मोहं अभिद्रोहमथानृतं। इंद्रियाणां निरोधेन स तांस्त्यजति दुस्त्यजान्।
यस्यैते निर्जिता लोके त्रिगुणाः पंचधातवः। व्योम्नि तस्य परं स्थानं अनंतमिति लक्ष्यते। कामकूलापहारा ३२

तांमनःश्रोतोस्त्रयावहां। नदींदुर्गह्रदांतीर्त्वा कामक्रोधौ च तौ जयेत्। स सर्वदोषनिर्मुक्तस्ततः पश्यति त
त्परं। मनो मनसि संधाय पश्यत्यात्मानमात्मना। सर्ववित् सर्वभूतेषु वीक्ष्यत्यात्मानमात्मना। एक
धा बहुधाप्येव विकुर्वाणस्ततस्ततः। ध्रुवं पश्यति रूपाणि दीपाद्दीपशतं तथा। स वै विष्णुश्च मित्रश्च
वरुणोग्निः प्रजापतिः। स हि धाता विधाता च स प्रभुः सविता सुरः। हृदयं सर्वभूतानां महानात्मा प्रकाश
ते। तं विप्रसंघाश्च सुरासुराश्च यक्षाः पिशाचाः पितरो वयांसि। रक्षोगणा भूतगणाश्च सर्वे महर्षयश्चा
पि सदा स्तुवंति॥ इत्याश्वमेधिके पर्वणि। ब्रह्मोवाच॥ मनुष्याणां च राजन्यः क्षत्रियो मध्यमो गुणः। कुंजरो
वाहनानां च सिंहश्चारण्यवासिनां॥ गवां गोवृषश्चैव स्त्रीणां पुरुषश्चैव। न्यग्रोधो जंबुवृक्षश्च पिप्पलः शा
ल्मलिस्तथा। शिंशपा मेषशृंगश्च पिप्पलेप्येव शाल्मलिस्तथा कीचकवेणवः। एते द्रुमाणां राजानो लोकेस्मिन्ना
त्र संशयः। हिमवान् पारियात्रश्च सह्यो विंध्यश्च कूटवान्। श्वेतो नीलश्च भासश्च कोष्ठवांश्चापि पर्वतः। गु
रुस्कंधो महेंद्रश्च माल्यवान् पर्वतस्तथा। एते पर्वतराजानो गणानां मारुतस्तथा। ग्रहाणामधिपः सूर्यो
नक्षत्राणां च चंद्रमाः। यमः पितॄणामधिपः सरितामथ सागरः। अंभसां वरुणो राजा मरुतामिंद्र उ
च्यते। अर्कोधिपतिरुष्णानां ज्योतिषामिंदुरुच्यते। अग्निर्भूतपतिर्नित्यं ब्राह्मणानां बृहस्पतिः। सोमो
नक्षत्रराजस्तु विष्णुर्बलवतां वरः। त्वष्टाधिराजो रूपाणां पशूनामीश्वरः शिवः। दीक्षितानां यथा यज्ञो
विदानां मघवस्तथा॥ दिशामुदीची विप्राणां सोमो राजा प्रतापवान्। कुबेरः सर्वरत्नानां देवानां च पुरंद
रः। एष भूताधिपः सर्गः प्रजानां च प्रजापतिः। सर्वेषामेव भूतानामहं ब्रह्ममयो महान्। भूतं परतरं म

त्रो विष्णोर्नान्यश्च विद्यते। राजाधिराजः सर्वेषां विष्णुर्ब्रह्ममयो महान्। ईश्वरं तं विजानीहि स विष्णुः स प्र
जापतिः। नरकिंनरयक्षाणां गंधर्वोरगरक्षसां। देवदानवनागानां सर्वेषामीश्वरो हि सः। तथैव देवानुयाता
नां सर्वासां वामलोचना। माहेश्वरी महादेवी प्रोच्यते पार्वती प्रिया। उमां देवीं विजानीत नारीणामुत्त
मां तुतां। रतीनां च वसुमत्यश्च स्त्रीणामप्सरसस्तथा। धर्मकामाश्च राजानो ब्राह्मणा ब्रह्मलक्षणाः। तस्माद्रा
जा द्विजातीनां प्रयतेतेह रक्षणे। राज्ञां हि विषये येषां अनुसीदंति साधवः। हीनास्ते स्वगुणैः सर्वे प्रेत्य
चोन्मार्गगामिनः। राज्ञां तु विषये येषां साधवः परिरक्षिताः। तेस्मिन्लोके प्रमोदंते प्रेत्य चानंत्यमेव हि।
प्राप्नुवंति महात्मानः इति वित्त द्विजर्षभाः। इत्याश्वमेधिके पर्वणि॥ श्लो॰ अत ऊर्ध्वं प्रवक्ष्यामि नियतं
धर्मलक्षणं। अहिंसा लक्षणो धर्मो हिंसा चाधर्मलक्षणा। प्रकाशलक्षणा देवा मनुष्याः कर्मलक्षणाः।
शब्दलक्षणमाकाशं वायुस्तु स्पर्शलक्षणः। ज्योतिषां लक्षणं रूपं आपश्च रसलक्षणाः। धारणी सर्वभू
तानां पृथिवी गंधलक्षणा। स्वरव्यंजनसंस्कारा भारती सत्यलक्षणा। मनसो लक्षणं चिंता तथोक्ता बुद्धि
रन्वया। मनसा चिंतयानोर्थान् बुद्ध्या चाथ व्यवस्यति। बुद्धिर्हि व्यवसायेन लक्ष्यते नात्र संशयः। लक्षणं
महतो ध्यानमव्यक्तं साधुलक्षणं। तस्मात्ज्ञानं पुरस्कृत्य संन्यसेदिह बुद्धिमान्। संन्यस्य ज्ञानसंयुक्तः प्रा
प्नोति परमां गतिं। अतीतोऽद्वंद्वमप्येति तमो मृत्युजरातिगः। धर्मलक्षणमित्यर्थं एतद्वो विधिवन्मया। गुणा
नां लक्षणं सम्यग्वक्ष्याम्यहमतः परं। पार्थिवो यस्तु गंधो वै घ्राणेन हि स गृह्यते। घ्राणस्थश्च तथा वायुर्गंधज्ञा
ने विधीयते। अपां धातुरसो नित्यं जिह्वया गृह्यते रसः। जिह्वास्थश्च तथा सोमो रसज्ञाने विधीयते। ज्योति ३३

षस्तु गुणो रूपं चक्षुषा तच्च गृह्यते। चक्षुश्च तथादित्यो रूपज्ञाने विधीयते। वायव्यस्तु तथा स्पर्शस्त्वचा
प्रज्ञायते च सः॥ त्वक् चैव तथा वायुः स्पर्शज्ञाने विधीयते। आकाशस्यस्तु गुणो घोषः श्रोत्रेण स तु गृह्यते।
श्रोत्रस्थाश्च दिशः सर्वाः शब्दज्ञाने विधीयते। प्रकीर्तिताः॥ मनसस्तु गुणश्चिंता प्रज्ञया स तु गृह्यते। हृदिस्थ
श्चेतनाधातुर्मनोज्ञाने विधीयते। बुद्धेरध्यवसायेन ध्यानेन महतस्तथा। निश्चित्य ग्रहणं नित्यमव्यक्तं ना
त्र संशयः॥ अलिंगग्रहणो नित्यः क्षेत्रज्ञो निर्गुणात्मकः॥ तस्मादलिंगं क्षेत्रज्ञं केवलं ज्ञानलक्षणं। अव्यक्तं
क्षेत्रमुद्दिष्टं गुणानां प्रभवाप्ययं। सदा पश्याम्यहं लीनं विजानामि शृणोमि च। पुरुषस्तं विजानाति तस्मा
त्क्षेत्रज्ञ उच्यते। गुणवृत्तं तथा कृत्स्नं क्षेत्रज्ञः परिपश्यति। आदिमध्यावसानांतं सृज्यमानमचेतनं। न गु
णा विदुरात्मानं सृज्यमानाः पुनं पुनः॥ न सत्यं वेद वै कश्चित्क्षेत्रज्ञस्त्वेव विंदति। गुणानां गुणभूतानां
यत्परं महतो महत्। तस्माद्गुणांश्च सत्वं च परित्यज्येह तत्वविद्। क्षीणदोषो गुणान्हित्वा क्षेत्रज्ञं प्रविश
त्यथ। निर्द्वंद्वो निर्नमस्कारो निःस्वाहाकार एव च। अचलश्चानिकेतश्च क्षेत्रज्ञः स परो विभुः॥ इत्याश्व
मेधिके पर्वणि। ब्रह्मोवाच॥ यदादिमध्यपर्यंतं ग्रहणोपायमेव च। नामलक्षणसंयुक्तं सर्वं वक्ष्यामि तत्वतः॥ अ
हः सर्वं ततो रात्रि मासाः शुक्लादयः स्मृताः। अश्विन्यादीनि चर्क्षाणि ऋतवः शिशिरादयः॥ भूमिरादिश्च
गंधानां रसानामाप एव च। रूपाणां ज्योतिरादित्यः स्पर्शानां वायुरुच्यते। शब्दस्यादिस्तथाकाशमेष
भूत ततो गणः॥ अतः परं प्रवक्ष्यामि भूतानामादिमुत्तमं। आदित्यो ज्योतिषामादिरग्निर्भूतादिरुच्यते
सावित्री सर्वविद्यानां देवतानां प्रजापतिः॥ ॐकारः सर्ववेदानां वचसां प्राण एव च। यदस्मिन्नियतं लोके

सर्वसावित्रिरुच्यते।गायत्री छंदसामादिः पशूनामजमुच्यते।गावश्चतुष्पदामादिर्मनुष्याणांद्विजातयः।
श्येनश्चपतत्रिणामादिर्यज्ञानांघृतमुत्तमं।परिसर्पिणांचसर्वेषांज्येष्ठः सर्पोद्विजोत्तमाः।कृतमादिर्युगा
नांचसर्वेषांनात्रसंशयः।हिरण्यंसर्वरत्नानामोषधीनांयवास्तथा।सर्वेषांभक्ष्यभोज्यानामन्नंपर
ममुच्यते।द्रवाणांचैवसर्वेषांपेयानामापउत्तमाः।स्थावराणांचसर्वेषांक्षेत्राणामविशेषतः।ब्रह्मक्षेत्रं
सदापुण्यंप्लक्षःप्रथमजःस्मृतः।अहंप्रजापतीनांचसर्वेषांनात्रसंशयः।ममविष्णुरचिंत्यात्मास्वयंभू
रितियःस्मृतः।पर्वतानांमहामेरुःसर्वेषामग्रजःस्मृतः।दिशांचप्रदिशांचोर्ध्वादिक्पूर्वाप्रथमातथा।तथात्रि
पथगागंगानदीनामग्रजास्मृता।तथासरोदपानानांसर्वेषांसागरोग्रजः।देवदानवभूतानांपिशाचोरगरक्ष
सां।नरकिंनरयक्षाणांसर्वेषामीश्वरःप्रभुः।आदिर्विश्वस्यजगतोविष्णुर्ब्रह्ममयोमहान्।भूतंपरतरंतस्मा
त्त्रैलोक्येनेहविद्यते।आश्रमाणांचगार्हस्थ्यंसर्वेषांनात्रसंशयः।लोकानामादिरव्यक्तंसर्वस्यांतस्त
थैवच।अहान्यस्तमनांतानिउदयांताचशर्वरी।सुखस्यांतंतथादुःखंदुःखस्यांतंतथासुखं।सर्वेक्ष
यांतानिचयाःपतनांताःसमुच्छ्रयाः।संयोगाविप्रयोगांतामरणांतंहिजीवितं।सर्वंकृतंविनाशांतंजातस्य
मरणंध्रुवं।अशाश्वतंहिलोकेस्मिन्सर्वंस्थावरजंगमं।इष्टंदत्तंतपोधीतंव्रतानिनियमाश्चये।सर्वमेतद्वि
नाशांतंज्ञानस्यांतोनविद्यते।तस्माज्ज्ञानेनशुद्धेनप्रसन्नात्मासमाहितः।निर्ममोनिरहंकारोमुच्यतेस
र्वपाप्मभिः।इत्याश्वमेधिकेपर्वणि।ब्रह्मो०।बुद्धिसारंमनस्तंभंइंद्रियग्रामबंधनं।महाभूतपरिस्कंधंवि
शेषपरिवेशनं।जराशोकसमाविष्टंव्याधिव्यसनसंचरं।देशकालविचारीदंश्रमव्यायामनिःस्वनं।अहोरा
त्रपरिक्षेपंशीतोष्णपरिमंडलं।सुखदुःखार्तिसंक्लेशंक्षुत्पिपासावकीलनं।छायातपविलेखंचनिमे

बोन्मेषविह्वलं। घोरमोहजराकीर्णं वर्त्तमानमचेतनं। मासार्द्धमासगणितं विषमं लोकसंचयां तमोनियति
पंकं वरजोवेगनिवर्त्तनं। तत्वाहंकारदर्शी सत्वगुणसंघातमंडलं। अरिविग्रहनाशीकं शोकसंघातवर्त्तनं।
क्रियाकारणसंयुक्तं रागविस्तरमायतं। लोभेच्छापरिसंख्यातं विचित्रज्ञानसंभवं। भयमोहपरीवारं
भूतसंमोहकारकं। आनंदप्रीतिकारं च कामक्रोधपरिग्रहं। महदादिविशेषांतमसक्तप्रभवाव्ययं। मनो
जवमविश्रांतं कालचक्रं प्रवर्त्तते। एतद्द्वंद्वसमायुक्तं कालचक्रमचेतनं। विसृजेत्संक्षिपेच्चापि बोधयेत्
सामरं जगत्। कालचक्रस्य संयोगं प्रवृत्तिं चापि तत्वतः। यस्तु वेद नरो नित्यं न स तेषु समुह्यति। विमुक्तः
सर्वसंक्लेशैः सर्वद्वंद्वातिगो मुनिः। निर्मुक्तः सर्वपापेभ्यः प्राप्नोति परमां गतिं। गृहस्थो ब्रह्मचारी च वानप्र
स्थोथ भिक्षुकः। चत्वार आश्रमाः प्रोक्ताः सर्वे गार्हस्थ्यमूलकाः। यः कश्चिदिह लोके वा ह्यागमः संप्रकी
र्त्तितः। तस्यांतगमनं श्रेयः कीर्तिरेषा सनातनी। संस्कारैः संस्कृतः पूर्वं यथावच्चरितव्रतः। जातो गुण
विशिष्टायां समावर्त्तेत वेदवित्। स्वदारनिरतो दांतः शिष्टाचारो जितेंद्रियः। पंचभिश्च महायज्ञैः श्रद्
धानो यजेत ह। देवताथिशिष्टाशी नियतो वेदकर्मसु। इज्याप्रदानयुक्तश्च यथाशक्ति यथाश्रुति।
न पाणिपादचपलो न नेत्रचपलो मुनिः। न च वागंगचपल इति शिष्टस्य गोचरः। नित्यं यज्ञोपवीती स्यात्
शुक्लवासाः शुचिव्रतः। नियतो दमदानाभ्यां सदा शिष्टैश्च संविदं। जितशिश्नोदरो मैत्रः शिष्टाचारस
२ माहितः। वेणवीं धारयेद्यष्टिं सोदकं च कमंडलुं। अधीत्याध्यापनं कुर्यात्तथा यजनयाजने। दानं प्रति
ग्रहं चापि षट्कर्माणि द्विजन्मनां। त्रीणि कर्माणि जानीहि ब्राह्मणानां तु जीविका। याजनाध्यापने चो

त्ये शुद्धाच्चैव प्रतिग्रहः। अवरोणाणि चान्यानि त्रीणि कर्माणि यानि तु तेष्वप्रमादं कुर्वीत त्रिषु कर्मसु धर्म
वित्। दांतो मैत्रः क्रियायुक्तः सर्वसत्त्वसमो मुनिः। सर्वमेतद्यथाशक्ति ब्राह्मणो वर्त्तते शुचिः। एवं युक्तो
जयेत्स्वर्गं गृहस्थः संशितव्रतः। इत्याश्वमेधिके॥ ब्रलो॥ एवमेतेन मार्गेण पूर्वोक्तेन यथाविधिः। अ
धीतवान् यथाशक्तिस्तथैव ब्रह्मचर्यवान्। स्वधर्मनिरतो विद्वान् सर्वेंद्रियसमो मुनिः। गुरोः प्रियहि
ते युक्तः सत्यधर्मपरः शुचिः। गुरुणा समनुज्ञातो भुंजीतान्नमकुत्सयन्। हविष्यभैक्ष्यभुक्चापि स्था
नासनविहारवान्। द्विःकालमग्निं जुह्वानः शुचिर्भूत्वा समाहितः। धारयीत सदा दंडं बैल्वं पालाश
मेव वा। क्षौमं कार्पासिकं वापि मृगाजिनमथापि वा। सर्वं काषायरक्तं स्याद्वासो वापि द्विजस्य हि। मेखला
पि भवेन्मौंजी जटी नित्योदकी सदा। यज्ञोपवीती स्वाध्यायी ह्यलुब्धो नियतव्रतः। पूताभिश्च तथैवा
द्भिः सदा दैवतकर्मसु। भावेन नियतः कुर्वन् ब्रह्मचारी प्रशस्यते। एवं युक्तो जयेत्स्वर्गं ऊर्ध्वरेताः समा
हितः। न संसरति जातीषु परमं स्थानमाश्रितः। संस्कृतः सर्वसंस्कारैस्तथैव ब्रह्मचर्यवान्। ग्रामान्निः
क्रम्य चारण्यं मुनिः प्रव्रजितो भवेत्। अरण्यगोचरो नित्यं न ग्रामं प्रविशेत्पुनः। अर्चयेदतिथीन्का
ले दद्याच्चापि प्रतिश्रयं। फलैः पत्रैर्वरैर्मूलैः श्यामाकेन च वर्त्तयेत्। प्रवृत्तमुदकं वायुं सर्वं वानेयमाश्र
येत्। प्राश्नीयादानुपूर्व्येण यथादीक्षामतंद्रितः। अभूमूलफलभिक्षाभिरर्चेदतिथिमागतं। यद्भक्षः
स्यात्ततो दद्यान्नित्यं भिक्षामतंद्रितः। देवतातिथिपूर्वं च सदा भुंजीत वाग्यतः। अस्कंदितमनाश्चापि ल ३५
घ्वाशी देवताश्रयः। दांतो मैत्रः क्षमायुक्तः केशश्मश्रु च धारयन्। जुह्वन्स्वाध्यायशीलश्च सत्यधर्मप

रायणः शुचिर्देहः सदा दक्षो देवनित्यसमाहितः। एवं मुक्तो ऽजयेत्स्वर्गं वानप्रस्थो ऽजितेंद्रियः॥ गृहस्थो ब्र
ह्मचारी वा वानप्रस्थो ऽथवा पुनः। य इच्छेन्मोक्षमास्थातुं उत्तमां वृत्तिमाश्रयेत्॥ अभयं सर्वभूतेभ्यो दत्वा नैःकर्म्यमा
चरेत्। सर्वभूतहितो मैत्रः सर्वेंद्रिययतो मुनिः॥ अयाचितमसंक्लृप्तमुपपन्नं यदृच्छया। जोषयीत सदा भोज्यं
ग्रासमागतमस्पृशन्। यात्रामात्रं तु भुंजीत केवलं प्राणयात्रिकं॥ धर्मलब्धं तथाश्नीयान्न काममनुवर्तयन्। आ
साद्याच्छादनादन्यन्न गृह्णीयात्कथंचन। यावदाहारयेत्तावत्प्रतिगृह्णीत नान्यथा॥ परेभ्यो न प्रति
ग्राह्यं न च देयं कथंचन। दैन्यभावाच्च भूतानां संविभज्यात्सदा बुधः॥ नाददीत परस्वानि न गृह्णीया
दयाचितं। न किंचिद्विषयं भुक्त्वा स्पृहयेत कृतस्य वै॥ मृदमंभस्तथाश्मानं पत्रपुष्पफलानि च। असं
हृतानि गृह्णीयात्प्रवृत्तानीह कार्यवान्॥ न शिल्पजीविकां जीवेत् हिरण्यं नातिकामयेत्। न द्वेष्टा पाव
संदेष्टा स्वेत निरुपस्कृतः। श्रद्धापूतानि भुंजीत निमित्तानि च वर्जयेत्॥ सुधावृत्तिरसक्तश्च सर्वभूतैर
संविदन्। कृत्वा वह्निं चरेद्भैक्ष्यं विधूमे भुक्तवज्जने॥ वृत्ते शरावसंपाते भैक्षं लिप्सेत मोक्षवित्। लाभे न
च प्रहृष्येत नालाभे विमना भवेत्॥ मात्राशी कालमाकांक्षंश्चरेद्भैक्ष्यं समाहितः। लाभं साधारणं नेच्छे
न्न भुंजीताभिपूजितः। अभिपूजितलाभं हि विजुगुप्सेत भिक्षुकः॥ भुक्तान्यन्नानि तिक्तानि कषाय
कटुकानि च। नास्वादयीत भुंजानो रसांश्च मधुरांस्तथा॥ यात्रामात्रं तु भुंजीत केवलं प्राणयात्रिकं। असं
रोधेन भूतानां वृत्तिं लिप्सेत मोक्षवित्॥ न चान्यमनुवृत्तिं लेत तत्तिलमाणं कथंचन। मानं निवासयेद्धर्मं विवहेत्वा
रजाश्चरेत्। शून्यागारमरण्यं वा वृक्षमूलं नदीं तथा॥ आश्रयार्थं सेवेत पार्वतीं च पुनर्गुहां॥ ग्राममेकरात्रि

कौ ग्रीष्मेव र्षास्विक त्रवासयेत्॥ सूर्येण दृष्टमध्वानं कीटवच्चचरेन्महीं॥ दयार्थं चैव भूतानां समीक्ष्य पृथि
वीं चरेत्॥ संचयं च न कुर्वीत स्नेहवासं च वर्जयेत्॥ पूतेनाचां भसा नित्यं कार्यं कुर्वीत मोक्षवित्॥ उपस्पृ
शेदुद्धृताद्भिर् पोत्तिश्च नरः सदा॥ अहिंसा ब्रह्मचर्यं च सत्यमार्जवमेव च॥ अक्रोधश्चानसूया च दमो
नित्यमपैशुनं॥ अष्टस्वेतेषु युक्तः स्याद्व्रतेषु नियतेंद्रियः॥ अपापमशठं वृत्तमजिह्मं नित्यमाचरेत्॥ आशीर्यु
क्तानि कर्माणि हिंसायुक्तानि यानि च॥ लोकसंग्रहधर्मं च नैव कुर्यान्न कारयेत्॥ सर्वभावानतिक्रम्य लघु
मात्रापरिव्रजेत्॥ समः सर्वेषु भूतेषु स्थावरेषु चरेषु च॥ परं नोद्वेजयेत्कंचिन्न कस्मात्कथंचिद्द्विजेत्॥ विश्वा
स्यः सर्वभूतानां अयं मोक्षो विमुच्यते॥ अनागतं च न ध्यायेन्नातीतमनुचिंतयेत्॥ वर्तमानमुपेक्षेत कालं
कांक्षी समाहितः॥ न चक्षुषा न मनसा न वाचा दूषयेत्क्वचित्॥ प्रत्यक्षं न परोक्षं वा किंचिद्दुष्टं समाचरेत्॥
इंद्रियाण्युपसंहृत्य कूर्मोंगानीव सर्वशः॥ क्षीणेंद्रियमनोबुद्धिर्निरीक्षेत निरींद्रियः॥ निर्द्वंद्वो निर्नमस्का
रो निःस्वाहाकार एव च॥ निर्ममो निरहंकारो निर्योगक्षेम एव च॥ निराशीः सर्वभूतेषु निरासंगो निराश्रयः
सर्वज्ञः सर्वतो मुक्तो मुच्यते नात्र संशयः॥ अपाणिपादपृष्ठं तमशिरस्कमनुदरं॥ प्रहीणगुणकर्माणं के
वलं विमलं स्थिरं॥ अगंधरसमस्पर्शमरूपाशब्दमेव च॥ अत्वगस्थ्यथ चाशब्दं ममासमपि चैव हि॥ निश्चिं
त्यमव्ययं चैव हृदिस्थं सादि नित्यदा॥ सर्वभूतस्थमात्मानं ये पश्यंति न ते मृताः॥ न तत्र क्रमते बुद्धिर्नेंद्रिया
णि न देवताः॥ वेदा यज्ञाश्च लोकाश्च न तपो न पराक्रमः॥ यत्र ज्ञानवतां प्राप्तिरलिंगग्रहणे स्मृता॥ ३६
यत्र ज्ञानवतां विद्वान् विज्ञानचरितं चरेत्॥ अमूढो मूढरूपेण चरेद्धर्ममदूषयन्॥ यथैनमवमन्येरन्

परेसत्त्वतमेवाहितद्याद्वत्तमस्वरेद्धर्मस्मितां वृत्तमदूषयन्नायो ह्येवं वृत्तसंपन्नास्समुनिः श्रेष्ठ उच्यते। इंद्रियाणींद्रि-
यार्थांश्च महाभूतानि पंच च। मनो बुद्धिरहंकारमव्यक्तं पुरुषं तथा। सर्वमेतत्समाख्याय सम्यक् संत्यज्य निर्मलः।
ततः स्वर्गमवाप्नोति विमुक्तः सर्वबंधनैः। एतद्देवानुवेलायां परिसंख्याय तत्त्ववित्। ध्यायेदेकांतमास्थाय मुच्यते ध-
निरामयः। विमुक्तः सर्वसंगेभ्यो वायुराकाशगो यथा। क्षीणकोशो निरातंकः प्राप्नोति परमं पदं। आश्वमेधिके
गुरुशिष्यसंवादे। ब्रह्मोवाच। संन्यासं तप इत्याहुर्वृद्धा निश्चितदर्शिनः। ब्राह्मणा ब्रह्मयोनिस्था ज्ञानं ब्रह्म
परं विदुः। अतिदूरात्मकं ब्रह्म वेदविद्याव्यपाश्रयं। निर्द्वंद्वं निर्गुणं नित्यमचिंत्यं गुह्यमव्ययं। ज्ञानेन तप-
सा चैव धीराः पश्यंति तत्पदं। निर्णिक्तमनसः पूता व्युत्क्रांतरजसोमलाः। तपसा क्षेममध्वानं गच्छंति परमैषिणः।
संन्यासनिरता नित्यं ये ब्रह्मविदो जनाः। तपः प्रदीप इत्याहुराचारो धर्मसाधकः। ज्ञानमेव परं विद्या संन्या-
सस्तप उत्तमं। यस्तु वेद निराबाधं ज्ञानतत्त्वविनिश्चयं। सर्वभूतस्थमात्मानं स सर्वगतिरिष्यते। यो विद्वान्
सहवासं निवासं चैवैव पश्यति। तथैवैकत्वनानात्वे स दुःखात्परिमुच्यते। यो न कामयते किंचिन्न किंचि-
दवमन्यते। इहलोकस्थ एवैष ब्रह्मभूयाय कल्पते। प्रधानगुणतत्त्वज्ञः सर्वभूतविधानवित्। निर्ममो नि-
रहंकारो मुच्यते नात्र संशयः। निर्द्वंद्वो निर्नमस्कारो निःस्वधाकार एव च। निर्गुणं नित्यमद्वंद्वं प्रशमं चैव
गच्छति। हित्वा गुणमयं सर्वं कर्म जंतुः शुभाशुभं। उभे सत्यानृते त्यक्त्वा मुच्यते नात्र संशयः। अव्यक्तबीजप्र-
भवो बुद्धिस्कंधमयो महान्। महाहंकारविटप इंद्रियांकुरकोटरः। महाभूतविशालश्च विशेषः प्रतिशाख-
वान्। सदापर्णः सदापुष्पः शुभाशुभफलोदयः। आजीव्यः सर्वभूतानां ब्रह्मवृक्षः सनातनः। एवं छित्वा च

त्तित्वावज्ञानेनपरमासिना॥हित्वा वामरतां प्राप्य जहाति मृत्युजन्मनी॥निर्ममो निरहंकारो मुच्यते सर्वकि
ल्बिषैः॥द्वावेतौ पक्षिणौ नित्यं सखायौ वाप्यचेतनौ॥एताभ्यां तु परो यस्तु चेतनावानिति स्मृतः॥अचेतनः सर्व
संघातयुक्तः सत्वात्परं चिंतयानो ंतरात्मा॥स क्षेत्रज्ञः सत्वसंघातबुद्धिर्गुणातिगो मुच्यते मृत्युपाशात्॥इत्या
श्वमेधिके पर्वणि ब्रह्मोवाच॥केचिद्ब्रह्ममयं वृक्षं केचिद्ब्रह्ममयं वनं॥केचित्परमम व्यक्तं केचित्परमना
मयं॥मन्यंते सर्वमप्येतदव्यक्तप्रभवाप्ययौ॥उच्छ्वासमात्रमपि चेद्यों तःकाले समो भवेत्॥आत्मानमुपसंग
म्य सोमृतत्वाय कल्पते॥निमेषमात्रमपि चेत्संयम्यात्मानमात्मनि॥गच्छत्यात्मप्रसादेन विदुषां प्राप्तिमुत्तमां॥
प्राणायामैरथ प्राणान्संयम्य स पुनः पुनः॥दशद्वादशभिर्वापि चतुर्विंशात्परं ततः॥एवं पूर्वं प्रसन्नात्माल
भते यद्यदिच्छति॥अव्यक्तात्सत्वमुद्रिक्तममृतत्वाय कल्पते॥सत्वात्परतरं नान्यत्प्रशंसंतीह तद्विदः॥अ
नुमानाद्विजानीमः पुरुषं सत्वसंश्रयं॥न शक्यमन्यथा कर्तुं पुरुषं समनो द्विजाः॥क्षमा धृतिरहिंसा च समता
सत्यमार्जवं॥ज्ञानं त्यागो थ संन्यासः सात्विकं वृत्तमिष्यते॥एतेनैवानुमानेन मन्यंते थ मनीषिणः॥सत्वं च
पुरुषश्चैवैकं तत्र नास्ति विचारणा॥आहुरेकेच विद्वांसो ये ज्ञाने सुप्रतिष्ठिताः॥क्षेत्रज्ञसत्वयोरैक्यमित्ये
तन्नोपपद्यते॥पृथग्भूतं ततो नित्यमित्येतदविचारितं॥पृथग्भावश्च विज्ञेयः सहजश्चापि तत्वतः॥
तथैवैकत्वनानात्वमिष्यते विदुषां नयः॥मशकोदुंबरे ऐक्यं पृथक्त्वमपि दृश्यते॥मत्स्यो यथापि स्याद
प्सु संप्रयोगस्तथानयोः॥संबंधस्तोयबिंदूनां पर्णे कोकनदस्य च॥गुरुरुवाच॥इत्युक्तवंतं ते विप्रास्तदा ७९
लोकपितामहं॥पुनः संशयमापन्नाः पप्रच्छुर्द्विजसत्तमाः॥ऋषय ऊचुः॥किं स्विदेवेह धर्माणामनुष्ठेयतमं स्मृ

तां व्याहृतामिव पश्यामो धर्मस्य विविधां गतिं। ऊर्द्ध्वं देहाद्वदंत्येके नैतदस्तीति चापरे। केचित्संशयितं स-
र्वं निःसंशयमथापरे। अनित्यं नित्यमेके च नास्त्यस्तीत्यपि चापरे। विच्चित्येकेन्यमित्यन्ये व्यामिश्रमि-
ति चापरे। मन्यंते ब्राह्मणा एवं प्राज्ञास्तत्वार्थदर्शिनः। जटाजिनधराश्चान्ये मुंडाः केचिदसंवृताः। अस्ना-
नं केचिदिछंति केचिच्चानशने रताः। कर्म केचित्प्रशंसंति प्रशांतमिति चापरे। देशकालावुभौ केचिन्नै-
तदस्तीति चापरे। केचिन्मोक्षं प्रशंसंति केचिद्भोगान्पृथग्विधान्। धनानि केचिदिछंति निर्द्धनत्वं तथा-
परे। उपास्यसाधनं त्वेके नैतदस्तीति चापरे। अहिंसानिरताश्चान्ये केचिद्धिंसापरायणाः। पुण्येन य-
शसेत्येके नैतदस्तीति चापरे। सर्वमेके प्रशंसंति न सर्वमिति चापरे। तपस्त्वन्ये प्रशंसंति स्वाध्यायमपरे
जनाः। ज्ञानं संन्यासमित्येके स्वभावं तत्वचिंतकाः। एवं व्युत्थापिते धर्मे बहुधा विप्रबोधिते। निश्चयं ना-
धिगछाम संमूढा सुरसत्तम। इदं श्रेय इदं श्रेय इत्येवं प्रस्थितो जनः। यो हि यस्मिन्नुरक्तो धर्मे स तं संपू-
जयते सदा। एतदाख्यातुमिछामः श्रेयः किमिति सत्तम। अतःपरं च यद्गुह्यं तद्भवान्वक्तुमर्हति। सत्वक्षेत्र-
ज्ञयोश्चैव संबंधः केन हेतुना। एवमुक्तस्तु तैर्विप्रैर्भगवान्लोकभावनः। तेभ्यः शशंस धर्मात्मा याथा-
तथ्येन बुद्धिमान्। इत्याश्वमेधिके॥ ब्रह्मोवाच॥ हंत वः संप्रवक्ष्यामि यन्मां पृच्छथ सत्तमाः। समस्तमि-
ह तच्छ्रुत्वा सम्यगेवावधार्यतां। अहिंसा सत्यवचनं एतत्कृत्यतमं मतं। एतत्पदमनुद्विग्नं वरिष्ठं धर्म-
लक्षणं। ज्ञानं निःश्रेय इत्याहुर्वृद्धा निश्चितदर्शिनः। तस्माज्ज्ञानेन शुद्धेन मुच्यते सर्वपातकैः। हिंसा-
पराश्च ये लोके ये च नास्तिकवृत्तयः। लोभमोहसमायुक्तास्ते वै निरयगामिनः। आशीर्युक्तानि कर्माणि

वर्त्तये त्वतंद्रिताः। तस्मिन्लोके प्रमोदंते जायमानाः पुनः पुनः। कुर्वंति ये तु कर्माणि श्रद्दधाना विपश्चि
तः। अनाशीर्योगसंयुक्तास्ते धीराः साधुदर्शिनः। अतः परं प्रवक्ष्यामि सत्वक्षेत्रज्ञयोर्यथा। संयोगो विप्रयो
गश्च तन्निबोधत सत्तमाः। विषयो विषयित्वं च संबंधोयमिहोच्यते। विषयी पुरुषो नित्यं सत्वं च विषयः
स्मृतः। व्याख्यानं पूर्वकल्पेन मशकोडुंबरं तथा। भुज्यमानं न जानाति नित्यं सत्वमचेतनं। तत्रैव ह्य
नुजानाति नित्यं सत्वमचेतनं। यो भुंक्ते यश्च भुज्यते। अनित्यं द्वंद्वसंयुक्तं सत्वमाहुर्गुणात्मकं। निर्द्वंद्वो
निःकलो नित्यः क्षेत्रज्ञो निर्गुणात्मकः। समः संज्ञागतस्त्वेवं यथा सर्वत्र दृश्यते। उपभुंक्ते सदा सत्वम
पः पुष्करपर्णवत्। सर्वैरपि गुणैर्विद्वान् व्यतिषिक्तो न लिप्यते। जलबिंदुर्यथा लोलः पद्मिनीपत्रसंस्थि
तः। एवमेवाप्यसंयुक्तः पुरुषः स्यान्न संशयः। द्रव्यमात्रमभूत्सत्वं पुरुषश्चेति निश्चयः। यथा द्रव्यं च
कर्त्ता च संयोगोप्यनयोस्तथा। यथा प्रदीपमादाय कश्चित्तमसि गच्छति। तथा सत्वप्रदीपेन गच्छंति परमै
षिणः। यावद्द्रव्यगुणस्तावत् प्रदीपः संप्रकाशते। क्षीणद्रव्यगुणं ज्योतिरंतर्द्धानाय गच्छति। व्यक्तः स
त्वगुणस्त्वेवं पुरुषोऽव्यक्त इष्यते। एतद्विप्रा विजानीत हंत भूयो ब्रवीमि वः। सहस्रेणापि दुर्मेधा न बुद्धिम
धिगच्छति। चतुर्थेनाप्यथांशेन बुद्धिमान् सुखमेधते। एवं धर्मस्य विज्ञेयं संसाधनमुपायतः। उपाय
ज्ञो हि मेधावी सुखमत्यंतमश्नुते। यथाध्वानमपाथेयं प्रपन्नो मानवः क्वचित्। क्लेशेन याति महता विन
श्यत्यंतरापि वा। तथा कर्मसु विज्ञेयं फलं भवति वा न वा। पुरुषस्यात्मनः श्रेयः शुभाशुभं तु निदर्शनं
यथा च दीर्घमध्वानं पद्भ्यामेव प्रपद्यते। अदृष्टपूर्वं सहसा तत्वदर्शनवर्जितं। तमेव च यथाध्वानं रथे ७८

नेहाम्बुनामिना। यायाद्दश्व प्रयुक्तेन पथा। बुद्धिमत्तां गतिः। ऊर्ध्वं पर्वतमारुह्य न्नावेक्षत भूगतं। रथे
न रथिनं पश्येत्क्लिश्यमानमचेतनं। यावद्रथपथस्तावद्रथेन स तु गच्छति। क्षीणे रथपथे प्राज्ञो रथमु
त्सृज्य गच्छति। एवं गच्छति मेधावी तत्वयोगविधानवित्। समाज्ञाय महाबुद्धिरुत्तरादुत्तरोत्तरं। यथा म
हार्णवं घोरमप्लवः संप्रगाहते। बाहुभ्यामेव संमोहाद्वधं वाछत्यसंशयं। नावा चापि यथा प्राज्ञो वि
भागज्ञस्तरित्रया। अक्लांतः सलिलं गाहेत्क्षिप्रं संतरते ध्रुवं। तीर्णो गच्छेत्परं पारं नावमुत्सृज्य निर्ममः। व्या
ख्यातं पूर्वकल्पेन यथा रथपदानिलैः। स्नेहात्संमोहमापन्नो नावि दासो यथा तथा। ममत्वेनाभिपन्नः
सत्तत्रैव परिवर्त्तते। नावं प्राप्य न शक्यं तु स्थलं विपरिधावितुं। तथैव स्थलमारुह्य न नौचर्या विधीयते।
एवं कर्म कृतं चित्रं विषयस्थं पृथक् पृथक्। यथा कर्म कृतं लोके तथा तदुपपद्यते। यन्नैव गंधिनो रस्यं
न रूपस्पर्शशब्दवित्। मन्यते तन्मनोबुद्ध्या तत्प्रधानं प्रचक्षते। तत्प्रधानमनव्यक्तमव्यक्तस्य गुणो
महान्। महतः प्रधानभूतस्य गुणोऽहंकार एव च। अहंकारप्रधानस्य महाभूतकृतो गुणः। पृथक्त्वे
न हि भूतानां विषया वै गुणाः स्मृताः। बीजधर्मि यथाव्यक्तं तथैव प्रसवात्मकं। बीजधर्मा महात्मा ने
प्रसवश्चेति नः श्रुतं। बीजधर्मा त्वहंकारः प्रसवश्च पुनः पुनः। बीजप्रसवधर्माणि महाभूतानि पंच वै।
बीजधर्मिण इत्याहुः प्रसवं च न कुर्वते। विशेषाः पंचभूतानां तेषां चित्तं विशेषणं। पृथ्वी पंचगुणा ज्ञेया
चरस्थावरसंकुला। सर्वभूतकरी देवी शुभाशुभनिदर्शिनी। शब्दः स्पर्शस्तथा रूपं रसो गंधश्च पंचमः। एते

पंचगुणास्त्विमे विज्ञेया द्विजसत्तमाः। पार्थिवश्च सदा गंधो गंधश्च बहुलः स्मृतः। तस्य गंधस्य वक्ष्यामि विस्तरे
ण गुणान्बहून्। इष्टश्चानिष्टगंधश्च मधुरोम्लः कटुस्तथा। निर्हारी संहतस्निग्धो रूक्षो विशद निर्मलः
एवं दशविधो ज्ञेयः पार्थिवो गंध इत्यथ। शब्दस्पर्शस्तथा रूपं रसश्चापां गुणाः स्मृताः। मधुराम्लकटुस्ति
क्तः कषायो लवणस्तथा। एवं षड्विधविस्तारो रसो वारिमयः स्मृतः। शब्दस्पर्शस्तथा रूपं त्रिगुणं ज्योति
रुच्यते। ज्योतिषश्च गुणो रूपं रूपं च बहुधा मतं। शुक्लं कृष्णं तथा पीतं रक्तं पीतारूपं तथा। ह्रस्वं दीर्घं
तथा स्थूलं चतुरस्रं च वर्तुलं। स्व द्वादशविस्तारं तेजसा रूपमुच्यते। विज्ञेयं ब्राह्मणैर्नित्यं धर्मज्ञैः स
त्यवादिभिः। शब्दस्पर्शौ तु विज्ञेयौ द्विगुणो वायुरुच्यते। वायोश्चापि गुणः स्पर्शः स्पर्शश्च बहुधा स्मृतः।
उष्णः शीतः सुखो दुःखः स्निग्धो विशदएव च। कठिनश्चिक्कणः श्लक्ष्णः पिच्छलो दारुणो मृदुः। एवं द्वा
दशविस्तारो वायव्यो गुण उच्यते। विधिवद्ब्राह्मणैः सिद्धैर्धर्मज्ञैस्तत्त्ववेदिभिः। तत्रैकगुणमाकाशं श
ब्द इत्येव च स्मृतः। तस्य शब्दस्य वक्ष्यामि विस्तरेण बहून्गुणान्। षड्जऋषभगांधारो मध्यमः पंचमस्तथा॥
अतः परं तु विज्ञेया निषादो धैवतस्तथा। इष्टानिष्टश्च शब्दोत्र संहतः प्रविभागवान्। एवं बहुविधो ज्ञे
यः शब्द आकाशसंभवः। आकाशमुत्तमं भूतं अहंकारस्तथा परो। अहंकारात्परा बुद्धिर्बुद्धेरात्मा ततः
परः। तस्मात्तु परमव्यक्तमव्यक्तात्पुरुषः परः। परावरज्ञो भूतानां विधिज्ञः सर्वकर्मणां। इत्थं सर्वभू
तात्म भूतात्मा गच्छत्यात्मानमक्षरं। इत्याश्वमेधिके ब्रह्मगीतासु॥ भूतानामथ पंचानां यथैषामीश्वरं मनः
नियमे च विसर्गे च भूतात्मा मनएव च॥ अधिष्ठाता मनो नित्यं भूतानां महतां तथा। बुद्धिरैश्वर्यमाख्या

क्षेत्रज्ञः स विमुच्यते। इंद्रियाणि मनो युंक्ते सदश्वानिव सारथिः। इंद्रियाणि मनो बुद्धिं क्षेत्रज्ञो युंजते सदा
महाभूतसमायुक्तं बुद्धिसंयमनं रथं। तमारुह्य स भूतात्मा समंतात्परिधावति। इंद्रियग्रामसंयुक्तो मनःसार
थिरव्ययः। बुद्धिसंयमनो नित्यं महान्ब्रह्ममयो रथः। एवं यो वेत्ति विद्वान्वै सदा ब्रह्ममयं रथं। स धीरः सर्वलो
केषु न मोहमधिगच्छति। अव्यक्तादि विशेषांतं त्रसस्थावरजंगमं। चंद्रसूर्यप्रभालोकं नक्षत्रग्रहमंडितं।
नदीपर्वतजालैश्च सर्वतः परिभूषितं। विविधाभिस्तथाद्भिः सततं समलंकृतं। आजीवं सर्वभूता
नां सर्वप्राणभृतां गतिं। एतं ब्रह्मवणं गीतं यस्मिंश्चरति क्षेत्रवित्। क्षेत्रेस्मिन्यानि भूतानि स्थावराणि चरा
णि च। तान्येवाग्रे प्रलीयंते पश्चाद्भूतकृता गुणाः। गुणेभ्यः पंचभूतानि एष भूतसमुच्छ्रयः। देवा मनुष्या
गंधर्वा पिशाचासुरराक्षसाः। सर्वे स्वभावतः सृष्टा न क्रियाभ्यो न कारणात्। एते विश्वकृतो विप्रा जायं
ते ह पुनः पुनः। तेभ्यः प्रसूता तेष्वेव महाभूतेषु पंचसु। प्रलीयंते यथाकालमूर्मयः सागरं यथा। विश्वकृद्भ्य
स्तु भूतेभ्यो महाभूतानि गच्छति। भूतेभ्यश्चापि पंचभ्यो मुक्तो गच्छेत्प्रजापतिः। प्रजापतिरिदं सर्वं तपसैवा
सृजत्प्रभुः। तथैव वेदांस्तत्सर्वं तपसा प्रतिपेदिरे। तपसश्चानुपूर्वेण फलमूलाशनास्तथा। त्रैलोक्यं तप
सा सिद्धाः पश्यंतीह समाहिताः। औषधान्यगदादीनि नानाविद्याश्च सर्वशः। तपसैव प्रसिध्यंति तपोमूल
हि साधनं। यद्दुरापं दुराम्नायं दुराधर्षं दुरत्ययं। तत्सर्वं तपसा साध्यं तपो हि दुरतिक्रमं। सुरापोसंमतादायी
भ्रूणहा गुरुतल्पगः। तपसैव सुतप्तेन मुच्यते किल्बिषात्ततः। मनुष्याः पितरो देवा पशवो मृगपक्षिणः। या
नि चान्यानि भूतानि स्थावराणि चराणि च। तपःपरायणा नित्यं सिध्यंते तपसा सदा। तथैव तपसा देवा महा

ज्ञानाद्दिवं गताः। आशीर्युक्तानि कर्माणि कुर्वते ये त्वतंद्रिताः। अहंकारसमायुक्तास्ते सकाशे प्रजापतेः। ध्या
नयोगेन शुद्धेन निर्ममा निरहंकृताः। प्राप्नुवंति महात्मानो महांतं लोकमुत्तमं। ध्यानयोगादुपागम्य प्रस
न्नमतयः सदा। सुखोपचयमव्यक्तं प्रविशंत्यचलं ध्रुवं। ध्यानयोगादुपागम्य निर्ममा निरहंकृताः। अव्य
क्तं प्रविशंतीह महांतं लोकमुत्तमं। अव्यक्तादेव संभूतः समज्ञं ज्ञागतः पुनः। तमोरजोभ्यां निर्मुक्तः स
त्वमास्थाय केवलं। विमुक्तः सर्वपापेभ्यः सर्वं सृजति निष्कलं। क्षेत्रज्ञमिति तं विद्याद्यस्तं वेद स वेदवित्।
चित्तं चित्तादुपागम्य मुनिरासीत संयतः। यच्चित्तस्तन्मना भूत्वा गुह्यमेतत्सनातनं। अव्यक्तादिविशेषांत
मविद्यालक्षणं स्मृतं। निबोधत यथाहीदं गुणैर्लक्षणमित्युत। द्व्यक्षरस्तु भवेन्मृत्युस्त्र्यक्षरं ब्रह्म चोच्यते।
कर्म केचित्प्रशंसंति मंदबुद्धिरता नराः। ये तु बुद्धा महात्मानो न प्रशंसंति कर्म ते। कर्मणा जायते जंतुर्मूर्ति
मान् षोडशात्मकः। पुरुषः सृज्यते विद्यामग्राह्याममृताशनः। तस्मात्कर्मसु निस्नेहा ये केचित्पारदर्शिनः। वि
द्यामयोऽयं पुरुषो न तु कर्ममयः स्मृतः। अपूर्वममृतं नित्यं यथैनमपराजितं। य एनं विंदते त्मानमग्राह्य
ममृताशनं। अग्राह्यो ह्यमृतो भवति य एभिः कारणैर्ध्रुवः। अपोह्य सर्वसंकल्पान्संयम्यात्मानमात्मनि। स तं
ब्रह्म शुभं वेत्ति यस्माद्भूयो न जायते। प्रसादेनैव सत्वस्य प्रसादं समवाप्नुयात्। लक्षणं हि प्रसादस्य यथा
स्यात्स्वप्नदर्शनं। गतिरेषा तु मुक्तानां ये ज्ञाने परिनिष्ठिताः। प्रवृत्तयश्च याः सर्वाः पश्यंति परिणामजाः। एषा
गतिरसक्तानामेष धर्मः सनातनः। एषां ज्ञानवतां प्राप्तिरेतद्वृत्तमनिंदितं। समेन सर्वभूतेषु निस्पृहे ४०
ण निराशिषा। शक्या गतिरियं गंतुं सर्वत्र समदर्शिना। एतद्वः सर्वमाख्यातं मया विप्रर्षिसत्तमाः। एव

मान्वरतस्त्रिप्रं ततः सिद्धिमवाप्स्यथ ॥ गुरु० ॥ इत्युक्ता गुरुणा तेन मुनयो ब्राह्मणास्तथा ॥ कृतवंतो महात्मानस्ततः कामम
वाप्नुवन् ॥ त्वमप्येतन्महाभाग यथोक्तं ब्रह्मणा वचः । सम्यगाचर शुद्धात्मा ततः सिद्धिमवाप्स्यसि ॥ वासुदेव उवा
च ॥ इत्युक्तः स तदा शिष्यो गुरुणा धर्ममुत्तमं । चकार सर्वं कौंतेय ततो मोक्षमवाप्तवान् ॥ कृतकृत्यश्च स तदा
शिष्यः कुरुकुलोद्वह । तत्पदं समनुप्राप्तो यत्र गत्वा न शोचति ॥ अर्जुन उ० ॥ कस्त्वसौ ब्राह्मणः कृष्ण कश्च शि
ष्यो जनार्दन । श्रोतव्यं चेन्मयैतद्वै तत्त्वमाचक्ष्व मे विभो ॥ कृष्ण उ० ॥ अहं गुरुर्महाबाहो मनः शिष्यं च विद्धि मे । त्वत्प्री
त्या गुह्यमेतच्च कथितं ते धनंजय ॥ मयि चेदस्ति ते प्रीतिर्नित्यं कुरुकुलोद्वह । अध्यात्ममेतच्छ्रुत्वा त्वं सम्यगा
चर सुव्रत । ततस्त्वं सम्यगाचीर्णे धर्मेऽस्मिन्कुरुनंदन । सर्वपापविशुद्धात्मा मोक्षं प्राप्स्यसि केवलं ॥ पूर्वम
प्येतदेवोक्तं युद्धकाल उपस्थिते । मया तव महाबाहो तस्मादत्र मनः कुरु ॥ तथा तु भरतश्रेष्ठ चिराद्दृष्टः पि
ता विभो । तमहं द्रष्टुमिच्छामि संमते तव फाल्गुन ॥ तत्त्वश्च लाववनं कृष्णं प्रत्युवाच धनंजयः । गत्वा स नगरं
कृष्ण गजसाह्वयमद्य वै । समेत्य तत्र राजानं धर्मकामं युधिष्ठिरं । समनुज्ञाप्य दुर्धर्षः स्वपुरीं गंतुमर्हसि ॥ इति
श्रीमहाभारते आश्वमेधिके पर्वणि अनुगीता समाप्ता ॥ वैशंपायन उ० ॥ ततोऽभ्यचोदयत्कृष्णो युज्यतामिति दारु
कं । मुहूर्तादिव चाचष्ट युक्तमित्येव दारुकः ॥ तथैव चानुयात्राणि चोदयामास पांडवः । सज्जयध्वं प्रयास्या
मो नगरं गजसाह्वयं ॥ इत्युक्ताः सैनिकास्ते तु सज्जीभूता विशांपते । रथस्थं तु महातेजा वासुदेवं धनंजयः
पुनरेवाब्रवीद्वाक्यमिदं भरतसत्तम । त्वत्प्रसादाज्जयः प्राप्तो राज्ञा वृष्णिकुलोद्वह । निहताः शत्रवश्चापि
राज्यं प्राप्तमकंटकं ॥ नाथवंतश्च भवता पांडवा मधुसूदन । भवंतं प्लवमासाद्य तीर्णाः स्म कुरुसागरं ॥ वि
श्वकर्मन्नमस्तेऽस्तु विश्वात्मन्विश्वसत्तम ॥ तथाहं त्वां विजानामि यथा चाहं भवान्मम ॥ त्वत्तेजः संभवो

नित्यं कृतात्मा मधुसूदनारति। क्रीडामयी लुप्यं मायाते रोदसी वित्तो। त्वयि सर्वमिदं विश्वं यत्किंचित्स्थाणु
जंगमं। त्वं हि सर्वं विकुरुषे भूतग्रामं सनातनं। पृथिवी चांतरिक्षं च तथा स्थावर जंगमं। हसितं ते मलाज्यो
त्स्ना ऋतवस्त्विंद्रियाणि ते। प्राणो वायुः सततगतः क्रोधो मृत्युः सनातनः। प्रसादे चापि पद्मा श्रीर्नित्यं तव
महामते। रतिस्तुष्टिर्धृतिः क्षांतिस्त्वयि वेदं चराचरं। त्वमेव हि युगांतेषु निधनं प्रोच्यसेऽनघ। सुदीर्घे
णापि कालेन न ते शक्या गुणा मया। कृष्णद्वैपायनाद्वापि तथा कुरुपितामहात्। त्वयि सर्वं समापत्तं त्वमे
वैको जनेश्वरः। यच्चानुग्रह संयुक्तमेतदुक्तं त्वयानघ। एतत्सर्वमहं सम्यक्कुर्यावरिष्ये जनार्दन। इदं
चाद्भुतमत्यर्थं कृतवानसि मद्धितेच्छया। यत्पापो निहतः संख्ये कौरव्यो धृतराष्ट्रजः। त्वया दग्धं हि तत्सैन्यं
मया विजितमाहवे। त्वया तत्कृतं कर्म येन प्राप्तो जयो मया। दुर्योधनस्य संग्रामे तव बुद्धि पराक्रमैः। कर्णस्य
च वधोपायो यथावत्संप्रदर्शितः। सैंधवस्य वधापस्य तरिस्त्र वसंएव च। अहं च प्रीयमाणोस्मि त्वया देव
किनंदन। यदुक्तं तत्करिष्यामि न हि मेत्र विचारणा। राजानं च समासाद्य धर्मात्मानं युधिष्ठिरं। चोदयिष्या
मि धर्मज्ञ गमनार्थं त्वयानघ। रुचिरं हि ममैतत्ते द्वारकागमनं विभो। अचिराच्चैव द्रष्टा त्वं मातुलं मधुसूदन।
बलदेवं च दुर्धर्षं तथान्यान्वृष्णिपुंगवान्। एवं संभाषमाणौ तौ प्राप्तौ वारणसाह्वयं। ततो विविशतुश्चा
तौ संप्रहृष्टजनाकुलं। तौ गत्वा धृतराष्ट्रस्य गृहं शक्रगृहोपमं। ददृशाते महाराज धृतराष्ट्रं जनेश्वरं। वि
दुरं च महाबुद्धिं राजानं च युधिष्ठिरं। भीमसेनं च दुर्धर्षं माद्रीपुत्रौ च पांडवौ। धृतराष्ट्रं समासीनं युयुत्सुं ४२
चापराजितं। गांधारीं च महाप्राज्ञां पृथां कृष्णां च भामिनीं। सुभद्राद्याश्च ताः सर्वा भारतानां स्त्रियस्तथा। दद

त्रातस्थिताः सर्वा गांधारीपरिवार्य वै। ततः समेत्य राजानं धृतराष्ट्रमरिंदमौ। निवेद्य नामधेये स्वे तस्य पाद
वगृह्णतां। गांधार्याश्च पृथायाश्च धर्मराज्ञस्तथैव च। भीमस्य च महात्मानौ तदा पादावगृह्णतां। परिष्वज्य
महात्मानं वैश्यापुत्रं महाधनं। सन्नारं चापि संपूज्य पृष्ट्वा चारोलमव्ययं। तैः सार्द्धं नृपतिं वृद्धं ततस्तं
पर्युपासतां। ततो निशि महाराजो धृतराष्ट्रः कुरूद्वहः। जनार्दनं च मेधावी व्यसर्जयत वै गृहान्। कृ
ष्ण सं ष्ट लुब्धाय मेधावी धनंजयसहायवान्। प्रभातायां तु शर्वर्यां कृतपूर्वाह्णिकक्रियौ। धर्मरा
जस्य भवनं जग्मतुः परमार्चितौ। यत्रास्ते स सहामात्यो धर्मराजो महामनाः। ततस्तौ तत्प्रविश्याथ
ददृशाते महाबलौ। धर्मराजानमासीनं देवराजमिवाश्विनौ। तौ समासाद्य राजानं वार्ष्णेयकुरुपुंगवौ।
निषीदतुरनुज्ञातौ प्रीयमाणेन तेन वै। ततः स राजा मेधावी विविक्षू तौ निशाम्य ह। प्रोवाच वदतां श्रेष्ठो
वचनं राजसत्तमः। युधिष्ठिर उ०। युवां विविक्षू पश्यामि वीरौ यदुकुरूद्वहौ। स गच्छे दृश्यनुज्ञातो त्वत्ता कृष्ण।
यदि मन्यसे। आनर्तनगरं वीर तदनुज्ञातुमर्हसि। युधिष्ठिर उ०। पुंडरीकाक्ष भद्रं ते गच्छ त्वं मधुसूदन।
पुरीं द्वारवतीमद्य द्रष्टुं शूरसुतं विभो। रोचते मे महाबाहो गमनं तव केशव। मातुलश्चिरदृष्टो मे त्व
या देवी च देवकी। समेत्य मातुलं गत्वा बलदेवं च माधव। पूजयेथा महाप्राज्ञ मद्वाक्येन यथार्हतः।
स्मरेथाश्चापि नित्यं मां भीमं च बलिनां वरं। फाल्गुनं नकुलं चैव सहदेवं च माधव। आनर्तानवलोक्य त्वं
पितरं च महाभुज। वृष्णींश्च पुनरागच्छेर्हयमेधे ममानघ। स गच्छ रत्नान्यादाय विविधानि वसूनि च। ब्रू
तां कर्त्तास्मि सर्वं वा मचिरान्मा विचार्यतां। इत्युक्तः फाल्गुनस्तत्र धर्मराजानमब्रवीत्। विनीतवदुपाग
म्य वाक्यं वाक्यविशारदः। अयं चिरोषितो राजन् वासुदेवः प्रतापवान्। भवंतं समनुज्ञाप्य पितरं द्रष्टुं इ

[illegible]

मिच्छसि। यद्वाप्यन्यन्मनोज्ञं ते तत्वाप्यादत्स्व सर्वतः॥ इयं हि वसुधा सर्वा प्रसाधा तव माधव। अस्मानुप
गतान्वीर निहतांश्चापि शत्रून्॥ एवं ब्रुवति कौरव्ये धर्मराजे युधिष्ठिरे। वासुदेवं वरं पुंसामिदं वचनमब्रवी
त्। तवैव रत्नान्येव धनं चक्रं वलं धरा च कृत्स्नासु महाभुजाद्यु वै यद्वास्तिश्वान्यद्द्रविणं गृहे सुत्वमेवतस्येश्वर
नित्यमीश्वरः तथेति विमुक्तः प्रतिपूजितस्ततो दाशार्हप्रजनो धर्मसुतेन वीर्यवान्। पितृष्वसारमपत्तद्यथाविधि
संपूजितश्चाप्यकरोत्प्रदक्षिणां। तया च सम्यक्प्रतिनंदितस्ततो तथैव सर्वैर्विदुरादिभिस्ततः। विनिर्य
यो नागपुरात्पुरान्दाशार्होरथेन दिव्येन चतुर्भुजाश्चतुः। रथं सुभद्रामधिरोप्य भाविनीं युधिष्ठिरस्या
नुमते जनार्दनः। पितृष्वसुश्चापि तथा महाभुजो विनिर्ययौ पौरजनाभिसंवृतः। तमन्वगाद्वानरव
र्यकेतनः ससात्यकिर्माद्रवतीसुतावपि। अगाधबुद्धिर्विदुरश्च माधवं स्वयं च भीमो गजराजविक्रमः।
निवर्तयित्वा कुरुराष्ट्रवर्द्धनं ततः स सर्वान्विदुरं च वीर्यवान्। जनार्दनो दारुकमाह सत्वरं प्रचोदया
श्वानिति सात्यकिस्तथा। ततो ययौ शत्रुगणप्रमर्दनः शिनिप्रवीरानुगतो जनार्दनः। यथा निहत्या
रिगणान्शतक्रतुर्दिवं तथानर्तपुरीं प्रतापवान्॥ इत्याश्वमेधिके॥ वैशंपायन उ०। तथा प्रयान्तं वार्ष्णे
यं द्वारकां भरतर्षभाः। परिष्वज्य न्यवर्तंत सानुयात्राः परंतपाः। पुनः पुनश्च वार्ष्णेयं पर्यष्वजत फा
ल्गुनः। आचक्षुर्विषयं चैनं ददर्श स पुनः पुनः। कृच्छ्रेणैव च तां पार्थो गोविंदे विनिवेशितां। संजहार
तदा दृष्टिं कृष्णश्चाप्यपराजितः। तस्य प्रयाणे यान्यासन्निमित्तानि महात्मनः। बहून्यद्भुतरूपाणि ता
नि मे गदतः शृणु। वायुर्वेगेन महता रथस्य पुरतो ययौ। कुर्वन्निःशर्करं मार्गं विरजस्कमकंटकं। ववर्ष वासव ८२

वस्त्रेवतोयं शुचिसुगंधि च। दिव्यानि चैव पुष्पाणि पुरतः शार्ङ्गधन्विनः। संप्रहृष्टो महेष्वासः स मेषु मरुधन्वसु
ददर्श च द्विजश्रेष्ठमुत्तंकममितौजसं। स तं संपूज्य तेजस्वी मुनिं पृथुललोचनः। पूजितस्तेन च तदा पर्यपृच्छद
नामयं। स पृष्टः कुशलं तेन संपूज्य मधुसूदनः। उत्तंको ब्राह्मणश्रेष्ठस्ततः पप्रच्छ माधवं। कच्चिच्छौरे त्वया
गत्वा कुरुपांडवसंसदं। कृतं सौभ्रात्रमचलं तन्मे व्याख्यातुमर्हसि। अपि संधाय तान् वीरानुपावृत्तो
ऽसि केशव। संबंधिनः सुदयिताः सततं वृष्णिपुंगवाः। कच्चित्पांडुसुताः पंच धृतराष्ट्रस्य चात्मजाः। लो
केषु विहरिष्यंति त्वया सह परंतपाः। स्वराष्ट्रेषु च राजानः कच्चित्प्राप्स्यंति वै सुखं। कौरवेषु प्रशांतेषु त्व
या नाथेन माधव। या मे संभावना तात त्वयि नित्यमवर्त्तत। अपि सा सफला कृष्ण कृता ते भरतान्प्रति। श्री
कृष्ण उ०॥ कृतो यत्नो मया ब्रह्मन्प्रशमे कौरवान्प्रति। न चाशक्यंत संधातुं ते धर्मरुचयो मया। ततस्ते निधनं
प्राप्ताः सर्वे ससुतबांधवाः। न दिष्टमप्यतिक्रांतुं शक्यं बुद्ध्या बलेन वा। महर्षे विदितं नूनं सर्वमेतत्तवानघ।
चेत्यक्रामन्मतिं मत्तो भीष्मस्य विदुरस्य च। ततो यमक्षयं जग्मुः समासाद्य परस्परं। पंचवै पांडवाः शिष्टाः
हतमित्रा हतात्मजाः। धार्त्तराष्ट्राश्च निहताः सर्वे ससुतबांधवाः। इत्युक्तवचने कृष्णे भृशं कोपसमन्वितः। उ
त्तंकः प्रत्युवाचेदं रोषादुत्फुल्ललोचनः। उत्तंक उ०। यस्माच्छक्तेन ते कृष्ण न त्राताः कुरुपांडवाः। संबंधिनः प्रि
यास्तस्माच्छप्स्येऽहं त्वां न संशयः। न च ते प्रसभं यस्मात्ते निगृह्य निवारिताः। तस्मान्मन्युपरीतस्त्वां शप्स्यामि
मधुसूदन। त्वया हि शक्तेन सता मिथ्याचारेण माधव। उपचीर्णाः कुरुश्रेष्ठा यस्त्वेतान्समुपेक्षिथाः। श्रीवा
सुदेव उ०॥ शृणु मे विस्तरेणेदं यद्वक्ष्ये भृगुनंदन। गृहाणानुनयं चापि तपस्वी ह्यसि भार्गव। ममैवमध्यात्मसु

त्वेमुंत्वेथाःशापमद्यवै।नचमांतपसाल्पेनशक्तोभिभवितुंपुमान्।नचतेतपसोनाशमिछामिजपतांवर।तप
स्तेसुमहद्दीप्तंगुरवश्चापितोषिताः।कौमारंब्रह्मचर्यंतेजानामिद्विजसत्तम।दुःखार्जितस्यतपसस्तस्मा
न्नेछामितेव्ययं।आश्वमेधिकेपर्वणिउत्तंकोपाख्याने॥उत्तंकउ०।ब्रूहिकेशवतत्वेनत्वमध्यात्ममनिंदितं
श्रुत्वाश्रेयोभिधास्यामिशापंवातेजनार्दन।श्रीकृष्णउ०।तमोरजश्चसत्वंचविद्धिभावान्मदात्मकान्।तथा
रुद्रान्वसूंश्चापिविद्धिमत्प्रभवान्द्विज।मयिसर्वाणिभूतानिसर्वभूतेषुचाप्यहं।स्थितइत्यभिजानीहिमा
तेभूदत्रसंशयः।तथादैत्यगणान्सर्वान्यक्षराक्षसपन्नगान्।गंधर्वाप्सरसश्चैवविद्धिमत्प्रभवान्द्वि
ज।सदसच्चैवयत्प्राहुरव्यक्तंव्यक्तमेवच।अक्षरंचाक्षरंचैवसर्वमेतन्मदात्मकं।येचाश्रमेषुवैधर्माश्चतुर्षुविहिता
मुने।दैवानिचैवकर्माणिसर्वविद्धिमदात्मकं।असच्चसदसच्चैवयद्विश्वंसदसत्परं।ततःपरंनास्तिचैवदेवदेवा
न्सनातनात्।ॐकारप्रभवान्वेदान्विद्धिमांत्वंभृगूद्वह।यूपंसोमंतथैवेहत्रिदशाप्यायितंमखे।होता
रमपिहोतव्यंविद्धिमांभृगुनंदन।अध्वर्युःकल्पतंत्रेंचहविःपरमसंस्कृतं।उद्गाताचापिमांस्तौतिगीतघो
षैर्महाध्वरे।प्रायश्चित्तेषुमांविद्धिशांतिमंगलवाचकाः।स्तुवंतिविश्वकर्माणंसततंद्विजसत्तम।विद्धिमह्यं
सुतंधर्ममग्रजंद्विजसत्तम।मानसंदयितंविप्रसर्वभूतदयात्मकं।तत्राहंवर्तमानेश्चनिवृत्तेश्चैवमानवैः।
बह्वीःसंसरमाणोवैयोनीर्हिद्विजसत्तम।धर्मसंस्थापनार्थायधर्मसंरक्षणायच।तैस्तैरूपैश्चवेषैश्चत्रिषुलो
केषुसंचरे।अहंविष्णुरहंब्रह्माशक्रोथप्रभवोप्ययः।भूतग्रामस्यसर्वस्यस्रष्टासंहारएवच।अधर्मेवर्तमाना
नांसर्वेषामहमच्युत।धर्मस्यसेतुंबध्नामिचलितेचलितेयुगे।तांतांयोनिंप्रविश्याहंप्रजानांहितकाम्यया।यदात्व ५२

हं देवयोनौ वर्त्तामि भृगुनंदन । तदाहं देववत्सर्वमाचरामि न संशयः । यदा गंधर्वयोनौ तु वर्त्तामि भृगुनंदन ।
तदा गंधर्ववच्चेष्टाः सर्वाश्चेष्टामि सर्वशः । नागयोनौ यदा चैव तदा वर्त्तामि नागवत् । यक्षराक्षसयोन्योश्च यथाव
द्विचराम्यहं । मानुष्ये वर्त्तमानेन कृपणं याचिता मया । न च ते जातसंमोहा वचोगृह्णंति यद्धितं । भयं च महदुद्दिश्य
त्रासिताः कुरवो मया । क्रुद्धेन च त्वाः पुनर्यथावदनुदर्शिताः । ते धर्मेण हि संयुक्ताः परीताः कालधर्मणा । धर्मे
ण निहता युद्धे गताः स्वर्गं न संशयः । लोकेषु पांडवाश्चैव गताः ख्यातिं न संशयः । एतत्ते सर्वमाख्यातं यन्मां
त्वं परिपृच्छसि । आश्वमेधिके उत्तंकोपाख्याने । उत्तंक० । अभिजानामि जगतः कर्त्तारं त्वां जनार्दन । नूनं तव
प्रसादोयमिति मे नात्र संशयः । चित्तं च सुप्रसन्नं मे त्वद्भावगतमच्युत । विनिवृत्तश्च मे कोप इति विद्धि परंतप ।
यदि त्वनुग्रहं कंचित्त्वत्तोर्हामि जनार्दन । द्रष्टुमिच्छामि ते रूपमैश्वरं तन्निदर्शय । वैशं० । ततः स तस्मै प्रीता
त्मा दर्शयामास तद्वपुः । शाश्वतं वैष्णवं धीमान्ददृशे यद्धनंजयः । स ददर्श महात्मानं विश्वरूपं महाभुजं ।
सहस्रसूर्यप्रतिमं दीप्तिमत्पावकोपमं । सर्वमाकाशमावृत्य तिष्ठंतं विश्वतोमुखं । तं दृष्ट्वा परमं रूपं विष्ण
वैष्णवमद्भुतं । विस्मयं च ययौ विप्रस्तं दृष्ट्वा परमेश्वरं । उत्तंक० । विश्वकर्मन्नमस्तेस्तु यस्य ते रूपमीदृशं । प
द्भ्यां ते पृथिवी व्याप्ता शिरसा चावृतं नभः । द्यावापृथिव्योर्यन्मध्यं जठरेण तदावृतं । भुजाभ्यामावृताश्चाशाः त्व
मिदं सर्वमच्युत । संहरस्व पुनर्देव रूपमक्षयमुत्तमं । पुनस्त्वां स्वेन रूपेण द्रष्टुमिच्छामि शाश्वतं । वैशंपायन०
तमुवाच प्रसन्नात्मा गोविंदो जनमेजय । वरं वृणीष्वेति तदा तमुत्तंकोब्रवीदिदं । पर्याप्त एष मेद्यैव वरस्त्व
त्तो महाद्युते । यत्ते रूपमिदं कृष्ण पश्यामि प्रभवाप्ययं । तमब्रवीत्पुनः कृष्णो मा त्वमत्र विचारय । अवश्यमे

वकर्त्तव्यममोघं दर्शनं मम। उत्तंक उ०। अवश्यकरणीयं वै यद्युत्तन्मन्यसे विभो। तोयमिच्छामि यत्रेष्टं मरुष्वेतद्धि दु
र्लभं। ततः संहृत्य तत्तेजः प्रोवाचोत्तंकमीश्वरः। एष्टव्ये सति चिंत्योहमित्युक्त्वा द्वारकां ययौ। ततः कदाचि
द्भगवानुत्तंकस्तोयकांक्षया। तृषितः प्रतिचक्राम मरौ सस्मार चाच्युतं। ततो दिग्वाससं धीमान् मातंगं मल
लिप्तितं। अपश्यत मरौ तस्मिन् श्वयूथपरिवारितं। भीषणं बद्धनिस्त्रिंशं बाणकार्मुकधारिणं। तस्याधः स्रो
तसोपश्यद्वारिस्तुरि द्विजोत्तमः। स्मरन्नेव तं स च तं प्राह मातंगः प्रहसन्निव। एह्युत्तंक प्रतीच्छस्व मत्तो वारि भृगूद्व
ह। कृपा हि मे सुमहती त्वां दृष्ट्वा तृष्कितं हि वै। इत्युक्तस्तेन स मुनिस्तत्तोयं नाभ्यनंदत। चिक्षेप च स तं धीमान्
वाग्भिरुग्राभिरच्युतं। पुनः पुनश्च मातंगः पिबस्वेति तमब्रवीत्। न चापिबत्स सक्रोधः क्षुभितेनांतरात्मना।
स निश्चयात्तथा तेन प्रत्याख्यातो महात्मना। श्वभिः सह महाराज तत्रैवांतरधीयत। उत्तंकस्तं तथा दृष्ट्वा तत
त्रीडितमानसः। मेने प्रलब्धमात्मानं कृष्णेनामित्रघातिना। अथ तेनैव मार्गेण शंखचक्रगदाधरः। आजगा
म महाबाहुरुत्तंकश्चैनमब्रवीत्। न युक्तं त्वीदृशं दातुं त्वया पुरुषसत्तम। सलिलं विप्रमुख्येभ्यो मातंगस्रो
तसा विभो। इत्युक्तो वचनं धीमान् महाबुद्धिर्जनार्दनः। उत्तंकं श्लक्ष्णया वाचा सांत्वयन्निदमब्रवीत्। यादृशे
नेव रूपेण योग्यं दातुं धृवेण वै। तादृशं खलु ते दत्तं त्वं तु तन्नावबुध्यसे। मया त्वदर्थमुक्तो हि वज्रपाणिः पुरंदरः।
उत्तंकायामृतं देहि तोयरूपमिति प्रभुः। स मामुवाच देवेंद्रो न मर्त्योऽमर्त्यतां व्रजेत्। अन्यमस्मै वरं देहीत्य
सकृत्स भृगुनंदन। अमृतं देयमित्येव मयोक्तः स शचीपतिः। स मां प्रसाद्य देवेंद्रः पुनरेवेदमब्रवीत्। यदि दे
यमवश्यं वै मातंगोऽहं महामते। भूत्वामृतं प्रदास्यामि भार्गवाय महात्मने। यद्येवं प्रतिगृह्णाति भार्गवोऽमृ ५८
तमुत्तमं। प्रदातुमेव गच्छामि भार्गवायामृतं प्रभो। प्रत्याख्यातस्त्वहं तेन न दद्यामिति माधव। स तथा समयं

कृत्वा तेन रूपेण वासवः। उपस्थितस्त्वया वापि प्रत्याख्यातो ममृतं ददत्॥ चांडालरूपी भगवान्सुमहांस्ते व्यति
क्रमः। यत्तु शक्यं मया कर्तुं भूय एव तवेप्सितं। तोयेप्सां तव दुर्द्धर्षां करिष्ये सफलामहं। येष्वहस्सु तव ब्रह्मन्
सलिलेछा भविष्यति। तदा मरौ भविष्यंति जलपूर्णाः पयोधराः। रसवच्च प्रदास्यंति ते तोयं भृगुनंदन। उत्तं
कमेघा इत्युक्ताः ख्यातिं यास्यंति चापि ते। इत्युक्तः प्रीतिमान्विप्रः कृष्णेन स बभूव ह। अद्याप्युत्तंकमेघा
स्तु मरौ वर्षंति भारत। आश्वमेधिके उत्तंकोपाख्याने॥ जनमेजय उ०॥ उत्तंकः केन तपसा संयुक्तः सुमहा
मना। यः शापं दातुकामो भूत् विष्णवे प्रभविष्णवे। वैशंपायन उ०॥ उत्तंको महता युक्तस्तपसा जनमेजय। गुरु
भक्तः स तेजस्वी नान्यत्किंचिदपूजयत्। सर्वेषामृषिपुत्राणामेष आसीन्मनोरथः। औत्तंकीं गुरुवृत्तिं वै प्रा
प्नुयामेति भारत। गौतमस्य तु शिष्याणां बहूनां जनमेजय। उत्तंकेभ्यधिका प्रीतिः स्नेहश्चैवाभवत्तदा। स
तस्य दमशौचाभ्यां विक्रांतेन च कर्मणा। सम्यक्चैवोपचारेण गौतमः प्रीतिमानभूत्। अथ शिष्यसहस्रा
णि समनुज्ञाय गौतमः। उत्तंकं परया प्रीत्या नाभ्यनुज्ञातुमैछत। तं क्रमेण जरा तात प्रतिपेदे महाद्युतिं।
न चान्वबुध्यत तदा स मुनिर्गुरुवत्सलः। ततः कदाचिद्राजेंद्र काष्ठान्यानयितुं ययौ। उत्तंकः काष्ठभारं च महां
तं समुपानयत्। स तु भाराभिभूतात्मा काष्ठभारमरिंदम। निःपिपेष क्षितौ राजन्परिश्रांतो बुभुक्षितः। त
स्य काष्ठे विलग्नाभूज्जटा रूप्यसमप्रभा। ततः काष्ठैः सह तदा पपात धरणीतले। ततः स भारनिःपिष्टः
क्षुधाविष्टश्च भार्गवः। दृष्ट्वा तां वयसोवस्थां रुरोदार्त्तस्वरं तदा। तस्यास्त्रि पतिपत्तितेर्द्ग्योकरोत्तेस्म
क्षितिः। ततो गुरुसुता तस्य पद्मपत्रनिभेक्षणा। जग्राहाश्रूणि सुश्रोणी करेण पृथुलोचना। पितुर्नियोगाद्ध

र्मूर्द्धा शिरसा वनतात द्रानहिता नभ्यपातान्वे शक्ता धारयितुं मही। गोतमस्त्वब्रवीद्विप्रमुत्तंकं प्रीतमानसः
कस्मात्तात तवाद्येह शोकोत्तरमिदं मनः। स्वैरं ब्रूहि विप्रर्षे श्रोतुमिच्छामि ते वचः। उत्तंक उ। भवद्भक्तेन मन
सा त्वत्प्रियचिकीर्षया। भवद्भक्तिगतेनेह भवद्भावानुगेन च। जरेयं नावबुद्धा मे नाभिज्ञातं सुखं च मे। श
तवर्षोषितं हि त्वं न माम भ्यनुजानथाः। भवता ह्यभ्यनुज्ञाताः शिष्याः प्रत्यवराश्च ये। उपपन्ना द्विजश्रेष्ठ
शतशोऽथ सहस्रशः। गोतम उ। त्वत्प्रीतियुक्तेन मया गुरुशुश्रूषया तव। व्यतिक्रामन्महाकालो नाव
बुद्धो द्विजर्षभ। किं त्वद्य यदि ते श्रद्धा गमनं प्रति भार्गव। अनुज्ञां गृह्य मत्तस्त्वं स्वगृहं गच्छ माचिरं। उत्तं
क उ। गुर्वर्थं कं प्रयच्छामि ब्रूहि त्वं द्विजसत्तम। तमुपाहृत्य गच्छेयमनुज्ञातस्त्वया विभो। गोतम उ। दक्षि
णा परितोषो वै गुरूणां सद्भिरुच्यते। तव ह्याचरतो नित्यं तुष्टोऽहं वै न संशयः। इत्थं च परितुष्टं मां विजानी
हि भृगुनंदन। युवा षोडशवर्षो हि यदद्य भविता भवान्। ददामि पत्नीं कन्यां च स्वां ते दुहितरं विभो। एता
मृते हि नान्या वै त्वत्तेजोऽर्हति सेवितुं। ततस्तां प्रतिजग्राह युवा भूत्वा यशस्विनीं। गुरुणा चाभ्यनुज्ञा
तो गुरुपत्नीमथाब्रवीत्। किं भवत्यै प्रयच्छामि गुर्वर्थं विनियुंक्ष्व मां। प्रियं हि तव कांक्षामि प्राणैरपि ध
नैरपि। यद्दुर्लभं हि लोकेऽस्मिन् रत्नमत्यद्भुतं भवेत्। तदानयेयं तपसा न हि मेऽत्रास्ति संशयः। अहल्यो
वाच। परितुष्टास्मि ते वत्स नित्यं भगवता सह। पर्याप्तमेतद्भद्रं ते गच्छ तात यथेच्छकं। वैशं उ। उत्तंकस्तु म
हाराज पुनरेवाब्रवीद्वचः। आज्ञापयस्व मां मातः कर्तव्यं हि प्रियं तव। अहल्योवाच। परितुष्टास्मि ते
वस दिव्ये वै मणिकुंडले। ते समानय भद्रं ते गुर्वर्थः सुकृतो भवेत्। स तथेति प्रतिश्रुत्य जगाम जनमेजय। ५४

मद्दपं लाध तेद्विकी ते ~~[illegible]~~
तदकी शाकसा शिहितं

गुरुपत्न्याः प्रियार्थं वै ते समानयितुं तदा। स जगाम ततः शीघ्रं उत्तंको ब्राह्मणर्षभः। सौदासं पुरुषादं वै भिक्षितुं
मणिकुंडले। गौतमस्त्वब्रवीत्पत्नीं उत्तंको नाद्य दृश्यते। इति पृष्टा समाचष्ट कुंडलार्थं गतं तु सा। ततः प्रोवाच प
त्नीं स न ते सम्यगिदं कृतं। शप्तः स पार्थिवो नूनं ब्राह्मणं तं वधिष्यति। अहल्योवाच॥ अजानंत्या नियुक्तः स भ
गवन्ब्राह्मणोद्य मे। तव प्रसादान्न भयं किंचित्तस्य भविष्यति। इत्युक्तः प्राह तां पत्नीमेवमस्त्विति गौतमः। उ
त्तंकोपि वने शून्ये राजानं तं ददर्श ह। आश्वमेधिके कुंडलानयने। वैशंपायन॥ स तं दृष्ट्वा तथाभूतं राजानं
घोररूपिणं। दीर्घश्मश्रुधरं नॄणां शोणितेन समुक्षितं। चकार न व्यथां विप्रो राजा त्वेनमथाब्रवीत्। प्रत्यु
द्ययौ महातेजाः स्तपकर्ता यमोपमः। दिष्ट्या त्वमसि कल्याण षष्ठे काले ममांतिकं। भक्षं मृगयमाण
स्य संप्राप्तो द्विजसत्तम। उत्तंक॥ राजन्गुर्वर्थिनं विद्धि चरंतं मामिहागतं। न च गुर्वर्थमुद्युक्तं हिंस्यमाहु
र्मनीषिणः। राजोवाच॥ षष्ठे काले ममाहारो विहितो द्विजसत्तम। न शक्यते समुत्स्रष्टुं क्षुधितेन मयाद्य वै।
उत्तंक॥ एवमस्तु महाराज समयः क्रियतां तु मे। गुर्वर्थमभिनिर्वर्त्य पुनरेष्यामि ते वशं। संश्रुतश्च मया
योर्थो गुरवे राजसत्तम। त्वदधीनः स राजेंद्र तं त्वां भिक्षे नराधिप। ददासि विप्रमुख्येभ्यस्त्वं हि रत्नानि
नित्यदा। दाता त्वं च नरव्याघ्र पात्रभूतः क्षिताविह। पात्रं प्रतिग्रहे चापि विद्धि मां नृपसत्तम। उपाकृत्य गु
रोरर्थं त्वदायत्तमरिंदम। समयेन तु राजेंद्र पुनरेष्यामि ते वशं। सत्यं ते प्रतिजानामि नास्ति मिथ्या कथं
चन। अनृतं नोक्तपूर्वं मे स्वैरेष्वपि कुतोन्यथा। सौदास॥ यदि मत्तस्त्वयायत्तो गुर्वर्थः कृत एव सः। यदि
चास्मि प्रतिग्राह्यः प्रो सांप्रतं तद्ब्रवीहि मे। उत्तंक॥ प्रतिग्राह्यो मतो मे त्वं सदैव पुरुषर्षभ। सोहं त्वामनुसं

नुसंप्राप्तो निदिशितुं मणिकुंडले। सोदास उ० पत्न्यास्ते मम विप्रर्षे याचिते मणिकुंडले। वरयार्थं त्वमन्यं वै तत्तेदास्या
मि सुव्रत। उत्तंक उ० अलं ते व्यपदेशेन न प्रमाणं यदि ते वयं। प्रयच्छ कुंडले मे त्वं सत्यवाक् भव पार्थिव। इ
त्युक्तस्त्वब्रवीद्राजा तमुत्तंकं वचः पुनः। गच्छ मद्वचनाद्देवीं ब्रूहि देहीति सत्तम। सैवमुक्ता त्वया नूनं म
द्वाक्येन शुचिस्मिता। प्रदास्यति द्विजश्रेष्ठ कुंडले ते न संशयः। उत्तंक उ०। क्व पत्नी तव तः शक्या मया द्र
ष्टुं नरेश्वर। स्वयं वापि तवान्न पत्नीं किमर्थं नोपसर्पति। सोदास उ०। द्रक्ष्यसे तां तवानघ कस्मिंश्चिद्वनेन
निर्झरे। षष्ठे काले न तु मया साद्य शक्या हि दृष्टुमद्य वै। वैशंपायन उ० उत्तंकस्तु तथोक्तः स जगाम भरतर
र्षभ। मदयंतीं च दृष्ट्वा सो ज्ञापयत्स्वं प्रयोजनं। सौदासवचनं श्रुत्वा ततः सा पृथुलोचना।
प्रत्युवाच महाबुद्धिमुत्तंकं जनमेजय। एवमेतन्महाब्रह्मन् नानृतं वदसे नघ। अभिज्ञानं तु किं
चित्त्वं समानयितुमर्हसि। इमे हि दिव्ये मणिकुंडले च देवाश्च यक्षाश्च महोरगाश्च। तैस्तैरुपायैः
परिहर्तुकामाश्छिद्रेषु नित्यं परितर्कयंति। निक्षिप्तमेतद्भुवि पन्नगास्तु रत्नं समासाद्य परामृषेयुः
यक्षास्ततोच्छिष्टधृतं सुराश्च निद्रावशं चापि परिधर्षयेयुः। छिद्रेष्वेतेषु हि सदा ग्लकृतेध्येते विजर्ण
ना देवराक्षसनागानामप्रमत्तेन धार्यते। स्यंदेते तु दिने रुक्मं रात्रौ च द्विजसत्तम। रात्रौ नक्षत्रता
राणां प्रभामाक्षिप्य वर्तते। एते ह्यामुच्य भगवन् क्षुत्पिपासाभयं कुतः। विषाग्निश्वापदेभ्यश्च भयं जा
तु न विद्यते। ह्रस्वेन चैते ह्यामुक्ते भवतो ह्रस्वके सदा। अनुरूपेण चामुक्ते तत्प्रमाणे द्विजायते।
एवंविधे समे चैते कुंडले परमार्चिते। त्रिषु लोकेषु विख्याते तद्भित्ति ज्ञानमानय॥ आश्वमेधिके कुंडला ५६

नयने॥वैशंपायन०॥समित्रसहमासाद्यत्वत्तिज्ञानमयाव्रतात्तस्मिन्नेवदावज्ञिज्ञानंसचेक्ष्वाकुवरस्तदा।सौ
दास०।नस्यैवेषागतिःसोम्यानचान्याविद्यतेगतिः।एतन्मतंसमाज्ञायप्रयच्छमापिकुंडले।इत्युक्तस्तेस्ता
मुत्तंकस्तत्पतुर्वाक्यमथाब्रवीत्।श्रुत्वाचसाततःप्रादात्तस्मैतेमणिकुंडले।अवाप्यकुंडलेतेतुरा
जानंपुनरब्रवीत्।किमेतद्गुह्यवचनंश्रोतुमिच्छामिपार्थिव।राजोवाच॥प्रजानिसर्गाद्विप्रान्वैक्षत्रियाः
पूजयंतिहि।विप्रेभ्यश्चापिबहवोदोषाःप्रादुर्भवंतिनः।विप्रेभ्यःप्रणतःसोहंविप्राद्दोषमवाप्तवान्।
मतिमन्यांनपश्यामिमदयंतीसहायवान्।स्वर्गद्वारस्यगमनेस्थानेचेहद्विजोत्तम।नहिराज्ञाविशेषेणावि
रुद्धेनद्विजातिभिः।शक्यंत्रिलोकेसंस्थातुंप्रेत्यवासुखमेधितुं।तदिष्टितेमयातेद्यदत्तेस्वेमणिकुंडले।
यःकृतस्तेद्यसमयःसफलंतंकृतंमम।उत्तंक०।राजंस्तथेहकर्तास्मिपुनरेव्याभितेंकितं।प्रश्नंचकंचितु
प्रष्टुंतेकौतूहलमताबमे।सौदास०।ब्रूहिविप्रयथाकामंप्रतिवक्तास्मितेवचः।वक्तास्मिसंशयंतेहंनमेत्रा
स्तिविचारणा।उत्तंक०।प्राहुर्वाक्यगतंमित्रंधर्मनैपुणदर्शिनः।मित्रेषुयश्चविषमस्तेनइत्येवतंविदुः।सतां
साप्तपदीमैत्रीत्येवमाहुर्वैदिकाश्रुतिः।सत्ववान्मित्रतामद्यसंप्राप्तोममपार्थिव।सममेबुद्धिंप्रयच्छस्वसम्य
कुधर्मभृतांवर।अवाप्तार्थोहिमद्यैवंहत्तवांश्चपुरुषादकः।तवसकाशमागंतुंक्षमंममनवेतिवा।सौदास०।
क्षमंचेदिहवक्तव्यंमयाद्विजवरोत्तम।मत्समीपंद्विजश्रेष्ठनागंतव्यंकथंचन।एवंतवप्रपश्यामिश्रेयोत्र
भृगुकुलोद्वह।आगच्छतोहितेविप्रभवेन्मृत्युरसंशयं॥वैशंपायन०।इत्युक्तःसतदाराज्ञासमंबुद्धिमताहि
तं।समनुज्ञाप्यराजानमहल्यांप्रतिजग्मिवान्।गृहीत्वाकुंडलेदिव्येगुरुपत्न्याःप्रियंकरः।जवेनमहता

प्रायाद्गौतमस्याश्रमं प्रति। तथा तयो रक्षणं च मदयंत्यानि त्ताषितं। तथा ते कुंडले बद्ध्वा तदा कृष्णाजिनेन पत्
स कस्मिंश्चित्क्षुधाविष्टः फलभारसमन्वितं। बिल्वं ददर्श स मुनि रारुरोह क्षुधान्वितः। शाखां शाखां सज
तस्यैव कृष्णाजिनमरिंदम। पातयामास बिल्वानि तदा स द्विजपुंगवः। अथ पातयमानस्य बिल्वापहृतच
क्षुषः। निपेतुस्तानि बिल्वानि तस्मिन्नेवाजिने विभो। यस्मिंस्ते कुंडले बद्धे तदा द्विजवरेण वै। बिल्वप्र
हारैस्तस्याथ विशीर्णबंधनं ततः। स कुंडलं तदजिनं पपात सहसा तरोः। विशीर्णबंधने तस्मिन् गते कृष्णा
जिने महीं। अपश्यद्भुजगस्तत्र रुचिरे मणिकुंडले। ऐरावतकुलोत्पन्नः शीघ्रो भूत्वा तदा स वै। विदश्या
स्येन वल्मीकं विवेशाथ स कुंडले। ह्रियमाणे तु दृष्ट्वा स कुंडले भुजगेन वै। पपात वृक्षात्सोद्वेगो दुःखा
त्परमकोपनः। स दंडकाष्ठमादाय वल्मीकमखनत्तदा। क्रोधामर्षाभितप्तांगस्ततो वै द्विजसत्तमः। अ
हानि द्वादशाव्यग्रो दशचान्यानि भारत। तस्य वेगमसह्यं तमसहन्ती वसुंधरा। दंडकाष्ठाभिनुन्नांगी
चचाल भृशमातुरा। ततः खनत एवाथ विप्रस्य धरणीतलं। नागलोकस्य पंथानं कर्तुकामस्य निश्चया
त्। रथेन हरियुक्तेन तं देशमुपजग्मिवान्। वज्रपाणिर्महातेजा ददर्श द्विजसत्तमं। स तु तं ब्राह्मणो भूत्वा
तस्य दुःखेन दुःखितः। उत्तंकमब्रवीत्तात नैतच्छक्यं त्वयेति वै। इतो हि नागलोको वै योजनानां सहस्रशः।
न दंडकाष्ठसाध्यं च मन्ये कार्यमिदं तव। उत्तंक उवाच। नागलोको यदि ब्रह्मन्न शक्यो कुंडले मया। प्राप्तुं प्राणा
न्विमोक्ष्यामि पश्यतस्ते द्विजोत्तम। यदा स नाशकत्तस्य निश्चयं कर्तुमन्यथा। वज्रपाणिस्तदा दंडं वज्रा ७
स्त्रेण युयोज ह। ततो वज्रप्रहारैस्तैर्दार्यमाणा वसुंधरा। नागलोकस्य पंथानमकरोज्जनमेजय। स तेन मा

र्गणा तदा नागलोकं विवेश ह। ददर्श नागलोकं स योजनानि सहस्रशः। प्राकारनिचयैर्दिव्यैर्मणिमुक्ता
द्यलंकृतैः। उपवनैश्च महता नागशातडागैस्तमयैस्तथा। दिव्यस्फटिकसोपाना नदीश्च विमलोदकाः। ददर्श
वृक्षांश्च सुबहून् नानाद्विजगणैर्युतान्। नागलोकस्य च द्वारं ददर्श स द्विजोत्तमः। पंचयोजनविस्तारमाय
तं दशयोजनं। तं नागलोकमुत्तंकः प्रेक्ष्य दीनोऽभवत्तदा। निराशश्चाभवत्तात कुंडलाहरणे पुनः। तत्र
प्रोवाच तुरगस्तत्र तत्तं कृष्णवालधिः। ताम्रास्यनेत्रः कौरव्य प्रज्वलन्निव तेजसा॥ धमस्वापानमेतन्मे ततस्त्वं
विप्र लप्स्यसे। ऐरावतसुतेनेह तव चानीते च कुंडले॥ मा जुगुप्सां कृथाः पुत्र त्वमत्रार्थे कथंचन। त्वयैतद्विधि
नाचीर्णं गौतमस्य मुनेः सदा। उत्तंक उ॰। कथं च वैतं जानीयामुपाध्यायाश्रमं प्रति। यन्मया चीर्णपूर्वं वै श्रो
तुमिच्छामि तमहं। अश्व उ॰। गुरोर्गुरुं मां जानीहि ज्वलितं जातवेदसं। त्वया ह्यहं सदा वत्स गुरोरर्थेत
योधना। स सततं पूजितो विप्र शुचिना भृगुनंदन। तस्माच्छ्रेयो विधास्यामि तवैवं कुरु दक्षिणां। इत्युक्तः स त
दा कार्षीदुत्तंकश्चित्रभानुना। घृतार्चिः प्रीतिमांश्चास्य प्रजज्वाल दिधक्षया। ततोऽस्य रोमकूपेभ्यो धम
तस्तस्य भारत। घनः प्रादुरभूद् धूमः नागलोकभयावहः। तेन धूमेन सहसा वर्द्धमानेन भारत। नागलो
के महाराज न प्रज्ञायत किंचन। हाहाकृतमभूत्सर्वमैरावतनिवेशनं। वासुकिप्रमुखानां च नागानां ज
नमेजय। न प्राकाशंत वेश्मानि धूमरुद्धानि भारत। नीहारसंवृतानीव वनानि गिरयस्तदा। ते धूमरक्त
नयना वह्नितेजोभितापिताः। आजग्मुर्निश्चयं ज्ञातुं भार्गवस्यातितेजसः। ते श्रुत्वा निश्चयं तस्य मह
र्षेस्तिग्मतेजसः। संभ्रांतमनसः सर्वे पूजां चक्रुर्यथाविधि। सर्वे प्रांजलयो नागा बालवृद्धपुरोगमाः।

शिरोभिः प्रणिपत्याथ सुप्रसीद भगवन्निति। प्रसाद्य ब्राह्मणं तेतु पाद्यमर्घ्यं निवेद्य च। प्रायछन्कुंडले दिव्ये प
न्नगाः परमार्चिते। ततः स प्रतिजितो नागैस्तदोत्तंकः प्रतापवान्। अग्निं प्रदक्षिणं कृत्वा जगाम गुरुसद्म तत्। सगत्वा
त्वरितो राजन् गौतमस्य निवेशनं। वासुकिप्रमुखानां च नागानां जनमेजय। सर्वेषां संसगुरवे यथावद्द्विजसत्तमः।
प्रायछत्कुंडले दिव्ये गुरुपत्न्यै तदानघ। एवं लोकत्रयं तेन विप्रेण जनमेजय परिक्रम्याहृते दिव्ये ततस्ते मणि
कुंडले। एवंप्रभावः समुनिरुत्तंको जनमेजय। परेण तपसा युक्तो यन्मां त्वं परिपृच्छसि। आश्वमेधिके पर्वणि
उत्तंकोपाख्यानं समाप्तं। जनमेजय उवाच। उत्तंकाय वरं दत्वा गोविंदो द्विजसत्तम। अत ऊर्ध्वं महाबाहुः किंच
कार महायशाः॥ वैशंपायन उ०॥ उत्तंकाय वरं दत्वा तदा सात्यकिना सह। द्वारकामेव गोविंदः शीघ्रवेगैर्महा
हयैः। सरांसि सरितश्चैव विविधानि वनानि च। अतिक्रम्याससादाथ रम्यां द्वारवतीं पुरीं। वर्तमाने महारा
ज महे रैवतकस्य ह। उपायात्पुंडरीकाक्षो युयुधानानुगस्तदा। अलंकृतश्च स गिरिर्नानारूपैर्विचित्रितैः
बभौ रुक्ममयैः कोशैः सर्वतः पुरुषर्षभ। कांचनस्रग्भिरग्र्याभिः सुमनोभिस्तथैव च। वासोभिश्च महाशै
लः कल्पवृक्षैश्च सर्वशः। दीपवृक्षैश्च सौवर्णैरभीक्ष्णमनुशोभितः। गुहानिर्झरदेशेषु दिवाभूतो बभूव
ह। पताकाभिर्विचित्राभिः सघंटाभिः समंततः। पुंभिः स्त्रीभिश्च संघुष्टः प्रगीत इव चाभवत्। अतीवप्रे
क्षणीयोभून्मेरुर्मुनिगणैरिव। मनोज्ञं हृष्टरूपाणां स्त्रीणां पुंसां च भारत। गायतां पर्वतेंद्रस्य दिवस्पृ
गिव निःस्वनः। प्रमत्तमत्तसंगीतैः क्ष्वेडितोत्कुष्टसंकुला तथा किलकिलाशब्दैर्भूधरोभून्मनोहरः। विप
णापणवान् रम्यो भक्ष्यभोज्यविहारवान्। वस्त्रमाल्योत्करयुतो वीणावेणुमृदंगवान्। सुरामैरेयमिश्रे

णस्तस्य सोऽन्येन वैवहि। दीनां धृष्टद्युम्नादिभ्यो दीयमानेन तथा निशं। ततो परमकल्याणो महत्तस्य महागिरिः पुण्या
वसथ चाचीरपुण्य कृद्भिर्निषेवितः। चिह्नारोहच्छिविराणां महारैवतकस्य ह। सनगो वैश्मसंकीर्णो दिवलोक इवा
नसो। ततस्त्वक्षकसांनिध्यमासाद्य नरनर्षभाः। वाक्रूसद्म प्रतीकाशो बहुरूपसहस्रशोलराट्। संपद्यमानः सत
दा विवेशास्तवनं शुभं। गोविंदः सात्यकिश्चापि जगाम स्वभवनं स्वकं। विवेशाथ प्रहृष्टात्मा चिरकालप्रवासकः
कृत्वा नसुकरं कर्म दानवेषु वासवः। उपयांतं तु वार्ष्णेयं ये जेष्टुर्ध्येयं धकास्तदा। अभ्यगच्छन्महात्मानं दे
वाइवशतक्रतुं। सतानभ्यर्च्य मेधावी दृष्ट्वा च पितरं तदा। दृष्ट्वा समागतं कृष्णं स्नेहेन मुशलायुधः वन
मालीहलीरामः पर्यष्वजत केशवं। कृष्णोपि च तातं रामं यत्नात् समतिवाद्य सः। अभ्यवादयत प्रीतः पितरं
मातरं तथा। ताभ्यां च सपरिष्वक्तः सान्त्वतश्च महाभुजः। उपोपविष्टः सर्वैस्तैर्वृष्णिभिः परिवारितः। सवि
श्रांतो महातेजाः कृतपादावसेचनः। कथयामास तत्कृष्णः पृष्टः पित्रा महाहवं। महाभारते आश्वमेधि
के। वसुदेव उवाच। श्रुतवानस्मि वार्ष्णेय संग्रामं परमाद्भुतं। नराणां वदतां पुत्र कथोद्घातेषु नित्यशः। त्वं तु प्रत्य
क्षदर्शी च रूपज्ञश्च महाभुजः। तस्मात्प्रब्रूहि संग्रामं यथातथ्येन मेऽनघ। यथा तदभवद्युद्धं पांडवानां
महात्मनां। भीष्मकर्णकृपद्रोणशल्यादिभिरनुत्तमं। अन्येषां क्षत्रियाणां च कृतास्त्राणामनेकशः। ना
नावेषाकृतिवतां नानादेशनिवासिनां। इत्युक्तः पुंडरीकाक्षः पित्रा मातुस्तदंतिके। शशंस कुरुवीरा
णां संग्रामे निधनं यथा। वासुदेव उवाच। अत्यद्भुतानि कर्माणि क्षत्रियाणां महात्मनां। बहुलत्वान्न संख्यातुं
शक्यान्यब्दशतैरपि। प्राधान्यतस्तु गदतः समासेनैव मे शृणु। भीष्मः सेनापतिरभूदेकादशवरूप

तिः। कौरव्यः कौरवेयाणां देवानामिव वासवः। शिखंडी पांडुपुत्राणां नेता सत्त्वसमूपतिः। बलस्तवरक्षि
तो धीमानुधामत्ता सव्यसाचिना। तत्रापि तद्युद्धं दशाहानि महात्मनोः। उरूणां पांडवानां च सुमह
ल्लोमहर्षणं। ततः शिखंडी गांगेयमयुध्यत्तं महाहवे। जघान बकुन्तिबाणैः सह गांडीवधन्वना। अकरो
न्नतदा कालेशरतल्पगतो मुनिः। अयनं दक्षिणं हित्वा उत्तरायणकांक्षया। ततः सेनापतिरभूद्द्रोणोपि
विदुषां वरः। प्रवीरः कौरवेंद्रस्य काव्यो दैत्यपतेरिव। अक्षौहिणीभिः शिष्टाभिर्नवभिर्द्विजसत्तमाः। संवृ
तः समरश्लाघी गुप्तः कृपवृषादिभिः। धृष्टद्युम्नोत्तु चमूनेता पांडवानां महात्मनां। गुप्तो भीमेन तेजस्वी मि
त्रेण वरुणो यथा। स तु सेनापरिवृतो द्रोणप्रेप्सुर्महारथः। पितुर्निकारं संस्मृत्य रणे कर्माकरोन्महत्।
तस्मिंस्ते पृथिवीपाला द्रोणपार्षतसंगरे। नानादेश्या गता वीराः प्रायशो निधनं गताः। दिनानि पंच तद्युद्धमभ
वत्तल्लोमहर्षणं। ततो द्रोणः परिश्रांतो धृष्टद्युम्नवशं गतः। ततः सेनापतिरभूत्कर्णो दुर्योधनस्य हा। अ
क्षौहिणीभिः शिष्टाभिर्वृतः पंचभिराहवे। तिस्रस्तु पांडुपुत्राणां चमूर्बीभत्सुपालिताः। हतप्रवीर
भूयिष्ठाः बभूवुः समवस्थिताः। ततः पार्थं समासाद्य पतंग इव पावकं। पंचत्वमगमत्सौतिर्द्वितीये
हनि दारुणे। हते कर्णे तु कौरव्या निरुत्साहा निरोजसः। अक्षौहिणीभिस्तिसृभिर्मद्रेशं पर्यवारयन्। हत
वाहनभूयिष्ठाः पांडवापि युधिष्ठिरं। अक्षौहिण्या निरुत्साहाः शिष्टया पर्यवारयन्। जघान मद्ररा
जानं कुरुराजो युधिष्ठिरः। तस्मिंस्तदार्द्धदिवसे कर्म कृत्वा सुदुष्करं। हते शल्ये तु शकुनिं सहदेवो म
हात्मना। आहर्तारं कलेस्तस्य जघानामितविक्रमः। निहते शकुनौ राजा धार्तराष्ट्रः सुदुर्मनाः। अपाक्रमत

गदापाणिर्हतस्तत्र पितृसैनिकः। तमन्वधावत्संक्रुद्धो भीमसेनः प्रतापवान्। ह्रदे द्वैपायने चापि सलिलस्थं
ददर्श तं। ततः शिष्टेन सैन्येन समंतात्पर्यवारयन्। उपोपविश्य हृष्टाश्च ह्रदस्थं पंच पांडवाः। विगाह्य स
लिलं त्वाशु वाग्बाणैर्भृशविक्षतः। उत्थाय स गदापाणिर्युद्धाय समुपस्थितः। ततः स निहतो राजा धार्त्त
राष्ट्रो महामृधे। भीमसेनेन विक्रम्य पश्यतां पृथिवीक्षितां। ततस्तत्पांडवं सैन्यं प्रसुप्तं शिबिरे निशि। नि
हतं द्रोणपुत्रेण पितुर्वधममृष्यता। हतपुत्रा हतबला हतमित्रा मया सह। युयुधानद्वितीयेन पंच शि
ष्टास्तु पांडवाः। सहैव कृपभोजाभ्यां द्रौणिर्युद्धादमुच्यत। युयुत्सुश्चापि कौरव्यो मुक्तः पांडवसंश्र
यात्तथा। निहते कौरवेंद्रे वै सानुबंधे सुयोधने। विदुरः संजयश्चैव धर्मराजमुपस्थितौ। एवं तदभवद्युद्ध
महान्यष्टादशैव तु। यत्र ते पृथिवीपालाः प्रायशो निधनं गताः। वैशं० अप्रवृत्तां महाराज कथां तां लोम
हर्षणां। दुःखहर्षपरिक्लेशा वृष्णीनामभवंस्तदा। आश्वमेधिके। वैशंपायन० कथयन्नेव तु तदा वा
सुदेवः प्रतापवान्। महाभारतयुद्धं तं कथांते पितुरंतिके। अभिमन्योर्वधं वीरः सोत्यक्रामन्महामते। अ
प्रियं वसुदेवस्य मा भूदिति जनार्दनः। मा दौहित्रवधं श्रुत्वा वसुदेवो महात्ययं। दुःखशोकाभिसंतप्तो
भवेदिति महामतिः। सुभद्रा तमतिक्रांतमात्मजस्य वधं रणे। आचक्ष्व कृष्ण सौभद्रवधमित्यपतद्भु
वि। तामपश्यन्निपतितां वसुदेवः क्षितौ तदा। दृष्ट्वैव च पपातोर्व्यां सोपि दुःखेन मूर्छितः। ततः स दौ
हित्रवधदुःखशोकसमाहतः। वसुदेवो महाराज कृष्णं वचनमब्रवीत्। ननु त्वं पुंडरीकाक्ष सत्यवाग्भु
वि विश्रुतः। यद्दौहित्रवधं मेद्य नाख्यापयसि शत्रुहन्। तद्भागिनेयनिधनं तत्वेनाचक्ष्व मे प्रभो। सदृशा

हस्तवकथं त्रातसिर्निहतोरणे। दुर्मरं खतवार्ष्णेय काले प्राप्ते नजितःसह। यत्र मे हृदयं दुःखात् शतधा न विदी
र्यते। किमब्रवीत्त्वां संग्रामे सुभद्रां मातरं प्रति। मां चापि पुंडरीकाक्ष चपलाक्षः प्रियो मम॥ वसुदेव उ० आहवं
पृष्ठतः कृत्वा कच्चिन्न निहतः शरैः। कच्चिन्मुखं न गोविंद तेनाजौ विकृतं कृतं। स हि कृष्ण महातेजा श्लाघन्निव
ममाग्रतो बालभावेन विजयमात्मनो कथयत्सुतो। कच्चिन्न विषमो बालो द्रोणकर्णकृपादिभिः। धरण्यां नि
हतः शेते तन्ममाचक्ष्व केशव। स हि भीष्मं च द्रोणं च कर्णं च रथिनां वरं। स्पर्द्धते स्म रणे नित्यं दुहितुः पुत्रको
मम। एवं विधं बहुतदा विलपंतं सुदुःखितं। पितरं दुःखिततरो गोविंदो वाक्यमब्रवीत्। न तेन विकृतं वक्त्रं
कृतं संग्राममूर्द्धनि। न पृष्ठतः कृतश्चापि संग्राममस्तेन दुस्तरः। निहत्य पृथिवीपालान् सहस्रशतसंमि
तान्। खेदितो द्रोणकर्णाभ्यां दौःशासनिवशं गतः। नन्वेनं वसगतः स्वर्गं जहि शोकं महामते। नहि व्यसनमा
साद्य सीदंते सन्नराः कृतविद्या द्रोणकर्णप्रभृतयो येन प्रतिसमासिताः। रणे महेंद्रप्रतिमाः स कथं नाप्नु
याद्दिवं। स शोकं जहि दुर्द्धर्ष मा च मन्युवशं गमः। शस्त्रपूतां हि स गतिं गतः परपुरंजयः। तस्मिंस्तु निहते
वीरे सुभद्रेयं स्वसा मम। दुःखार्त्ता पृथुतं प्राप्य कुररीव रुरोद ह। प्रापतत्तं समासाद्य पर्यपृछत दुःखिता।
तस्याः क्व च वनं कृत्वा सर्वास्ताः कुरुयोषितः। भुजाभ्यां परिगृह्यैनं च कुंतुः परमार्थवत्। उत्तरां चाब्रवी
द्रुपदात्मजे भर्त्ता किं ते गतः। क्षिप्रमागमनं मह्यं तस्मै त्वं सन्निवेदय। ननु नामाद्य वैराटि श्रुत्वा मम गिरं सदा
भवनान्निपतत्यस्तु कस्मान्नाभ्येति ते पतिः। अभिमन्यो कुशलिनो मातुलास्ते महारथाः। कुशलं चाह
वं सर्वे पृच्छंति त्वामिहागतं। आचक्ष्व मह्यं संग्रामं यथापूर्वमरिंदम। कस्मादेवं विलपतीं नाद्येह प्रति ५०

नावबोधः एवमादि तु वार्ष्णेय्यास्तदस्याः परिदेवितं । श्रुत्वाद्दथासुदुःखार्त्ता शौरेर्वाक्यमथाब्रवीत् । सुतं देवासु
देवेन तथा सात्यकिनारदौ । पित्रा च पालितो बालः स हतः कालधर्मणा । ईदृशो मर्त्यधर्मोयं मात्रोथ यदुनंद
नि । पुत्रो हि तव दुर्द्धर्षः संप्राप्तः परमां गतिं । कुले महति जातासि क्षत्रियाणां महात्मनां । मा शुचस्त्वं पला
क्षि त्वं पुंडरीकनिभेक्षणे । उत्तरां त्वमवेक्षस्व गुर्विणीं मा शुचः शुभे । पुत्रमेषा हि तस्याशु जनयिष्यति
भामिनी । एवमाश्वास्य चैवैनां कुंतीं यदुकुलोद्वहः । विहाय शोकं दुःखं च श्राद्धं तस्योपकल्पयत् । सम
नुज्ञाप्य धर्मज्ञः राजानं भीममेव च । धनंजयो यमौ चैव ददौ दानान्यनेकशः । ततः प्रदाय गा बह्वी
र्ब्राह्मणेभ्यो यदूद्वहः । समहस्रप्रतवार्ष्णेयो वैराटीमाब्रवीदिदं । वैराटि नेह संतापस्त्वया कार्यः कथं
चन । भर्त्तारं प्रति सुश्रोणि गर्भस्थं रक्ष मे शिशुं । एवमुक्त्वा ततः कुंती विरराम महाद्युते । तामनुज्ञाप्य चै
वेनां सुभद्रां पुनरानयं । एवं स निधनं प्राप्तो दौहित्रस्तव माधव । संतापं जहि दुर्द्धर्ष मा च शोके मनः
कृथाः । अश्वमेधिके ॥ वैशं० एतच्छ्रुत्वा तु पुत्रस्य वचः शूरात्मजस्तदा । विहाय शोकं धर्मात्मा ददौ श्रा
द्धमनुत्तमं । तथैव वासुदेवोपि स्वस्त्रीयस्य महात्मनः । दयितस्य पितुर्नित्यमकरोदौर्ध्वदेहिकं । तथा
रात सहस्राणि ब्राह्मणानां महात्मनां । विविधं भोजयामास भोज्यं सर्वगुणान्वितं । आच्छाद्यत महाबाहु
र्त्रिमंहतृष्णामपानुदत् । ब्राह्मणानां तदा कृष्णस्तदभूल्लोमहर्षणं । सुवर्णं चैव गाश्चैव शयनाच्छा
दनानि च दीयमानं तदा विप्रा वर्द्धतामिति चाब्रुवन् । वासुदेवोथ दाशार्हो बलदेवः ससात्यकिः । अभि
मन्योस्तदा श्राद्धमकुर्वन् सर्व एव ते । अतीव दुःखसंतप्ता न शर्म चोपलेभिरे । तथैव पांडवा वीरा नगरे नाग

साध्वये। नोपगच्छंति वैशांतिमप्तिमन्युविनाकृता। सुबहून्यपि राजेंद्र दिवसानि विराटजा। नात्तुं कृप
तिशे। कार्तां तदत्त कुरूणां महत्। अस्मिन्स्थ एव तस्मिंस्तु गतेस्याः संप्रलीयति। आजगाम तदा व्यासो ज्ञा
त्वा दृष्टियेन चक्षुषा। आगम्य चाब्रवीद्धीमान् दृष्ट्वा पांडुपृथुललोचनां। उत्तरां त्वं महातेजाः शोकं संत्यज्य
तामिति। जविष्यति महातेजाः पुत्रस्तव यशस्विनि। प्रसादाद्वासुदेवस्य मम व्याहरणादिति। पांडवानामयं
वां ते पालयिष्यति मेदिनीं। धनंजयं च वसं प्रेक्ष्य धर्मराजस्य परपूतः। व्यासो वाक्यमुवाचेदं हर्षयन्निव तत्ता
रत। पौत्रस्तव महाराज जनिष्यति महामनाः। दृष्ट्वी सागरपर्यंतां पालयिष्यंति चैव ह। तस्माच्छोकं कुरु
श्रेष्ठ जहि त्वमरिकर्षण। विचार्यमत्र नहि ते सत्यमेतद्भविष्यति। पच्चापि वृष्णिवीरेण कृष्णेन कुरुनंद
न। पुरोक्तं तत्तथा वापि मा ते त्रास्तु विचारणा। विबुधानां गतो लोकान् सत्यानात्मनिर्जितान्। न स शोच्य
स्त्वया वीरो न चान्यैः कुरुसत्तम। एवं पितामहेनोक्तो धर्मात्मा स धनंजयः। त्यक्त्वा शोकं महातेजा हृष्ट
रूपो भवत्तदा। पिता हि तव धर्मज्ञ गतस्तस्मिन्महामतो। व्यवर्द्धत यथाकामं शुक्लपक्ष इवोडुराट्। ततः सं
चोदयामास व्यासो धर्मात्मजं नृपं। अश्वमेधं प्रति तदा ततः सोंतर्हितो भवत्। धर्मराजस्तु मेधावी श्रुत्वा व्या
सस्य तद्वचः। वित्तोपानयने तात चकार गमने मतिं। इत्याश्वमेधिके जनमेजयप० श्रुत्वैतद्वचनं ब्रह्मन्र
व्यासेनोक्तं महात्मना। अश्वमेधं प्रति तदा किं नृपः प्रचकार ह। रत्नं च यन्मरुत्तेन निहितं धरणीतले।
तदवाप कथं चापि तन्मे व्याख्यातुमर्हसि वैशं०। श्रुत्वा द्वैपायन वचो धर्मराजो युधिष्ठिरः। भ्रातृन्सर्वा
न्समानाय्य काले वचनमब्रवीत्। अर्जुनं भीमसेनं च माद्रीपुत्रौ यमावपि। श्रुतं वो वचनं वीराः सोह ५२

दाउक्तमेव यत्। कुरूणां हितकामेन प्रोक्तं कृष्णेन धीमता। तपोवृद्धेन महता सुहृदां त्वतिमिच्छता। कुरू
णां धर्मशीलेन व्यासेनाद्भुतकर्मणा। भीष्मेण च महाप्राज्ञ गोविंदेन च धीमता। संस्मृत्य तदहं सम्यक्कर्
तुमिच्छामि पांडवाः। आयत्यां च तदात्वे च सर्वेषां तद्धि नो हितं। अनुबंधे च कल्याणं तद्वचो ब्रह्मवा
दिनः। इयं हि वसुधा सर्वा क्षीणरत्ना कुरूद्वहाः। तच्चाचष्ट बहु व्यासो मरुत्तस्य धनं नृपाः। यद्येतद्वो
बहुमतं मन्यध्वं वक्षमं यदि। तदानयामहे धनं कथं वा भीम मन्यसे। इत्युक्तवाक्ये नृपतौ तदा कुरुकुलो
द्वहे। भीमसेनो नृपश्रेष्ठं प्रांजलिर्वाक्यमब्रवीत्। रोचते मे महाबाहो यदिदं भाषितं त्वया। व्यासा
ख्यातस्य वित्तस्य समुपानयनं प्रति। यदि तत्प्राप्नुयामेह धनमाविक्षितं विभो। कृतमेव महाराज भवे
दिति मतिर्मम। ते वयं प्रणिपातेन गिरीशस्य महात्मनः। तदानयाम भद्रं ते समभ्यर्च्य कपर्दिनं। तं वि
भुं देवदेवेशं तस्यैवानुचरांश्च तान्। प्रसाद्यार्थमवाप्स्यामो नूनं वाग्बुद्धिकर्मभिः। रक्ष्यंते ये च त
द्द्रव्यं किंकरा रौद्रदर्शनाः। ते च वश्या भविष्यंति प्रसन्ने वृषभध्वजे। श्रुत्वैवं वदतस्तस्य वाक्यं भीमस्य
भारत। प्रीतो धर्मात्मजो राजा बभूवातीव भारत। अर्जुनप्रमुखाश्चापि तथेत्येवाब्रुवन्वचः। कृत्वा तु
पांडवाः सर्वे रत्नाहरणनिश्चयं। सेनामाज्ञापयामासुर्नक्षत्रेहनि च ध्रुवे। ततो ययुः पांडुसुता ब्राह्मणान्
स्वस्ति वाच्य च। अर्चयित्वा सुरश्रेष्ठं पूर्वमेव महेश्वरं। मोदकैः पायसेनाथ मांसापूपैस्तथैव च। आप्या
य्य च महात्मानं प्रययुर्मुदितास्तदा। तेषां प्रयास्यतां तत्र मंगल्यानि शुभान्यथ। प्राहुः प्रहृष्टमनसो द्वि
जाः पौराश्च सर्वशः। ततः प्रदक्षिणीकृत्य शिरोभिः प्रणिपत्य च। ब्राह्मणानग्निसहितान् प्रययुः पांडुनं

दनाः। समनुज्ञाप्य राजानं पुत्रशोकसमाहतं। धृतराष्ट्रं स गांधार्यं विदुरं पृथां पृथुललोचनां। मूले निक्षिप्य कौरव्यं यु
युत्सुं धृतराष्ट्रजं। संपूज्यमानाः पौरैश्च ब्राह्मणैश्च महात्मभिः॥ इत्याश्वमेधिके पांडवप्रयाणो नाम प्राचे
त्रंपा॥ ततस्तु प्रययुर्हृष्टाः प्रहृष्टनरवाहनाः। रथघोषेण महता कंपयंतो वसुंधरां। संस्तूयमाना मुनिभिः
सूतमागधबंदिभिः। स्वेन सैन्येन संवीता यथादित्याः स्वरश्मिभिः। पांडुरेणातपत्रेण ध्रियमाणेन मूर्द्ध
नि। बभौ युधिष्ठिरो राजा पौर्णमास्यामिवोडुराट्। जयाशिषो प्रहृष्टानां नराणां पथि पांडवाः। प्रत्यगृ
ह्णन्यथान्यायं यथावद्भरतर्षभ। तथैव सैनिकाः सर्वे राजानमुपयांति ये। तेषां हलहला शब्दो दिवं व्या
प्यावतिष्ठत। स सरांसि नदीश्चैव वनान्युपवनानि च। अतिक्रम्य महाराज तं गिरिं प्रत्यपद्यत। तस्मिन्
देशे च राजेंद्र यत्र तद्द्रव्यमुत्तमं। चक्रे निवेशनं राजा पांडवः सह सैनिकः। शिवे देशे समे चैव तदा भरतस
त्तम। अग्रतो ब्राह्मणान्कृत्वा तपोविद्यासमन्वितान्। पुरोहितं च कौरव्यो वेदवेदांगपारगं। अग्निवेश्यं च रा
जानो ब्राह्मणाश्च सपुरोधसः। कृत्वा शांतिं यथान्यायं सर्वतः पर्यवारयन्। कृत्वा तु मध्ये राजानममात्यांश्च
यथाविधि। षट्पदे तत्र संस्थानं निवेशं चक्रिरे द्विजाः। मत्तानां वारणेंद्राणां निवेशं च यथाविधि। कारयित्वा
स राजेंद्रो ब्राह्मणानिदमब्रवीत्। अस्मिन्कार्ये द्विजश्रेष्ठा नक्षत्रे दिवसे शुभे। यथा भवंतो मन्यंते कर्तुम
र्हथ तत्तथा। यथा कालात्ययो नः स्यादिहैव परिलंबतां। इति निश्चित्य विप्रेंद्राः क्रियतां यदनंतरं। श्रुत्वैतद्व
चनं राज्ञो ब्राह्मणाः सपुरोधसः। इदमूचुर्वचो हृष्टाः धर्मराजप्रियेप्सवः। अद्यैव नक्षत्रमहश्च पुण्यं
पितामहश्रेष्ठ तमं क्रियासु। अंभोभिरद्यैव वसाम राजन्नुपोष्यतां चैव भवद्भिरद्य। श्रुत्वा तु तेषां द्विज ५२

नियविचित्राणि राजनानि सहस्रशः॥ उद्धारयामास तदा धर्मपुत्रो युधिष्ठिरः॥ तेषां लक्षणमप्यासीत् महाकर
पुटस्तथा॥ निबंधस्ताअनेनैराजंस्कूलार्द्धमत्तजन्नृपा॥ वाहनं पांडुपुत्राणां तत्रासीत्तु विशांपते॥ षष्टिमुष्ट्रसह
स्राणि तथैव द्विगुणा हयाः॥ वारणाश्च महाराज सहस्रेशा तस्मिन्तां॥ सकटानि रथाश्चैव तत्ता वद्देव करेणवः
खराणां पुरुषाणां च परिसंख्या न विद्यते॥ एतद्वित्तं तु सुमहत् यदद्धे युधिष्ठिरः॥ षोडशाष्टं चतुर्विंश
त्सहस्रं भारलक्षणं॥ एतेषां धारयनुद्रव्यं पुनरभ्यर्च्य पांडवाः॥ महादेवं महाराज प्रत्ययाद्युधिष्ठिरः॥
द्वैपायनाभ्यनुज्ञाता पुरस्कृत्य पुरोहितौ॥ गोयुते गोयुते चापि न्यवसत्पुरुषर्षभः॥ सा पुरात्तिमुखो राजन्नज
गाममहतीं चमूः॥ कष्टाद्द्रविणभारार्त्ता हर्षयंती कुरूद्वहान्॥ इत्याश्वमेधिके पर्वणि मरुत्तनिधिलाभः॥
वैशं॰ एतस्मिन्नेव काले तु वासुदेवोपि वीर्यवान्॥ उपेयाद्वृष्णिभिः सार्द्धं पुरं वारणसाह्वयं॥ समयं वाजि
मेधस्य विदित्वा पुरुषर्षभः॥ यथोक्तो धर्मपुत्रेण व्रजन्मैस्वां पुरीं प्रति॥ रौक्मिणेयेन सहितो युयुधानेन चैव
हि॥ चारुदेष्णेन सांबेन गदेन कृतवर्मणा॥ सारणेन च वीरेण निशठेनोल्मुकेन च॥ बलदेवं पुरस्कृत्य सु
भद्रां सहितैर्नीतदा॥ द्रौपदीमुत्तरां चैव पृथां चाप्यवलोककः॥ समाश्वासयितुं चैव क्षत्रियानिहतेश्वरा॥
तानागतान्समीक्ष्यैव धृतराष्ट्रो महीपतिः॥ प्रत्युज्जगाम विधिवत् विदुरश्च महात्मनाः॥ तत्रैवन्य
वसत्कृष्णः स्वर्चितः पुरुषर्षभः॥ विदुरेण महातेजास्तत्रैव च युयुत्सुना॥ वसत्सु वृष्णिवीरेषु
तत्राथ जनमेजय॥ जज्ञे तव पिता राजन् परीक्षित्परवीरहा॥ स तु बालो महाराज ब्रह्मास्त्रेनीति
पाडितः॥ शावो बभूव निश्चेष्टो हर्षशोकविवर्द्धनः॥ हृष्टानां सिंहनादेन जनानां तत्र निस्वनः॥ आ ५२

नियविविचित्राणिस्राजनानिसहस्त्रशः॥ च्छ्वारयामासतत्तदाधर्मपुत्रोयुधिष्ठिरः॥ तेषांलक्षणमप्यासीत्महाकर
पुटस्तथा॥ निबंधस्ताअनंतराजंस्कूलार्द्धमनुजन्नृप॥ वाहनेपांडुपुत्राणांतत्रासीत्तुविशांपते॥ षष्टिमुष्ट्रसह
स्राणितथैवद्विगुणाहयाः॥ वारणाश्चमहाराजसहस्त्रेशतसंमिता॥ सकटानिरथाश्चैवतावदेवकरेणवः
खराणांपुरुषाणांचपरिसंख्यानविद्यते॥ एतद्वित्तंतुसुमहत्यददध्रेयुधिष्ठिरः॥ षोडशाष्टंचतुर्विंश
त्सहस्त्रंसारलक्षणं॥ एतेषांधारयन्नुद्रव्यंपुनरन्यद्र्व्यंपांडवाः॥ महादेवंमहाराजप्रस्थानाछ्युधिष्ठिरः
द्वैपायनाभ्यनुज्ञातापुरस्कृत्यपुरोहितौ॥ गोयुतेगोयुतेयावितिन्यवसत्पुरुषर्षभः॥ सापुरातिमुखोराजन्नज
गामम हस्तिनव मूनः कृष्णाद्रविणतारानोहर्षयंतोऊरूद्दहान्॥ इत्याश्वमेधिकेपर्वणिमरुत्तनिधिलाभः
वेश॥ ०॥ एतस्मिन्नेवकालेतुवासुदेवोपिवीर्यवान्॥ उपेयाद्वृष्णिभिःसार्द्धंपुरंवारणसाह्वयं॥ समयंवाजि
मेधस्यविदित्वापुरुषर्षभः॥ यथोक्तोधर्मपुत्रेणव्रजन्प्रस्थांपुरीप्रति॥ रौक्मिणेयेनसहितोयुयुधानेनचैव
हि॥ चारुदेष्णेनशांबेनगदेनकृतवर्मणा॥ सारणेनचवीरेणनिशठेनोल्मुकेनच॥ बलदेवंपुरस्कृत्यसु
भद्रांसहितानीतदा॥ द्रौपदीमुत्तरांचैवपृथांचाप्यवलोककः॥ समाश्वासयितुंचैवक्षत्रियानिहतेश्वरान्
तानागतान्समीक्ष्यैवधृतराष्ट्रोमहीपतिः॥ प्रत्यगृह्णाद्यथान्यायंविदुरश्चमहात्मनाः॥ तत्रैवन्य
वसत्कृष्णःस्वर्चितःपुरुषर्षभः॥ विदुरेणामहातेजास्तत्रैवचयुयुत्सुना॥ वसत्सुवृष्णिवीरेषु
तत्राथजनमेजय॥ जज्ञेतवपिताराजन्परीक्षित्परवीरहा॥ सतुबालोमहाराजब्रह्मास्त्रेणाभि
पीडितः॥ शावोबभूवनिश्चेष्टोहर्षशोकविवर्द्धनः॥ हृष्टानांसिंहनादेनजनानांतत्रनिस्वनः॥ आ ५२

सत्तमानां कृतोपवासा रजनीं नरेंद्राः ऊचुः प्रतीताः कुशास्तरेषु यथाध्वरे प्रज्वलितहुताशाः। ततो नि
शा सा व्यगमन्महात्मनां संकथ्यवत्तां विप्रसमीरिता गिरः। ततः प्रभाते विमले द्विजर्षभास्ते वचो ब्रुवन्ध
र्मसुतं जनाधिपं। इत्याश्रमेधिके गिरिनिवासनो नाम। ब्राह्मणा ऊचुः। क्रियतामुपहारोयं त्र्यंबकाय
महात्मने। कृतोपहारं नृपते ततः स्वार्थयितामहे। वैरा॰। श्रुत्वा तु वचनं तेषां ब्राह्मणानां महात्मनां। गि
रीशाय यथान्यायमुपहारमुपाहरत्। ब्राह्मणेभ्यः सहस्राणि गवां दत्वा तु भूमिपः। आज्येन तर्पयि
त्वाग्निं विधिवत्संस्कृतेन स्वा मंत्रसिद्धं चरुं कृत्वा पुरोधाः प्रययौ तदा। सुगृहीत्वा सुमनसो मंत्रपूता जनाधि
पः। मोदकैः पायसेनाथ धूपैश्चोपहरद्बलिं। सुमनोभिर्विचित्राभिर्मांसैरुच्चावचैरपि। सर्वैरि
ष्टकृतं मत्वा विधिवद्वेदपारगाः। किंकराणां ततः पश्चाच्चकार बलिमुत्तमां। यक्षेंद्राय कुबेराय माणि
भद्राय चैव हि। तथान्येषां तु भूतानां यक्षाधिपतयश्च ये। कृशरं पायसं मांसेन निःपावैस्तिलसंयुतैः।
ओदनं अंततः कृत्वा पुरोधाः समुपाहरत्। ब्राह्मणेभ्यस्तथा दत्वा भोजनं वदे सदक्षिणं। नक्तंचराणां भूतानां व्या
दिदेश बलिं तदा। भूतप्रजानिरुद्धं ततः सुमनोभिश्च संहतं। शुशुभे स्थानमत्यर्थं देवदेवस्य पार्थिव। कृत्वा तु पू
जां रुद्रस्य गणानां चैव सर्वशः। पयोव्यासं पुरस्कृत्य नृपो रत्ननिधिं प्रति। पूजयित्वाथ नाध्यक्षं प्रणिपत्याभि
वाद्य च। सुमनोभिर्विचित्राभिरपूपैः कृशरेण च। शंखादींश्च निधीन्सर्वान्निधिपालांश्च सर्वशः। अभ्यर्चयि
त्वा द्विजाग्र्यांश्च स्वस्तिवाच्य च वीर्यवान्। तेषां पुण्याहघोषेण तेजसा स समवस्थितः। प्रीतिमान्स कुरुश्रेष्ठः खान
यामास तं निधिं। ततः पात्र्यः सकरकाः सारमंतकमनोरमाः। भृंगाराश्च कटाहाश्च सकलावर्द्धमानकाः। बहु

विश्यप्रदिशः सर्वाः पुनरेवव्युपारमत्॥ ततस्तु त्वरितः कृष्णो विवेशांतःपुरं तदा॥ युयुधानद्वितीयो वै व्यथि
तेंद्रियमानसः॥ ततस्त्वरितमायांतीं ददर्शस्वां पितृष्वसां॥ क्रोशंतीमभिधावंती वासुदेवः पुनःपुनः॥ पृष्ठ
तो द्रौपदी चैव सुभद्रा च यशस्विनी॥ विक्रोशंतिश्च धावंत्यो बांधवानां स्त्रियो नृप॥ ततः कृष्णं समासाद्य कुंती
राजसुता तदा॥ प्रोवाच राजशार्दूल बाष्पगद्गदया गिरा॥ वासुदेव महाबाहो सुप्रजा देवकी त्वया॥ त्वं नो ग
तिः प्रतिष्ठा च त्वदायत्तमिदं कुलं॥ यदुप्रवीर योयं ते स्वस्त्रीयस्यात्मजः प्रभो॥ अश्वत्थाम्ना हतो जातस्त
मुज्जीवय केशव॥ त्वया ह्येव प्रतिज्ञातमैषीके यदुनंदन॥ अहं संजीवयिष्यामि मृतं जातमिति प्रभो॥ सोयं
जातो मृतस्तात पश्यैनं पुरुषर्षभ॥ उत्तरां च सुभद्रां च द्रौपदीं मां च माधव॥ धर्मपुत्रं च भीमं च फाल्गुनं नकु
लं तथा॥ सहदेवं च दुर्धर्षं सर्वान्नस्त्रातुमर्हसि॥ अस्मिन्प्राणाः समायत्ताः पांडवानां ममैव च॥ पांडोश्च पिं
डो दाशार्ह तथैव श्वसुरस्य वै॥ अभिमन्योश्च भद्रं ते प्रियस्य सदृशस्य च॥ प्रियमुत्पादयाद्य त्वं प्रेतस्या
पि जनार्दन॥ उत्तरा हि पुरोक्तं वै कथयत्यरिसूदन॥ अभिमन्योर्वचः कृष्ण प्रियत्वात्ते न संशयः॥ अ
ब्रवीत्किल दाशार्ह वैराटीमार्जुनिः पुरा॥ मातुलस्य कुलं भद्रे तव पुत्रो गमिष्यति॥ गत्वा वृष्ण्यंधककुलं क
धनुर्वेदं ग्रहीष्यति॥ अस्त्राणि च विचित्राणि नीतिशास्त्राणि केवलं॥ इत्येतत्प्रणयात्तात सोब्रवीत्परवीरहा॥
कथयामास दुर्धर्षस्तथा चैतन्न संशयः॥ तांस्त्वां वयं प्रणम्येह याचामो मधुसूदन॥ कुलस्यास्य हितार्थाय
कुरु कल्याणमुत्तमं॥ एवमुक्त्वा तु वार्ष्णेयं पृथा पृथुललोचना॥ उच्छ्रित्य बाहू दुःखार्त्ता ताश्चान्याश्च पतन्
भुवि॥ अब्रुवंश्च महाराज सर्वाः सास्रविलोचनाः॥ स्वस्रीयो वासुदेवस्य मृतो जात इति प्रभो॥ एवमुक्तेस्तु

तः कुंतीभ्यस्त्वरमाणात्तत्र जनार्दनः। कृष्णो निपतितां चैनां सांत्वयामास भारत। इत्याश्वमेधिके पारिक्षितजन्म।
वैशंपायन०। उत्थितायां तु कुंत्यां सुभद्रा भ्रातरं तदा। दृष्ट्वा चुक्रोश दुःखार्ता वचनं चेदमब्रवीत्। पुंड
रीकाक्ष पश्येमं पौत्रं पार्थस्य धीमतः। परिक्षीणेषु कुरुषु परिक्षीणं गतायुषं। इषीका द्रोणपुत्रेण भीमसे
नार्थमुद्यता। सोत्तरायां निपतिता विजये मयि चैव ह। सेयं ज्वलंती हृदये मम तिष्ठति केशव। यन्न पश्यामि
दुर्द्धर्ष सह पुत्रांस्तु बांधवौ। किं नु वक्ष्यति धर्मात्मा धर्मपुत्रो युधिष्ठिरः। भीमसेनार्जुनौ वापि माद्रवत्यासुतौ
तुतौ। श्रुत्वाभिमन्योस्तनयं जातं च मृतमेव च। मुषिता इव वार्ष्णेय द्रोणपुत्रेण पांडवाः। अभिमन्युः प्रियः कृ
ष्ण पितॄणां नात्र संशयः। ते श्रुत्वा किं नु वक्ष्यंति द्रोणपुत्रास्त्रनिर्जिताः। भविता नः परं दुःखं किं तदन्यज्जना
र्द्दन। अभिमन्योः सुतात्कृष्ण मृताज्जाताज्जनार्द्दन। साहं प्रसादये कृष्ण त्वामद्य शिरसा नता। पृथेयं द्रौ
पदी चैव ताः पश्य पुरुषोत्तम। यदा द्रोणसुतो गर्भान्पांडूनां हंति माधव। तदा किल त्वया द्रौणिः क्रुद्धेनोक्तोरिमर्द्द
न। अकामं त्वां करिष्यामि ब्रह्मबंधो नराधम। अहं संजीवयिष्यामि किरीटितनयात्मजं। इत्येतद्वचनं श्रुत्वा
जानमाना बलं तव। प्रसादये त्वां दुर्द्धर्ष जीवतामभिमन्युजः। यद्येवं त्वं प्रतिश्रुत्य न करोषि वचश्शुभं। सफ
लं वृष्णिशार्दूल मृतां मामुपधारय। अभिमन्योः सुतो वीर न संजीवति यद्ययं। जीवति त्वयि दुर्द्धर्ष मे
लं त्वमभिमन्युजं। किं करिष्याम्यहं त्वया। संजीवयैनं दुर्द्धर्ष मृतं त्वमभिमन्युजं। सदृशाक्षसुतं वीर सस्यं
वर्षन्निवांबुदः। त्वं हि केशव धर्मात्मा सत्यवान्सत्यविक्रमः। स तां वाचमृतां कर्तुमर्हसि त्वमधारय। इच्छन्न ५८
पि हि लोकांस्त्रीन्संजीवयेथा मृतानिमान्। किं पुनर्दयितं जातं स्वस्त्रीयस्यात्मजं मृतं। प्रभावज्ञास्मि ते कृष्ण त

स्मादेतत्ब्रवीमि ते। अरुद्धं पांडुपुत्राणामिमं परमनुग्रहं। स्वसेति वा महाबाहो हतपुत्रेति वा पुनः। प्रपन्ना
मामिमां वेति प्रसादं कर्तुमर्हसि। इत्याश्वमेधिके पर्वणि सुत्तराविलापो नाम। ६७। एवमुक्तस्तु राजेंद्र केशि
हा दुःखमूर्छितः। तथेति व्याजहारोच्चैः ह्लादयन्निव तं जनं। वाक्येन तेन हि यदा तं जनं पुरुषर्षभः। ह्लाद
यामास स विभुर्घर्मं तिसलिलेरिवास प्राविशत्ततस्तूर्णं जन्मवेश्म पितुस्तव। अर्चितं पुरुषव्याघ्र सितैर्मा
ल्यैर्यथाविधि। अपां कुंभैः सुपूर्णैश्च विन्यस्तैः सर्वतो दिशं। घृतेन तिंदुकालातैः सर्षपैश्च महाभुज। शा
स्त्रैश्च विमलन्यस्तैः पावकैश्च समंततः। वृद्धाभिश्चापि रामाभिः परिवारार्थमावृतं। दक्षैः परिवृतं चा
रैस्तिषग्भिः कुशलैस्तथा। ददर्श स च तेजस्वी रक्षोघ्नान्यपि सर्वशः। द्रव्याणि स्थापितानि स्म विधिवत्
कुशलैर्जनैः। तथायुक्तं च तदृष्ट्वा जन्मवेश्म पितुस्तव। हृष्टोभवद्धृषीकेशः साधु साध्विति चाब्रवीत्
तथा ब्रुवति वार्ष्णेये प्रहृष्टवदने तदा। द्रौपदी त्वरिता गत्वा वैराटीं वाक्यमब्रवीत्। अयमायाति ते भद्रे
श्वशुरो मधुसूदनः। पुराणर्षिरचिंत्यात्मा समीपमपराजितः। सापि बाष्पकलां वाचं निगृह्याश्रूणि चैव
हि। सुसंवीताभवद्देवी देववत्कृष्णमीक्षती। सा तदा दूयमानेन हृदयेन तपस्विनी। दृष्ट्वा गोविंदमायां
तं कृपणं पर्यदेवयत्। पुंडरीकाक्ष पश्यावां बालेन हि विनाकृतौ। अभिमन्युं च मां चैव हतं तं चैव जना
र्दन। वार्ष्णेय मधुहन्वीर शिरसा त्वां प्रसादये। द्रोणपुत्रास्त्रनिर्दग्धं जीवयैनं ममात्मजं। यदि मे धर्म
राजा वा भीमसेनेन वा पुनः। त्वया वा पुंडरीकाक्ष वाक्यमुक्तं हितं प्रभो। अजानता नामिषीकेयं जनित्री
हंत्विति प्रभो। इयमेव विनष्टा स्यान्नेदं वै गतं सवे। गर्भस्थस्यास्य बालस्य ब्रह्मास्त्रेण निपातनं। ३४

त्वा नृशंसो ऽदुर्बुद्धिर्द्रौणिः किं फलमश्नुते। सा त्वां प्रसाद्य शिरसा याचे शत्रुनिबर्हण। प्राणांस्त्यक्ष्यामि गोविं
द नायं संजीवते यदि। अस्मिन्हि बहवः शावे ये ममासन्मनोरथाः। ते द्रोणपुत्रेण हता हे किं नु जीवामि
केशव। आसीन्मम मतिः कृष्ण पूर्णोत्संगा जनार्द्दनं। अभिवादयिष्ये हृष्टेति तदिदं वितथं कृतं। च
पलाक्षस्य दयादे मृते ऽस्मिन्पुरुषर्षभ। विफला मे कृता कृष्ण हृदये च मनोरथाः। चपलाक्षः किला
तीव प्रियस्ते मधुसूदन। सुतं पश्य त्वमस्यैनं ब्रह्मास्त्रेण निपातितं॥ कृतघ्नोयं नृशंसोयं यथास्य ज
नकस्तथा। यः पांडवीं श्रियं त्यक्त्वा गतोद्य यमसादनं। मयाप्येतत्प्रतिज्ञातं रणमूर्द्धनि केशव। अभि
मन्यो हते वीर त्वामेष्याम्यचिरादिति। तच्च नाकरवं कृष्ण नृशंसा जीवितप्रिया। इदानीं मां गतां तत्र किं नु
वक्ष्यति फाल्गुनिः। इत्याश्वमेधिके उत्तराविलापो नाम॥ वैशंपायन। सेयं विलप्य करुणं दुःखादेव
तपस्विनी। उत्तरा न्यपतद्भूमौ कृपणा पुत्रगृद्धिनी। तां तु दृष्ट्वा निपतितां हतबंधुपरिच्छदां। चुक्रोश कुंती
दुःखार्त्ता सर्वाश्च भरतस्त्रियः। मुहूर्त्तमिव तद्राजन् पांडवानां निवेशनं। अप्रेक्षणीयमभवदार्त्तस्व
रनिनादितं। सा मुहूर्त्तं तु राजेंद्र पुत्रशोकाभिपीडिता। कश्मलाभिहता वीर वैराटी त्वभवत्तदा। प्रति
लभ्य तु सा संज्ञामुत्तरा भरतर्षभ। अंकमारोप्य तं पुत्रमिदं वचनमब्रवीत्। धर्मज्ञस्य सुतः संस्त्वम
धर्मं नावबुध्यसे। यस्त्वं वृष्णिप्रवीरस्य कुरुषे नाभिवादनं। पुत्र गत्वा मम वचो ब्रूयास्त्वं पितरं दिवि।
दुर्मरं प्राणिनां वीर काले प्राप्ते कथंचन। याहं त्वया विहीनाद्य पत्या पुत्रेण चैव हि। मरणेछापि जीवा
मि हतस्वस्तिनकिंचना। अथवा धर्मराज्ञाहमनुज्ञाता महाभुजा। भक्षयिष्ये विषं तीक्ष्णं प्रवेक्ष्ये वा ५५
हुताशनं। अथवा दुर्मरं तात यदिदं मे सहस्रधा। पतिपुत्रविहीनाया हृदयं न विदीर्यते। उत्तिष्ठ पुत्र प

य्येमां दुःखितां पतितां महीं॥ आर्त्तां त्वद्भक्तां दीनां निमग्नां शोकसागरे॥ आर्यां वै पतत्यपांचालीं सात्वतीं च
तपस्विनीं॥ मां च पश्य सुदुःखार्त्तां व्याधबद्धां मृगीमिव। उत्तिष्ठ ...स्य वदनं लोकनाथस्य धीमतः। पुंडरी
कविशालाक्षं पुरेव चपलेक्षणं। एवं विप्रलपंतीं तां दृष्ट्वा निपतितां पुनः। उत्तरां ता स्त्रियः सर्वाः पुनरुत्था
पयंस्ततः॥ उत्थाय तु पुनर्धैर्यात्तत्तमस्य पतेः सुता। प्रांजलिः पुंडरीकाक्षं तमावेवास्य नादयत्। श्रुत्वा
तु तस्या विपुलं प्रलापं पुरुषर्षभः। उपस्पृश्य ततः कृष्णो ब्रह्मास्त्रं प्रत्यसंहरत्॥ प्रतिजज्ञे च दाशार्ह
स्तस्य जीवितमात्मनः। अब्रवीच्च विशुद्धात्मा सर्वं विश्रावयं जगत्। न ब्रवीम्युत्तरे मिथ्या सत्यमेतद्भवि
ष्यति। एवं संजीवयाम्येनं पश्यतां सर्वदेहिनां। नोक्तपूर्वं मया मिथ्या स्वैरेष्वपि कदाचन। न च युद्धे परावृत्त
स्तथा संजीवयाम्ययं। यथा मे दयितो धर्मो ब्राह्मणश्च विशेषतः। अभिमन्योः सुतो जातो मृतो जीवत्वयं तथा॥
यथाहं नाभिजानामि विजयेन कदाचन। विरोधं तेन सत्येन मृतो जीवत्वयं शिशुः॥ यथा सत्यं च धर्म
श्च मयि नित्यं प्रतिष्ठितौ। तथा मृतः शिशुरयं जीवतामभिमन्युजः॥ यथा कंसश्च केशी च धर्मेण निह
तौ मया। तेन सत्येन बालोयं पुनरुज्जीवतामिह॥ इत्युक्तो वासुदेवेन स बालो भरतर्षभ। शनैः शनैर्महा
राज प्रास्पंदत सचेतनः॥ इत्याश्वमेधिके पर्वणि परीक्षिज्जीवनं॥ वैशंपा॰ ब्रह्मास्त्रं तु यदा राजन्कृष्णेन
प्रतिसंहृतं। तदा तद्वेश्म सहसा तेजिविदीपितं। ततो रक्षांसि सर्वाणि नेशुस्त्यक्त्वा गृहं तु तत्॥ अंतरिक्षे च वागा
सीत्साधु साध्विति केशवा। तदस्त्रं ज्वलितं चापि पितामहमगात्तदा। ततः प्राणान्पुनर्लेभे पिता तव जनेश्वर।
व्यचेष्टत च बालो सौ यथोत्साहं यथाबलं। बभूवुर्मुदिता राजंस्ततस्ता भरतस्त्रियः॥ स्त्रियो भरतसिंह
नां प्रशशंसु जनार्दनं। कुंती द्रुपदपुत्री च सुभद्रा चोत्तरा तथा। स्त्रियो भरतसिंहानां बभूवुर्हृष्टमान

सा:।तत्र मल्ला नटाश्चैव ग्रंथिकाः सौख्यशायिताः।सूतमागधसंघाश्चास्तुवंतिस्म जनार्दनं।ऊरुवं:।स्तवाली
त्तिराशीत्तिर्नरतर्षभः।उपास्याय तु यथाकालमुत्तरा यदुनंदनं।अभ्यवादयदप्रीता सहपुत्रेण भारत।
तस्यै प्रीतो ददौ कृष्णो बहुरत्नं विशेषवत्।तथान्ये वृष्णिशार्दूला नाम चास्याकरोत्प्रभुः।पितुस्तव महा
राज सत्यसंधो जनार्दनः।परिक्षीणे कुले यस्मादजातोयमभिमन्युजः।परीक्षिदिति नामास्य भवत्वित्य
ब्रवीत्तदा।सोवर्द्धत यथाकालं पिता तव नराधिपः।मननः प्रह्लादनस्वासीत्सर्वलोकस्य भारत।मा
स जातस्तु ते वीर पिता तव भारत।अथाजग्मुस्तु बहुलं रत्नमादाय पांडवाः।तान्समीपगतान्श्रुत्वा
निर्ययुर्वृष्णिपुंगवाः।अलंचक्रुश्च माल्यौघैः पुरुषा नागसाह्वयं।पताकाभिर्विचित्राभिर्ध्वजैश्च विवि
धैरपि।वेश्मानि समलंचक्रुः पौराश्चापि जनाधिप।देवतायतनानां च पूजा बहुविधास्तथा।दा।संदिदे
शाथ विदुरः पांडुपुत्रप्रियेप्सया।राजमार्गाश्च तत्रासन्सुमनोभिरलंकृताः।शुशुभे तत्पुरं चापि समु
द्रौघनिःस्वनं।नर्तकैश्चापि नृत्यद्भिर्गायनानां च निःस्वनैः।आसीद्वैश्रवणस्येव निवासं तत्पुरं तदा।
वंदिभिश्च नरै राजन्स्त्रीसहायैः सहस्रशः।तत्र तत्र प्रदेशेषु समंतादुपशोभितं।पताकाधूयमाना
श्च समं तान्मातरिश्वना।आदर्शयन्निव तदा कुरून्वै दक्षिणोत्तरान्।अघोषयत्तदा चापि पुरुषो राज
धूर्गतः।सर्वरात्रविहारोद्य रत्नाभरणलक्षणः।आश्वमेधिके पुरालंकरणं।।वैशं०।।तान्समीपगा
तान्श्रुत्वा पांडवान्शत्रुकर्शनः।वासुदेवो देववृष्णिवीरैः।सहामात्यः प्रत्युद्यातो दिदृक्षया।ते समेत्य य
थान्यायं पांडवा वृष्णिभिः सह।विविशुः सहिता राजन्पुरं वारणसाह्वयं।महता तस्य सैन्यस्य खु ५५

रनेमिस्त्वनेन हा।आश्वास्य पृथिवीपालं वै पितृव्येनासीत्समाहृतं।ते केशवमग्रतः कृत्वा विविशुः स्वपुरं तदा।पां
डवाः प्रीतमनसः सामात्याः ससुहृद्गणाः।ते समेत्य यथान्यायं धृतराष्ट्रं नराधिपं।कीर्तयंतः स्व
नामानि तस्य पादौ ववंदिरे।धृतराष्ट्रादनु च ते गांधारीं सुबलात्मजां।कुंतीं च राजशार्दूल प्रयतास्ते ववं
दिरे।विदुरं पूजयित्वा च वैश्यापुत्रं समेत्य च।पूज्यमानाः स्म ते वीरा व्यराजंत विशांपते।ततस्तत्परमाश्च
र्यं विचित्रं महदद्भुतं।शुश्रुवुस्ते तदा वीराः पितुस्ते जन्म भारत।तदुपश्रुत्य ते कर्म वासुदेवस्य धीमतः
पूजार्हं पूजयामासुः कृष्णं देवकिनंदनं।ततः कतिपयाहस्य व्यासः सत्यवतीसुतः।आजगाम महातेजा
नगरं नागसाह्वयं।तस्य सर्वे यथान्यायं पूजां चक्रुः कुरूद्वहाः।सह वृष्ण्यंधकव्याघ्रैरुपासांचक्रिरे त
तः।तत्र नानाविधाकाराः कथाः समनुकीर्त्य वै।युधिष्ठिरो धर्मसुतो व्यासं वचनमब्रवीत्।भवत्प्रसादा
द्भगवन्यदिदं रत्नमाहृतं।उपयोक्तुं तदिच्छामि वाजिमेधे महाक्रतौ।तदनुज्ञातुमिच्छामि भवता मुनि
सत्तम।त्वदधीना वयं सर्वे कृष्णस्यैव महात्मनि॥व्यास उ०।अनुजानामि राजंस्त्वां क्रियतां यदनंतरं।यज
स्व वाजिमेधेन विधिवद्दक्षिणावता।अश्वमेधो हि राजेंद्र पावनः सर्वपाप्मनां।तेनेष्ट्वा त्वमपापात्मा त्वं वि
ता नात्र संशयः।वैशंपायन उ०।इत्युक्तः स तु धर्मात्मा कुरुराजो युधिष्ठिरः।अश्वमेधस्य कौरव्य चकाराहर
णे मतिं।समनुज्ञाप्य स तदा कृष्णद्वैपायनं नृपः।वासुदेवमथामंत्र्य वाग्मी वचनमब्रवीत्।देवकी सुप्रजा
देवी त्वया पुरुषसत्तम।यद्ब्रूयां त्वं महाबाहो तत्कृथास्त्वमिहाच्युत।त्वत्प्रभावार्जितान्भोगानश्नीम
यदुनंदन।पराक्रमेण बुद्ध्या च त्वयेयं निर्जिता मही।दीक्षयस्व त्वमात्मानं त्वं हि नः परमो गुरुः।त्वयीष्ट

वति दात्राऽर्हविनाप्यास्तवितापहात्वं हि यज्ञोऽक्षरः सर्वस्त्वं धर्मस्त्वं प्रजापतिः। त्वंगतिः सर्वभूतानां इति मे नि
श्चिता मतिः॥ श्रीभगवानुवाच॥ त्वमेवैतन्महाबाहो वक्तुमर्हस्यनिंदित। त्वंगतिः सर्वभूतानां इति मे निश्चिताम
तिः। त्वं चाद्य कुरुवीराणां धर्मेणाभिविराजसे। गुणीभूताः स्म ते राजन् त्वं नो राजा गुरुर्महान्। यजस्व मदनुज्ञातः
प्राप्त एष क्रतुस्त्वया। युनक्ष्व नो यथा र कार्ये यत्र वांछति भारत। सत्यं ते प्रतिजानामि सर्वं कर्तास्मि तेनघ।
भीमसेनार्जुनौ चापि तथा माद्रवतीसुतौ। इष्टवंतो भविष्यंति त्वयीष्टवति भारत। इत्याश्वमेधिके पांड
वप्रत्यागमनं॥ वैशंपा०॥ एवमुक्तस्तु कृष्णेन धर्मपुत्रो युधिष्ठिरः। व्यासमामंत्र्य मेधावी ततो वचनमब्रवीत्।
विधानं यद्यथाकार्यं तत्कर्ता रोन संशयः। यथाकालं भवान् वेत्ति हयमेधस्य तत्वतः। दीक्षयस्व मुने मां त्वं
त्वदधीनो हि सक्रतुः। व्यास०॥ अहं पैलोथ कौंतेय याज्ञवल्क्यस्तथैव च। विधानं यद्यथाकालं तत्कर्तारो न सं
शयः। चैत्र्यां हि पौर्णमास्यां च तव दीक्षा भविष्यति। संभाराः संक्रियंतां ते यज्ञार्थं पुरुषर्षभ। अश्वविद्यावि
दश्चैव सूतविप्राश्च तद्विदः। मेध्यमश्वं परीक्षंतां तव यज्ञार्थसिद्धये। तमुत्सृज्य यथाशास्त्रं पृथिवीं सागरांब
रां। स पर्येतु यशो नाम तव पार्थिव वर्द्धयन्। वैशंपा० इत्युक्तः स तथेत्युक्त्वा पांडवः पृथिवीपतिः। चकार
सर्वं राजेंद्र यथोक्तं ब्रह्मवादिना। संभाराश्चैव राजेंद्र सर्वान् कल्पितवांस्तदा। ससंभारान् समाहृत्य नृपो ध
र्मात्मजस्तदा। न्यवेदयदमेयात्मा कृष्णद्वैपायनाय वै। ततोऽब्रवीन्महातेजा व्यासो धर्मात्मजं नृपं। यथा
कालं यथा योगं सज्जाः स्म तव दीक्षणे। स्फ्यश्च कूर्चश्च सौवर्णो यच्चान्यदपि कौरव। तत्र योग्यं भवेत्किंचि
त्तत्सर्वं क्रियतामिति। अश्वः श्वोत्सृज्यतामद्य पृथ्व्यामथ पराक्रमं। सुगुप्तश्चरतां वापि यथाशास्त्रं युधि ५७
ष्ठिर। युधिष्ठिर०॥ अयमश्वो यथा ब्रह्मन्नुत्सृष्टः पृथिवीमिमां। चरिष्यति यथाकामं तत्र वै संविधीयतां।

पृथिवीं पर्यटंतं हि तुरगं कामरूपिणं। कः पालयेदिति मुने तद्भवान्वक्तुमर्हति। वैशंपा० इत्युक्तः स तु राजें
द्र कृष्णद्वैपायनोब्रवीत्॥ भीमसेनादवरजः श्रेष्ठः सर्वधनुष्मतां। जिष्णुः सहिष्णुर्धृष्णुश्च स एनं पालयि
ष्यति। शक्तः स हि महीं जेतुं निवातकवचांतकः। तस्मिन्ह्यस्त्राणि दिव्यानि दिव्यं संहननं तथा॥ दिव्यं धनु
श्चेषुधी च सोश्वं समनुयास्यति। स हि धर्मार्थकुशलः सर्वविद्याविशारदः। यथाशास्त्रं नृपश्रेष्ठ तं हयं चारयि
ष्यति। राजपुत्रो महाबाहुः श्यामो राजीवलोचनः। अभिमन्योः पिता वीरः स एतमनुयास्यति। भीमसेनश्च तेज
स्वी कौंतेयोमितविक्रमः। समर्थो रक्षितुं राष्ट्रं नकुलश्च विशांपते। सहदेवश्च कौरव्य समाधास्यति बुद्धि
मान्॥ कुटुंबतंत्रं विधिवत्सर्वमेव महायशाः। तत्तु सर्वं यथान्यायमुक्तः कुरुकुलोद्वहः। चकार फाल्गुनं चा
पि संदिदेश हयं प्रति। युधिष्ठिर उ०। एह्यर्जुन त्वया वीर हयोयं परिपाल्यतां। त्वमर्हो रक्षितुं ह्येतं नान्यः
कश्चन मानवः। ये चापि त्वां महाबाहो प्रत्युद्यांति नराधिपाः। तैर्विग्रहो यथा न स्यात्तथा कार्यं त्वयानघ।
आख्यातव्यश्च भवता यज्ञोयं मम सर्वतः। पार्थिवेभ्यो महाबाहो समये गम्यतामिति। वैशं०॥ एवमुक्त्वा
स धर्मात्मा भ्रातरं सव्यसाचिनं। भीमं च नकुलं चैव पुरगुप्त्ये समादधे। कुटुंबतंत्रे च यथा सहदेवं युधांप
तिं। अनुमान्य महीपालं धृतराष्ट्रं युधिष्ठिरः। इत्याश्वमेधिके अर्जुनाश्वरक्षणसमादेशो नाम। वैशं०॥ दी
क्षाकाले तु संप्राप्ते ततस्ते तु महर्त्विजः। विधिवद्दीक्षयामासुरश्वमेधाय पार्थिवं। कृत्वा स पशुबंधांश्च
दीक्षितः पांडुनंदनः। धर्मराजो महातेजाः सहर्त्विग्भिर्व्यरोचत। हयश्च हयमेधार्थं स्वयं च ब्रह्मवादिना
उत्सृष्टः शास्त्रविधिना व्यासेनामिततेजसा। स राजा धर्मजो राजन्दीक्षितो विबभौ तदा। हेममाली रुक्म

शिखः प्रदीप्त इव पावकः॥ कृष्णाजिनी दंडपाणिः क्षौमवासाः स धर्मजः॥ विबभौ द्युतिमान् भूयः प्रजापतिरि
वाध्वरे॥ तथैव ऋत्विजः सर्वे तुल्यवेषा विशां पते॥ बभूवुरर्जुनश्चैव प्रदीप्त इव पावकः॥ श्वेताश्वः कृष्णसा
रंगं स ससाराश्वं धनंजयः॥ विक्षिपन् गांडिवं चापि बद्धगोधांगुलित्रवान्॥ तमश्वं पृथिवीपाल मुदा युक्तः ससा
र ह॥ आकुमारं तदा राजन्नागमत्तत्पुरं तदा॥ द्रष्टुकामं कुरुश्रेष्ठं प्रयास्यंतं धनंजयं॥ तेषामन्योन्यसंमर्दादू
ष्मेव समजायत॥ दिदृक्षूणां हयं तं च तं चैव हयसारिणं॥ ततः शब्दो महाराज ततो बाहुर्षसमुद्भवः॥ बभूव
प्रेक्ष्यतां नृणां कुंतीपुत्रं धनंजयं॥ एष गच्छति कौंतेयस्तुरगश्चैव दीप्तिमान्॥ यमन्वेति महाबाहुः संस्पृ
शन्धनुरुत्तमं॥ एवं शुश्राव वदतां गिरो जिष्णुरुदारधीः॥ स्वस्ति तेऽस्तु व्रजारिष्टं पुनश्चैहीति भारत॥ अथा
परे मनुष्येंद्र पुरुषा वाक्यमब्रुवन्॥ नैनं पश्यामसे मर्दे धनुरेतत्प्रदृश्यते॥ एतद्धि भीमनिर्ह्रादं विश्रुतं
गांडिवं धनुः॥ स्वस्ति गच्छ त्वरिष्टो वै पंथानमकुतोभयः॥ निवृत्तमेनं द्रक्ष्यामः पुनरेवेति तेऽब्रुवन्॥ एवमा
द्या मनुष्याणां स्त्रीणां च भरतर्षभ॥ शुश्राव मधुरा वाचः पुनः पुनरुदीरिताः॥ याज्ञवल्क्यस्य शिष्यश्च कु
शलो यज्ञकर्मणि॥ प्रायात्पार्थेन सहितः शांत्यर्थं वेदपारगः॥ ब्राह्मणाश्च महीपाल बहवो वेदपारगाः॥ अ
नुजग्मुर्महात्मानं क्षत्रियाश्च विशोऽपि च॥ पांडवैः पृथिवी सोऽश्वो निर्जितां स्वेन तेजसा॥ चचार स महाराज
यथादेशं च सत्तम॥ तत्र युद्धानि वृत्तानि यान्यासन्पांडवस्य ह॥ तानि वक्ष्यामि ते वीर विचित्राणि महांति
च॥ स हयः पृथिवीं राजन्प्रदक्षिणमवर्तत॥ ससारोत्तरतः पूर्वं तन्निबोध महीपते॥ अवमृद्नन्स राष्ट्राणि
पार्थिवानां हयोत्तमः॥ शनैस्तदा परिययौ श्वेताश्वश्च महारथः॥ तत्र संगणना नास्ति राज्ञामयुतशस्त
था॥ ये युध्यंत महाराज क्षत्रिया हतबांधवाः॥ किराता निहता राजन्बहवोऽसिधनुर्धराः॥ म्लेच्छाश्चान्ये ब ५८

कृविधाः पूर्वं विनिकृत्तारणे। आर्यास्त्वदृष्टपृथिवीपालाः प्रहृष्टनरवाहनाः। समीयुः पांडुपुत्रेण बहवो युद्ध
दुर्मदाः॥ एवं कृत्तानि युद्धानि तत्र तत्र महीपते। अर्जुनस्य महीपालैर्नानादेशनिवासिभिः॥ यानि तत्स्यतोरा
जन् प्रततानि महांति च। तानि वक्ष्यामि युद्धानि कौंतेयस्य तदानघ॥ इत्याश्वमेधिके अश्वप्रयाणो नाम।
वेशं॥ त्रैगर्तैरभवद्युद्धं कृतवैरैः किरीटिना। महारथसमाज्ञातैर्हतानां पुत्रनप्तृभिः॥ ते समाज्ञाय सं
प्राप्तं यज्ञियं तुरगोत्तमं। विषयांते ततो वीराः दंशिताः पर्यवारयन्॥ रथिनो बद्धतूणीराः सदश्वैः समलं
कृताः। परिवार्य हयं राजन् ग्रहीतुमुपचक्रमुः॥ ततः किरीटी संचिंत्य तेषां राज्ञां चिकीर्षितं। वारयामास
तान् सर्वान् सांत्वपूर्वमरिंदमः॥ तमनादृत्य ते सर्वे शरैरभ्यर्दयंस्तदा। तमोरजोभ्यां संछन्नास्तान् किरी
टी न्यवारयत्॥ अब्रवीच्च ततो जिष्णुः प्रहसन्निव भारत। निवर्तध्वमधर्मज्ञाः श्रेयो जीवितमेव वा॥ सोहं वी
राः प्रयास्यन्वै यथ मे राजेन वारितः। हतबांधवा न ते पार्थ हंतव्याः पार्थिवा इति॥ स तदा तद्वचः श्रुत्वा ध
र्मराजस्य धीमतः। तान्निवर्तध्वमित्याह न न्यवर्तंत चापि ते॥ ततस्त्रिगर्तराजानं सूर्यवर्माणमाहवे। वि
तत्य शरजालेन प्रजहास धनंजयः॥ ततस्ते रथघोषेण खुरनेमिस्वनेन च। आपूरयंतो दिशः सर्वा धनंजय
मुपाद्रवन्॥ सूर्यवर्मा ततः पार्थे शराणां नतपर्वणां। शतान्यमुंचद्राजेंद्र लघ्वस्त्रमुपदर्शयन्॥ तथैवा
न्ये महेष्वासा ये तस्यैवानुयायिनः। मुमुचुः शरवर्षाणि धनंजयवधैषिणः॥ स तान् ज्यापुंखनिर्मुक्तान् बहु
भिः सुबहून् शरान्। चिच्छेद पांडवो राजन् ते त्वमो न्यपतंस्तदा॥ केतुवर्मा तु तेजस्वी तस्यैवावरजो युवा।
युयुधे भ्रातुरर्थाय पांडवेन महात्मना॥ तमापतंतं संप्रेक्ष्य केतुवर्माणमाहवे। अभ्यघ्नन्निशितैर्बाणैर्बी
भत्सुः परवीरहा॥ केतुवर्मण्यभिहते धृतवर्मा महारथः। रथेनाशु समागत्य शरैर्जिष्णुमवाकिरत्॥ त

स्यतां शीघ्रतां प्रेक्ष्य हृष्टोभातीव वीर्यवान्।गुडाकेशो महातेजा बालस्य धृतवर्मणः। न संदधानं ददृशे नाददानं
तथाप्युत। किरंतमेव स शरान् ददृशे पाकशासनिः। स तं संपूजयामास धृतवर्माणमाहवे। मनसा स मुहूर्तं तु र
णे समभिहर्षयन्। तं पन्नगमिव क्रुद्धं कुरुवीरः स्वयन्निव। प्रीतिपूर्वं महाराज प्राणैर्न व्यपरोपयत्।
स तथा रक्ष्यमाणो वै पार्थेनामिततेजसा। धृतवर्मा शरं तीक्ष्णं मुमोच विजये तथा। स तेन विजयस्तूर्णं सव्य
कू विद्धः करे भृशं। मुमोच गांडिवं दुःखात्तत्पपात च भूतले। धनुषः पततस्तस्य सव्यसाचिकराद्विभो। इंद्रस्ये
वायुधस्यासीत् रूपं भरतसत्तम। तस्मिन्निपतिते दिव्ये महाधनुषि पार्थिवः। जहास सस्वनं हासं धृतव
र्मा महाहवे। ततो रोषान्वितो जिष्णुः प्रमृज्य रुधिरं करात्। धनुरादाय तद्दिव्यं शरवर्षं मुमोच ह। ततो हलह
लाशब्दो दिवस्पृगभवत्तदा। नानाविधानां भूतानां तत्कर्मातीव शंसिनां। ततः संप्रेक्ष्य संक्रुद्धं कालांत
कयमोपमं। जिष्णुं त्रैगर्तिका योधास्त्वरिताः पर्यवारयन्। अभिसृत्य परीप्सार्थं ततस्ते धृतवर्मणः। परि
वव्रुर्गुडाकेशं तत्राक्रुध्यद्धनंजयः। ततो योधान् जघानाशु योधान्दश शताष्टवा। महेंद्रवज्रप्रतिमैरायसैर्नि
शितैः शरैः। तांस्तु प्रभग्नान्संप्रेक्ष्य त्वरमाणो धनंजयः। शरैराशीविषाकारैर्जघान स्वनवद्धसन्। ते भ
ग्नमनसः सर्वे त्रैगर्तकमहारथाः। दिशो विदुद्रुवुः सर्वे धनंजयशरार्दिताः। तमूचुः पुरुषव्याघ्रं संसप्तक
निषूदनं। तवास्म किंकराः सर्वे सर्वे वै वशगास्तव। आज्ञापयस्व नः पार्थ प्रह्वान्प्रेष्यानवस्थितान्। करि
ष्याम प्रियं सर्वं तव कौरवनंदन। एतदाज्ञाय वचनं सर्वांस्तानब्रवीदिदं। जीवितं रक्षत नृपाः शासनं प्र ५९
तिगृह्यतां। आश्वमेधिके त्रैगर्तयुद्धं। वैशंपायन०। प्राग्ज्योतिषमथाभ्येत्य व्यचरत्स हयोत्तमः। भगदत्ता

त्मजस्तत्र निर्ययौ रणकर्कशः। स हयं पांडुपुत्रस्य विषयांतमुपागतं। रुरुधे भरतश्रेष्ठ वज्रदत्तो महीपतिः। सोभि
निर्याय नगरात् भगदत्तसुतो नृपः। अश्वमायांतमुन्मथ्य नगराभिमुखो ययौ। समालक्ष्य महाबाहुः कु
रूणामृषभस्तदा। गांडीवं विस्फारयंस्तूर्णं सहसा समुपाद्रवत्। ततो गांडीवनिर्मुक्तैरिषुभिर्मर्दितो नृपः। ह
यमुत्सृज्य तं वीरस्ततः पार्थमुपाद्रवत्। पुनः प्रविश्य नगरं दंशितः स नृपोत्तमः। आरुह्य नागप्रवरं निर्ययौ
युद्धकांक्षया। पांडुरेणातपत्रेण ध्रियमाणेन मूर्द्धनि। दोधूयता चामरेण श्वेतेन च महारथः। ततः पार्थं सम
साद्य पांडवानां महारथं। आह्वयामास कौरव्यं बाल्यान्मोहाच्च संयुगे। स वारणं नगप्रख्यं प्रभिन्नकरटा
मुखं। प्रेषयामास संक्रुद्धस्ततः श्वेतहयं प्रति। विक्षरंतं यथा मेघं परवारणवारणं। शास्त्रवत्कल्पितं सं
ख्ये त्रिवशं युद्धदुर्मदं। प्रचोद्यमानो नागः स तेन राज्ञा महाबलः। तदांकुशेन विबभावुत्पतिष्यन्निवांब
रं। तमापतंतं संप्रेक्ष्य क्रुद्धो राजन् धनंजयः। भूमिष्ठो वारणगतं योधयामास भारत। वज्रदत्तस्तु संक्रु
द्धो मुमोचाशु धनंजये। तोमरानग्निसंकाशान् शलभानिव वेगितान्। अर्जुनस्तानसंप्राप्तान् गांडी
वप्रेषितैः शरैः। द्विधा त्रिधा च विच्छेद ख एव खगमैस्तदा। स तु दृष्ट्वा तथा तान् छिन्नान् तोमरान् भग
दत्तजः। इषूनसक्तांस्त्वरितः प्राहिणोत्पांडवं प्रति। ततोर्जुनस्तूर्णतरं रुक्मपुंखानजिह्मगान्। प्रे
षयामास संक्रुद्धो भगदत्तात्मजं प्रति। स तैर्विद्धो महातेजा वज्रदत्तो महाहवे। भृशाहतः पपातोर्व्यां
न त्वेनमजहात्स्मृतिः। ततः स पुनरारुह्य वारणप्रवरं रणे। अव्यग्रः प्रेषयामास जयार्थी विजयं प्रति।
तस्मै बाणांस्ततो जिष्णुर्निर्मुक्ताशीविषोपमान्। प्रेषयामास संक्रुद्धो ज्वलितानिव पावकान्। स तैर्विद्धो
महानागो विस्रवन् रुधिरं बभौ। हिमवानिव शैलेंद्रो बहुप्रस्रवणस्तदा। आश्वमेधिके वज्रदत्तयुद्धं॥

वैशं॰पा॰ एवं त्रिरात्रमभवत्तद्युद्धं भरतर्षभा। अर्जुनस्य नरेंद्रेण वृत्रेणेव शतक्रतोः। ततश्चतुर्थे दिवसे वज्रदत्तो महाब
लः। जहास सस्वनं हासं वाक्यं चेदमथाब्रवीत्। अर्जुनार्जुन तिष्ठस्व न मे जीवन्विमोक्ष्यसे। त्वां निहत्य करिष्या
मि पितुस्तोयं यथाविधि। त्वया वृद्धो मम पिता भगदत्तः पितुः सखा। हतो वृद्धोपवापित्वा त्वं शिशुं माद्य योध
य। इत्येवमुक्त्वा संक्रुद्धो वज्रदत्तो नराधिपः। प्रेषयामास कौरव्य वारणं पांडवं प्रति। संप्रेष्यमाणो नागेंद्रो
वज्रदत्तेन धीमता। उत्पतिष्यन्निवाकाशं अभिदुद्राव पांडवं। अग्रहस्तप्रमुक्तेन सीकरेण स फाल्गुनं।
समसिंचत महाराज नीलं शैलमिवांबुदः। स तेन प्रेषितो राज्ञा मेघवद्विनदन्मुहुः। मुखाडंबरघोषेण
समाद्रवत फाल्गुनं। स नृत्यन्निव नागेंद्रो वज्रदत्तप्रचोदितः। आससाद द्रुतं राज्ञा कौरवाणां महारथं।
तमापतंतं संप्रेक्ष्य वज्रदत्तस्य वारणं। गांडीवमाश्रित्य बली न व्यकंपत शत्रुहा। चुक्रोध बलवच्चापि पांड
वस्तस्य नृपतेः। कार्यविघ्नमनुस्मृत्य पूर्ववैरं च पांडवः। ततः स वारणं क्रुद्धः शरजालेन पांडवः। निवारया
मास तदा वेलेव मकरालयं। स नागप्रवरः श्रीमानर्जुनेन निवारितः। तस्थौ शरविततो नागः श्वाविच्छललितो
यथा। निवारितं गजं दृष्ट्वा भगदत्तात्मजो नृपः। उत्ससर्ज शितान्बाणानर्जुने क्रोधमूर्छितः। अर्जुन
स्तु महाराज शरैः शरविघातिभिः। वारयामास तान्बाणांस्तदद्भुतमिवाभवत्। ततः पुनरतिक्रुद्धो राजन्
प्राग्ज्योतिषो नृपः। प्रापयामास नागेंद्रं बलवत्पर्वतोपमं। तमापतंतं संप्रेक्ष्य बलवान्पाकशासनिः
नाराचमग्निसंकाशं प्राहिणोद्वारणं प्रति। स तेन वारणो राजन्मर्मण्यभिहतो भृशं। पपात भूमौ सहसा ९०
वज्राहत इवाचलः। स पतन्शुशुभे नागो धनंजयशराहतः। विशन्निव महाशैलो महीं वज्रप्रपीडितः॥

तस्मिन्निपतितेनागेवज्रदत्तस्यपांडवः।तन्नभेतव्यमित्याहततोभूमिंगतंनृपं।उवाचवचमहातेजाप्रस्थितंमांयुधि

ष्ठिरः।राजानस्तेनहंतव्याधनंजयकथंचन।सर्वमेतन्नरव्याघ्रभवत्वेतावताकृतं।योधाश्चापिनहंतव्यान

कथंचिद्रणेत्वया।वक्तव्याश्चैवराजानःसर्वैःसहसुहृज्जनैः।युधिष्ठिरस्याश्वमेधोभवद्भिरनुभूयतां।इतिभ्रा

तृवचःश्रुत्वानहन्मित्वांजनाधिप।उत्तिष्ठनभयंतेस्तिस्वस्तिमान्गच्छपार्थिव।आगच्छेथामहाराजपरांचैत्री

मुपस्थितां।तदाश्वमेधोभविताधर्मराजस्यधीमतः।एवमुक्तःसराजातुभगदत्तात्मजस्तदा।तथेत्येवाब्रवी

द्वाक्यंपांडवेनाभिनिर्जितः।आश्वमेधिकेवज्रदत्तपराजयोनाम।वैशंपायन।सैंधवैरभवद्युद्धं।ततस्तस्य

किरीटिनः।हतशेषैर्महायुद्धेहतानांचशतैरपि।अवतीर्णमुपस्त्यविषयंश्वेतवाहनं।प्रत्युदीयुरमर्ष्यं

तोराजानःपांडवर्षभं।अमृष्यंतपरामर्ष्यविषयांतेविषोपमाः।नभयंचक्रिरेपार्थात्भीमसेनादनंतरा

त्।तेविदूराद्धनुःपाणिंयज्ञियस्यहयस्यच।वीभत्सुंप्रत्यपद्यंतपदातिनमवस्थितं।ततस्तेतुमहावीर्याराः

जानःपर्यवारयत।जिगीषंतोनरव्याघ्रंपूर्वंविनिकृताइति।तेनामान्यथगोत्राणिकर्माणिविविधानि

च।कीर्तयंतस्तदापार्थंशरवर्षैरवाकिरन्।तेकिरंतःशरांस्तीक्ष्णान्वारणप्रतिदारुणान्।रणेजयमभी

प्संतःकौंतेयंपर्यवारयन्।असमीक्ष्यैवतंवीरमुग्रकर्माणमाहवे।सर्वेयुयुधिरेवीरारथस्थास्तंपदातिनं।

तेतमाजघ्निरेवीरंनिवातकवचांतकं।संसप्तकानांहंतारंहंतारंसैंधवस्यच।ततोरथसहस्रेणहयानामयु

तेनच।कौटकीकृत्यकौंतेयंतेप्रहृष्टमयोधयन्।संस्मरंतोवधंवीरासिंधुराजस्यधीमतः।जयद्रथस्यकौ

रव्यसमरेसव्यसाचिना।ततःपर्जन्यवत्सर्वेशरवृष्टिमवासृजन्।तैःकीर्णःशुशुभेपार्थोरविर्मेघांतरेयथा॥

सशरैः समवच्छन्नो दृष्ट्वा पांडवर्षभः। पंजरांतरसंचारी शकुंत इव भारत। ततो हाहाकृतं सर्वं कौंतेये शर
पीडिते। त्रैलोक्यमभवद्राजन् विस्मयमासीद् जनोत्तमं। ततो वचो महाराज मारुतो लोमहर्षणः। राहुरग्रसदा
दित्यं युगपत्सोममेव च। नत्का श्वज द्विरे स्तूर्यं व्यशीर्यंत समंततः। वेपथुश्चाभवद्राजन् कैलासस्य मह
गिरेः। मुमुचुश्चासमत्युग्रं दुःखशोकात् समंततः। सप्तर्षयो जातभयास्तथा देवर्षयोपि च। तत्र श्वोल्कासु
निर्भिद्य मंडलं शशिनोपतत्। विपरीते ततस्तद्राजन् तस्मिन्नुत्पात लक्षणे। रासभारुणसंकाशा वपुष्मंतः
समंततः। आवृत्य गगनं मेघा मुमुचुर्मांसशोणितं। एवमासीत्तदा वीरे शरवर्षाभिसंवृते। लोकेस्मिन् नृप
रतश्रेष्ठ तदद्भुतमिवाभवत्। तस्य तेनातिकीर्णस्य शरजालेन सर्वशः। मोहात्प्रपात गांडीवमावापश्च
करादपि। तस्मिन्मोहमनुप्राप्ते शरजालं महत्तरं। सैंधवा मुमुचुस्तूर्णं गतसत्वे महारथे। ततो मोहसमाप
न्नं ज्ञात्वा पार्थं दिवौकसः। सर्वे वित्रस्तमनसस्तस्य शांतिकृतोभवन्। ततो देवर्षयः सर्वे तथा सप्तर्षयो
पि च। ब्रह्मर्षयश्च विजयं जेपुः पार्थस्य धीमतः। ततः प्रदीपिते देवैः पार्थतेजसि पार्थिव। तस्थावचलवत्
स्वर्विन्संग्रामे परमास्त्रवित्। विचकर्ष धनुर्दिव्यं ततः कौरवनंदन। यंत्रस्येवेह वेवेः शब्दो स्तन्महा
स्तस्य पुनःपुनः। ततः स शरवर्षाणि प्रत्यमित्रान् प्रति प्रभुः। ववर्ष धनुषा पार्थो वर्षाणीव सुरेश्वरः। त
तस्ते सैंधवा योधाः सर्वे सह राजकाः। नादृश्यंत शरैः कीर्णाः शलभैरिव पादपाः। तस्य शब्देन वित्रेसुस्त
यात्तोश्च विदुद्रुवुः। मुमुचुश्चाश्रु शोकार्ता सुषुपुश्चापि सैंधवाः। तांस्तु सर्वान्नरव्याघ्रः सैंधवान्
व्यचरद्वलीं अलातचक्रवद्राजन् शरजालैः समार्पयत्। तदिंद्रजालप्रतिमं बाणजालममित्रहा व्य ६९

स्रजन्दिक्षु सर्वासु महेंद्र इव वज्रहस्ततु। मेघजालनितं सैन्यं विदार्य शरसंतानवृत्तिः। विबभौ कौरवश्रेष्ठः
शरदीव दिवाकरः॥ इत्याश्वमेधिके सैंधवयुद्धं नाम॥ ७४॥ ततो गांडीवतन्क्रूरो युद्धाय समवस्थितः। विव
त्सो युधि ऊर्द्धबाहिमवानचलो यथा। ततः सैंधवयोधाये पुनरेव व्यवस्थिताः। विमुंचंत सुसंरब्धा शरवर्षा
णि भारत। तान् प्रहस्य महावीर्यः पुनरेव व्यवस्थितान्। ततः प्रोवाच कौंतेयो मुहूर्तं श्लक्ष्णया गिरा। युध्य
ध्वं परया युक्त्या यतध्वं च वधे मम। कुरुध्वं सर्वकार्याणि महद्वो भयमागतं। एष हिणोमि वः सर्वान्निःसाय
शरवागुराः। तिष्ठध्वं युद्धमनसो दर्पं शमयितास्मि वः। हि। एतावदुक्त्वा कौंतेयो रोषा गांडीवधन्वना। ततो प्रक्ष
नं स्मृत्वा भ्रातुर्ज्येष्ठस्य भारत। न हंतव्या रणे तात क्षत्रिया विजिगीषया। जेतव्याश्चेति यत्प्रोक्तं धर्मराज्ञा
महात्मना॥ चिंतयामास स तदा फाल्गुनः पुरुषर्षभः। इत्युक्तोऽहं नरेंद्रेण न हंतव्या नृपा इति। कथं तन्न
मृषा न स्याद्धर्मराजवचः शुभं। न हन्येरन् हि राजानो राज्ञश्चाज्ञा कृता भवेत्। इति संचिंत्य स तदा भ्रातुः
प्रियहिते रतः प्रोवाच वाक्यं वाक्यज्ञः सैंधवान् युद्धदुर्मदान्। बालान् स्त्रियो वा युष्माकं न हिंस्ये सम
वस्थितान्। यश्च वक्ष्यति संग्रामे तवास्मीति पराजितः। एतत् श्रुत्वा वचो मह्यं कुरुध्वं हितमात्मनः। अतो
न्यथा कृच्छ्रगता भविष्यथ मया हताः। एवमुक्त्वा तु तान् वीरान् युयुधे कुरुनंदनः। अत्वरावानसंरब्धः
संरब्धैर्विजिगीषुभिः। ततः शतसहस्राणि शराणां नतपर्वणां। मुमुचुः सैंधवा राजन् क्रुद्धास्ते गांडीव
धन्वनः। स तानापततः क्रूरानाशीविषविषोपमान्। चिच्छेद निशितैर्भल्लैरंतरे वधनंजयः। छि
त्वा तु तानाशु जवाच्चकंकपत्रान् शिलाशितान्। एकैकमेकाद्दशाति विभेद निशितैः शरैः। ततः

प्रासांश्च शक्तीश्च पुनरेव धनंजयः। जयद्रथं हतं स्मृत्वा चिक्षिपुः सैंधवा नृपाः। तेषां किरीटी संक्रुद्धो मोघं
चक्रे महामनाः। सर्वांस्तानंतराच्छित्वा मुदन्वुक्रोश पांडवः। तथैवापततां तेषां योधानां जयकांक्षिणां। शिरां
सि पातयामास भल्लैः सन्नतपर्वभिः। तेषां प्रद्रवतां चापि पुनरेवाभिधावतां। निवर्ततां च शब्दोभूत्क्षुब्धस्य
स्येव महोदधेः। ते वध्यमानास्तु तदा पार्थेनामिततेजसा। यथाप्राणं यथोत्साहं योधयामासुरर्जुनं। तत
स्ते फाल्गुनेनाजौ शरैः सन्नतपर्वभिः। कृता विसंज्ञा भूयिष्ठाः क्लांतवाहनसैनिकाः। तांस्तु सर्वान्परिग्ला
नान्विदित्वा धृतराष्ट्रजा। दुःशला बालमादाय नप्तारं प्रययौ तदा। सुरथस्य सुतं वीरं रथेनानागसं तदा।
शांत्यर्थं सर्वयोधानामभ्यगच्छत पांडवं। साधनंजयमासाद्य रुरोदार्त्तस्वरं तदा। धनंजयोपि तां दृष्ट्वा
धनुरुत्सृज्य तत्क्षणात्। समुत्सृज्य धनुः पार्थो विधिवद्भगिनीं तदा। प्राह किं करवाणीति सा च तं वाक्य
मब्रवीत्। एष ते भरतश्रेष्ठ स्वस्रीयस्यात्मजः शिशुः। अभिवादयते वीर तं पश्य पुरुषर्षभ। इत्यु
क्तस्तस्य पितरं स पप्रच्छार्जुनस्तदा। क्वासाविति ततो राजन्दुःशला वाक्यमब्रवीत्। पितुः शोकाभि
संतप्तो विषादार्त्तोस्य वै पिता। पंचत्वमगमद्वीर यथा तन्मे निबोध ह। स पूर्वं पितरं श्रुत्वा हतं युद्धे त्वया
नघ। त्वामागतं च संश्रुत्य युद्धाय हयसारिणं। पितुश्च दुःखशोकार्त्तो जहौ प्राणान्धनंजय। प्राप्तो
बीभत्सुरित्येव नाम श्रुत्वैव तेनघ। विषादार्त्तोपतद्भूमौ ममार च ममात्मजः। तं तु दृष्ट्वाहं नि
पतितं ततस्तस्यात्मजं विभो। गृहीत्वा समनुप्राप्ता तवाद्य शरणैषिणी। इत्युक्त्वा विस्वरं सा तु रुरो ६२
द धृतराष्ट्रजा दीना दीनं स्थितं पार्थमब्रवीच्चाप्यधोमुखं। स्वसारं मामवेक्ष्य स्वस्रीयात्मजमेव च।

कर्त्तुमर्हसिधर्मज्ञदयामपिकुरूद्वह।संस्मृत्यकुरुराजानंमृतंचैवजयद्रथं।अभिमन्योर्यथाजातःपरीक्षि
त्परवीरहा।तथायंसुरथाज्जातोममपौत्रोमहारथः।यमादायनरव्याघ्रसंप्राप्तास्मितवांतिकं।शमार्थंसर्व
योधानांशृणुचेदंवचोमम।आगतोयंमहाबाहोतस्यमंदस्यपुत्रकः।प्रसादमस्यबालस्यतस्मात्वंकर्त्तु
मर्हसि।एषप्रसाद्यशिरसामयासार्द्धमरिंदम।याचतेत्वांमहाबाहोशमंगच्छधनंजय।बालस्यहतबं
धोश्चपार्थकिंचिदजानतः।प्रसादंकुरुधर्मज्ञमामन्युवशमन्वगाः।तमनार्यंनृशंसंचविस्मृत्यास्यपि
तामहं।आगस्कारिणमत्यर्थंप्रसादंकर्त्तुमर्हसि।एवंब्रुवत्यांकरुणंदुःशलायांधनंजयः।संस्मृत्यदेवीं
गांधारींधृतराष्ट्रंचपार्थिवं।उवाचदुःखशोकार्त्तःक्षत्रधर्मंविगर्हयन्।धिक्तंदुर्योधनंमंदंराज्यल
ब्धंचमानिनं।यत्कृतेबांधवाःसर्वेयमानीतायमक्षयं।इत्युक्त्वाबहुसांत्वानिप्रसादमकरोज्जयः।प
रिष्वज्यचतांप्रीतोविससर्जगृहान्प्रति।दुःशलाचापितान्योधान्निवार्यमहतोरणात्।संपूज्यपार्थं
प्रययौगृहान्प्रतिशुभानना।ततःसैंधवकान्योधान्विनिर्जित्यनरर्षभः।पुनरेवान्वधावत्सतंहयं
कामचारिणं।ससारयज्ञियंवीरोविधिवत्सविशांपते।ततोमृगमिवाकाशेदेवदेवःपिनाकधृक्।सच
वाजीयथेष्टेनतांस्तान्देशान्यथाक्रमं।विचचारयथाकामंधर्मंपार्थस्यवर्द्धनंयंनृ।क्रमेणसहय
स्त्वेवंविचरन्भरतर्षभ।मणिपूरपतेर्देशमुपायात्सहपांडवः।आश्वमेधिकेसैंधवपराजयोनाम।
वैशंपायनउवाच।श्रुत्वातुपितरंवीरंनृपतिर्बभ्रुवाहनः।निर्ययौविनयेनार्योब्राह्मणार्घपुरःसरः।मणिपूर
पतिंत्वेवंसमायांतंधनंजयः।नाभ्यनंदतमेधावीक्षत्रधर्ममनुस्मरन्।उवाचचैनंधर्मात्मासमन्युः
फाल्गुनस्तदा।प्रतिक्रियानतेयुक्ताबहिस्त्वंक्षत्रधर्मतः।संरक्ष्यमाणंतुरगंयौधिष्ठिरमिहागतं।यज्ञियं

विषयं ते मां न रोसी किं त्र पुत्रकः। धिक् त्वां सु सुदुर्बुद्धिं क्षत्रधर्मविशारदं। यो मां युद्धाय संप्राप्तं साम्नैव
प्रत्यगृह्णथाः। यद्यहं न्यस्तशस्त्रस्त्वा मागच्छेयं सुदुर्मते। प्रक्रियेयं ततो युक्ता भवेत्तव नराधिप। तमेवं युक्तं
पित्रा तु विदित्वा पन्नगात्मजा। नाभ्यनंदत मेधावी उलूपी तमुपागमत्। सा ददर्श ततः पुत्रं विमृशंतमधो
मुखं। संतप्यमानमसकृत् भर्त्रा युद्धार्थिना विभो। ततः सा चारुसर्वांगी समुपेत्योरगात्मजा। उलूपी प्राह व
चनं क्षत्रधर्मविशारदं। उलूपीं मां निबोध त्वं मातरं पन्नगात्मजां। कुरुष्व वचनं पुत्र धर्मस्ते भविता ततः। युध्य
स्वैनं कुरुश्रेष्ठं धनंजयमरिंदमं। एवमेष तव प्रीतो भविष्यति धनंजयः। एवमुद्धर्षितो मात्रा स राजा बभ्रुवा
हनः। मनश्चक्रे महातेजा युद्धाय भरतर्षभः। संनह्य कांचनं वर्म शिरस्त्राणं च भानुमत्। तूणीरशतसंबा
धं आरुरोह महारथं। सर्वोपकरणैर्युक्तं युक्तमश्वैर्मनोजवैः। सचक्रोपस्करं धीमान् हेमभांडपरिष्कृ
तं। परमार्चितमुच्छ्रित्य ध्वजं सिंहं हिरण्मयं। प्रययौ पार्थमुद्दिश्य स राजा बभ्रुवाहनः। तमभ्येत्य हयं
वीरो यज्ञियं पार्थरक्षितं। ग्राहयामास पुरुषैर्हयशिक्षाविशारदैः। गृहीतं वाजिनं दृष्ट्वा प्रीतात्मा स ध
नंजयः। पुत्रं रथस्थं भूमिष्ठः संन्यवारयदाहवे। ततः स राजा तं वीरं शरव्रातैः सहस्रशः। अर्दयामास
विशिखैराशीविषविषोपमैः। तयोः समभवद्युद्धं पितुः पुत्रस्य चातुलं। किरीटिनं तु विव्याध हृदये नत
पर्वणा। जत्रुदेशे नरव्याघ्रः प्रहसन् बभ्रुवाहनः। सोऽभ्ययात् सह पुंखेन वल्मीकमिव पन्नगः। विनिर्भिद्य
तु कौंतेयं महीतलमथाविशत्। स गाढवेदनो धीमानालंब्य धनुरुत्तमं। दिव्यं तेजः समाविश्य प्रदीप्त इ ६२
वसं बभूव ह। स संज्ञामुपलभ्याथ प्रशंस्य पुरुषर्षभः। पुत्रं शक्रात्मजो वाक्यमिदमाह महीपते। साधु साधु म

हा बाहो वस चित्रांगदात्मज ॥ सदृशं कर्म तद्दृष्ट्वा प्रीतिमानस्मि पुत्रक । विमुंचाम्येष बाणांस्ते पुत्र युद्धे स्थि
रो भव ॥ आश्वमेधिके बभ्रुवाहनयुद्धे वैरां ॥ इत्येवमुक्त्वा नाराचैरभ्यवर्षदमित्रहा । तान् स गांडीवनिर्मुक्ता
न् वज्राशनिसमप्रभान् । नाराचैरच्छिनद्राजा सर्वानेव त्रिधा त्रिधा । तस्य पार्थः शरैर्दिव्यैर्ध्वजं हेमपरिष्कृ
तं । सुवर्णतालप्रतिमं क्षुरेणापाहरद्रथात् । हयांश्चास्य महाकायान्महावेगपराक्रमान् । चकार राज्ञो
निर्जीवान् प्रहसन्पुरुषर्षभः । स रथादवतीर्याशु राजा परमकोपनः । पदातिः पितरं कोपाद्योधयामा
स पांडवं ॥ संप्रीयमाणः पांडूनामृषभः पुत्रविक्रमात् । नात्यर्थं पीडयामास पुत्रं वज्रधरात्मजः ॥ स हन्य
मानो विशिखैः पितरं बभ्रुवाहनः । शरैराशीविषाकारैः पुनरेवार्दयद्बली । ततः स बाल्यात्पितरं विव्या
ध हृदि पत्रिणा । निशितेन सपुंखेन बलवद्बभ्रुवाहनः । विवेश पांडवं राजन्मर्म भित्त्वातिदुःखकृत् ।
स तेनाति भृशं विद्धः पुत्रेण कुरुनंदनः । महीं जगाम मोहार्तस्ततो राजा धनंजयः । तस्मिन्निपतिते वीरे
कौरवाणां धुरंधरे । सोपि मोहं जगामाशु ततश्चित्रांगदासुतः । व्यायम्य संयुगे राजा दृष्ट्वा च पितरं हतं । पू
र्वमेव च बाणौघैर्गाढविद्धोऽर्जुनेन च । भर्तारं निहतं दृष्ट्वा पुत्रं च पतितं भुवि । चित्रांगदा परित्रस्ता प्रविवे
श रणाजिरे । शोकसंतप्तहृदया रुदती सा ततः शुभा । मणिपूरपतेर्माता ददर्श निहतं पतिं । इत्याश्वमेधिके
अर्जुनबभ्रुवाहनयुद्धे अर्जुनव्यामोहः वैरां ॥ ततो बहुविधं भीरु विलप्य कमलेक्षणा । मुमोह दुःखा
दुर्द्धर्षा निपपात च भूतले । प्रतिलभ्य तु सा संज्ञां देवी दिव्यवपुर्धरा । उलूपीं पन्नगसुतां दृष्ट्वा वै वाक्यमब्र
वीत् । उलूपि पश्य भर्तारं शयानं निहतं रणे । ननु त्वमार्यधर्मज्ञा न तु वासि पतिव्रता यत्त्वत्कृतेयं पतिर्मे पति

तोनिहतोरणे।किंतुसर्वापराधोयंयदितेद्यधनंजयः।क्षमस्वयाच्यमानामेसंजीवयधनंजयं।ननुत्वमार्ये
धर्मज्ञात्रैलोक्येविदिताशुभा।घातयित्वाचभर्तारंपुत्रंचैवनशोचसि।नाहंशोचामितनयंनिहतंपन्नगा
त्मजे।पतिमेवानुशोचामियस्यातिथ्यमिदंकृतं।इत्युक्त्वासातदादेवीमुलूपींपन्नगात्मजां।भर्तारमभि
गम्येदमित्युवाचयशस्विनी।उत्तिष्ठकुरुमुख्यस्यप्रियकाममममप्रिय।अयमश्वोमहाबाहोमयातेपरि
मोक्षितः।ननुनामत्वयावीरधर्मराजस्ययज्ञियः।अयमश्वोभिगंतव्यःसशेषेकिंमहीतले।त्वयिप्रा
णासमापन्नाकुरूणांकुरुनंदन।सकस्मात्प्राणदोन्येषांप्राणान्संत्यक्तवानसि।चित्रांगदेवाच॥उलू
पिसाधुसंपश्यभर्तारंनिहतंरणे।पुत्रंचैवंतंसमुत्साह्यघातयित्वानशोचसि।कामंस्वपतुबालोयंभू
मौप्रेतगतिंगतः।लोहिताक्षोगुडाकेशोविजयःसाधुजीवतु।नापराधोस्तिसुभगेनराणांबहुभार्य
ता।नारीणांतुभवत्येवमातेभूद्बुद्धिरीदृशी।सख्यंह्येतत्कृतंधात्राशाश्वतंचाव्ययंचह।सख्यंसम
भिजानीहिसत्यंसंगतमस्तुते।पुत्रेणघातयित्वाचपतिंयदिनमेद्यवै।जीवंतंदर्शयस्यार्येपरित्यक्ष्या
मिजीवितं।साहंदुःखान्वितांभीरुपतिपुत्रविनाकृता।इहैवप्रायमासिष्येप्रेक्षंतस्तेनसंशयः।इत्युक्त्वा
पन्नगसुतांसपत्नींचैत्रवाहिनी।ततःप्रायमुपासीनातूष्णीमासीज्जनाधिप।आश्वमेधिकेचित्रांगदा
विलापः।वैशंपा०।ततोविलप्यविरताभर्तुःपादौप्रगृह्यसा।उपविष्टाभवद्दीनासश्वासपुत्रमीक्ष्यती।
ततःसंज्ञांपुनर्लब्ध्वासराजाबभ्रुवाहनः।मातरंतामुपालोक्यरणभूमावथाब्रवीत्।इतोदुःखतरं
किंनुयन्मेमातासुखैधिता।भूमौनिपतितंवीरमनुशेतेपतिंमृतं।निहंतारंरणेराणांसर्वशस्त्रभृ ८४

तावर। मयाविनिहतं संख्ये प्रेक्षते दुर्मरं खलु ततः। अहो ह्यस्या हृदयं देव्या दृढं यन्न विदीर्यते। वृकोदरस्यं म
हाबाहुं प्रेक्षत्या निहतं पतिं। दुर्मरं पुरुषेणेह मन्ये ह्यध्वन्यनागते। यत्र नाहं न मे माता विप्रयुज्याव जीवि
तं। अहो धिक् कुरुवीरस्य ह्युरस्कं कांचनं धनुः। व्यपविद्धं हतस्येह मया पुत्रेण पश्यत ततस्ततो पश्यत मे
वीरं निहतं पितरं युधि। द्रौण्या नं वीर रायने मया पुत्रेण पातितं। ब्राह्मणा कुरुमुख्यस्य प्रयुक्ता हय
सारिणः। कुर्वंति शांतिकं त्वद्य रणे योयमयाहतः। व्यादिशंतु च मे विप्राः प्रायश्चित्तमिहाद्य वै सुनृशं
सस्य पापस्य पितुर्हंतू रणाजिरे। दुश्चराद्वादश समा हत्वा पितरमद्य वै। ममेह सुनृशंसस्य संवीत
स्यास्य चर्मणा। शिरःकपाले वास्येच खादतः पितुरद्य मे। प्रायश्चित्तं हि नास्त्यन्यद्धत्वाद्य पितरं मम
नागात्मजे पश्य मुक्ते भर्तारं निहतं मया। कृतं प्रियं मया तेद्य निहत्य समरेर्जुनं। सोहमद्यास्य यास्यामि
गतिं पितुर्निषेवितां। न शक्नोम्यद्य आत्मनात्मानं अहं धारयितुं शुभे। सा त्वमपि मृते मातस्तथा गांडीविधन्वनि
नि। स्वप्राप्ति मता देवि सत्येनायुधमालभे। इत्युक्त्वा स ततो राजा दुःखशोकार्त्त याहतः। उपस्पृश्य
तदा राजन् दुःखादवचनमब्रवीत्। शृण्वं तु सर्वे कृतानि सूक्ष्माचराणि वराणि च। त्वं च मातर्यथा सत्य
ब्रवीमि भुजगोत्तमे। यदि नोत्तिष्ठति जयः पिता मे नरतर्षभः। अस्मिन्नेव रणेद्य शोषयिष्ये कलेवरं।
न हि मे पितरं हत्वा निःकृतिर्विद्यते क्वचित्। नरकं प्रतिपश्यामि ध्रुवं गुरुवधार्दितः। वीरहत्याविनि यं हत्व
गोशतेन प्रमुच्यते। पितरं हि निहत्यैवं निःकृतिर्दुर्लभा मया। एवमेको महातेजा पांडुपुत्रो धनंजयः।
पिता च मम धर्मात्मा तस्य मे निःकृतिः कुतः। इत्येवमुक्त्वा नृपते धनंजयसुतो नृपः। उपस्पृश्याब्रवद्दूर्ण

प्रायोपेतो महामतिः॥ आश्वमेधिके बभ्रुवाहनविलापः॥ वैशं॥ प्रायोपविष्टे नृपतौ मणिपूरेश्वरे तदा। पि
तृशोकसमाविष्टे सह मात्रा परंतप। उलूपी चिंतयामास तदा संजीवनं मणिं। स चोपातिष्ठत तदा पन्नगानां प
रायणं। तं गृहीत्वा तु कौरव्य नागराजपतेः सुता। मनःप्रह्लादनीं वाचं सैनिकानामथाब्रवीत्। उलूप्युवा
च॥ उत्तिष्ठ मा शुचः पुत्र नैष जिष्णुस्त्वया हतः। अजेयः पुरुषैरेष देवैर्वापि सवासवैः। मया तु मोहि
नी नाम मायैषा संप्रयोजिता। प्रियार्थं पुरुषेंद्रस्य पितुस्तेस्य यशस्विनः। जिज्ञासुर्ह्येष वै पुत्र बलस्य त
व कौरवः। संग्रामे युध्यतो राजन्नागतः परवीरहा। तस्मादसि मया पुत्र युद्धार्थं परिचोदितः। मा पापमात्म
नः पुत्र शंकेथाः स्वल्पमण्वपि। ऋषिरेष महातेजाः पुरुषः शाश्वतः स्थिरः। नैनं शक्नोति संग्रामे जेतुं श
क्रोऽपि पुत्रक। अयं तु मे मणिर्दिव्यः समानीतो विशांपते। मृतान्मृतान्पन्नगेंद्रान्यो जीवयति नित्य
दा। एतमस्योरसि त्वं च स्थापयस्व पितुः प्रभो। संजीवितं पुनः पुत्र ततो द्रष्टासि पांडवं। इत्युक्तः स्था
पयामास तस्योरसि मणिं तदा। पार्थस्यामिततेजाः स पुत्रः स्नेहादपापकृत्। तस्मिन्न्यस्ते मणौ वी
रो जिष्णुरुज्जीवितः पुनः। सुप्तोत्थित इवोत्तस्थौ मृष्टलोहितलोचनः। समुत्थितं महात्मानं लब्ध
संज्ञं मनस्विनं। समीक्ष्य पितरं स्वस्थं ववंदे बभ्रुवाहनः। उत्थिते पुरुषव्याघ्रे पुनर्लक्ष्मीवति प्रभो॥
दिव्याः सुमनसः पुण्या ववर्षे पाकशासनः। अनाहता दुंदुभयः प्रणेदुर्मेघनिःस्वनाः। साधु साध्वि
ति चाकाशे बभूव सुमहास्वनः। उत्थाय स महाबाहुः पर्याश्वस्तो धनंजयः। बभ्रुवाहनमालिंग्य ६५
समाजिघ्रत मूर्धनि। ददर्श नाविदूरेस्य मातरं शोककर्शितां। उलूप्या सह तिष्ठंतीं ततोऽपृच्छद्धनंजयः॥

किमिदं लक्ष्यते सर्वं शोकविस्मयहर्षवत्। रणाजिरममित्रघ्न यदि जानासि शंस मे। जननी च किमर्थं ते र
णाजिरमुपागता। नागेंद्रदुहिता चेयमुलूपी च समागता। जानाम्यहमिदं युद्धं त्वया मद्वचनात्कृतं। स्त्री
णामागमने हेतुमहमिच्छामि वेदितुं। तमुवाच ततो हृष्टो मणिपूरपतिस्तदा। प्रसाद्य शिरसा विद्वान्
उलूपी पृच्छ्यतामिति। आश्वमेधिके अर्जुनवाक्यं॥ अर्जुन०॥ किमागमनकृत्यं ते कौरव्यकुलनंदिनि।
मणिपूरपतेर्मातुस्तथैव च रणाजिरे। कच्चित्कुशलकामासि राज्ञोस्य भुजगात्मजे। मम वा चंचलापां
गे कच्चित्त्वं शुभमिच्छसि। कच्चित्ते पृथुलश्रोणि नाप्रियं शुभदर्शने। अकार्षमहमज्ञानादयं वा
बभ्रुवाहनः। कच्चिच्च राजपुत्री ते सपत्नी चैत्रवाहिनी। चित्रांगदा वरारोहा नापध्योति किंचन। तमु रा
वाचोरगपतेर्दुहिता प्राहसत्यथ। न मे त्वमपराध्योसि न नृपो बभ्रुवाहनः। न जनित्री तथास्येयं मम
या प्रेष्यवत्स्थिता॥ श्रूयतां यद्यथा चेदं मया सर्वं विचेष्टितं। न मे कोपस्त्वया कार्यः शिरसा त्वां प्र
सादये त्वत्प्रीत्यर्थं हि कौरव्य कृतमेतन्मयानघ। यत्तच्छृणु महाबाहो निखिलेन धनंजय। महा
भारतयुद्धे यत्त्वया शांतनवो नृपः। अधर्मेण हतः पार्थ तस्येषा निःकृतिः कृता। न हि भीष्मस्त्व
या वीर युध्यमानो निपातितः। शिखंडिना तु संयुक्तस्तमाश्रित्य हतस्त्वया। तस्य शांतिमकृत्वा त्वं त्यजेथाय
दि जीवितं। कर्मणा तेन पापेन पतेथा नरके ध्रुवं। एषा त्र विहिता शांतिः पुत्राद्यां प्राप्तवानसि। वसुभिर्वसु
धापाल गंगया च महामते। पुरा तु श्रुतमेतावद्वसुधा कथितं मम। गंगायास्तीरमागम्य हते शांतनवे न
प। आप्लुत्य देवा वसवः समेत्य तु महानदीं। इदमूचुर्वचो घोरं भागीरथ्या मते तदा। एष शांतनवो भीष्मो नि

हतः सव्यसाचिना।अयुध्यमानः संग्रामे संशप्तो ऽन्येन त्वामिति।तदनेनास्ति संगे न वयमप्यर्जुनं मुसोऽशा
य नयोजयामेति तथास्त्विति वसाब्रवीत्।तदहं पितुरावेद्य त्वत्तोऽप्रव्यथितेंद्रिया।अत्र त्वं संवतछत्वा
विषादमगमत्परं।पिताहमेव त्वत्कृत त्वालदर्थे समयावृता।पुनः पुनः प्रसाद्येनानृतएनमिदं मह्यं वचोपु
त्र त्वस्य महाबाहो मणिपूरेश्वरो युवा।सएनं रणमध्यस्थो शरैः पातयिता त्तुवि।एवं कृते सनागेंद्रमुक्त
शापो त्तविष्यति।गच्छेति वसुत्तिर्ब्रोक्तो मम वेदं शरांशा सः।तत्कृत्वाद्य मयात स्माच्छापाद सिविमो
क्षितः।न हित्वां देवराजोपि समरे प पराजयेत्।आत्मा पुत्रः स्मृतस्तस्मात्तेनेह सि पराजितः।नात्र
दोषो मम मतः कथं वा मन्यसे विभो।इत्येवमुक्तो विजयः प्रसन्नात्माब्रवीदिदं।सर्वं मम प्रियं दे
वि यदेतत्कृतवत्यसि।इत्युक्त्वा प्रब्रवीत्पुत्रं मणिपूरपतिं जयः।चित्रांगदायाः सर्वं त्वं याः कौर
व्य उहितुस्तदा।अर्जुन०।युधिष्ठिरस्याश्वमेधः परां चैत्रीं भविष्यति।तत्रागच्छेः सहामात्यो त्वातु
ल्यां सहितस्तथा।इत्येवमुक्तः पार्थेन स राजा बभ्रुवाहनः।उवाच वचनं धीमान् इदं सा प्राविले
स्मपः।उपायास्यामि त्वत्तः शासनाद्धर्मजं प्रति।अश्वमेधे महायज्ञे द्विजाति परिवेषकः।मम त्वनुप्र
हार्थाय प्रविश्य स्वपुरं स्वकं।भार्याः स्यां सह राज्ञे युद्धमात्र तेत्र विचारणा।उषित्वेह विशल्यस्त्वं सुख
स्वबेरमनि प्रस्तो।पुनरन्वानुगमनेक तोसि जयतावरा।इत्युक्तः स तु पुत्रेण प्रत्युवाच वानरकेतनः।समयव्र
ज्ञोऽवाश्वको तेय स्तदा चित्रांगदासुतौ।विदितं ते महाबाहो यथा दीक्षां वरामहे।स न तावत् प्रवेक्ष्यामि
पुरं ते सुत्तलोचना।यथाकामं प्रयात्वेष यज्ञियश्च तुरंगमः।स्वस्ति ते स्तु गमिष्यामि न स्थानं विद्यते ६५

ममास तत्र विधिवत्तेन पूजितः पाकशासनिः। सार्थात्त्यामन्त्र्यनुज्ञातः प्रायाद्भरतसत्तम॥ इत्याश्वमेधिकेऽर्जुन
प्रसादो नाम॥ वैशं॰ पा॰॥ स तु वाजी समुद्रांतां पर्यत्य पृथिवीमिमां। निवृत्तोभिमुखो राजन् येन नागाह्वयं पुरं। अनुग
च्छंश्च तेजस्वी निवृत्तोथ किरीटभृत्। यदृच्छया समापेदे पुरं राजगृहं तदा। तमभ्यासगतं ज्ञात्वा जरासंधात्म
जात्मजः। क्षत्रधर्मे स्थितो वीरः समरायाजुहाव ह। ततः पुरात्स निःक्रम्य रथी धन्वी शरी तली। मेघसंधिः पद
ति वधनंजयमुपाद्रवत्। आसाद्य च महातेजा मेघसंधिर्धनंजयं। बालत्तावान्महाराज प्रोवाचेदं न कौशला
त्। किमयं चार्यते वाजी स्त्रीमध्य इव पांडव। हयमेनं हरिष्यामि प्रयतस्व विमोक्षणे। अदत्तानुनयो युद्धे यदि त्वं
पितृभिर्मम। करिष्यामि तवातिथ्यं प्रहर प्रहराम्यहं। इत्युक्तः प्रत्युवाचैनं पांडवः प्रहसन्निव। विघ्नकर्ता मया
वार्य इति मे व्रतमाहितं। भ्रात्रा ज्येष्ठेन नृपते तवापि विदितं ध्रुवं। प्रहरस्व यथाशक्त्या न मन्युर्विद्यते मम।
इत्युक्तः प्राहरत्पूर्वं पांडवं मगधेश्वरः। किरन् शरसहस्राणि वर्षाणीव सहस्रदृक्। ततो गांडीवभृच्छूरो गांडी
वप्रेषितैः शरैः। चकार मोघांस्तान् बाणान् अयत्नाद्भरतर्षभ। स मोघांस्तस्य बाणौघान् कृत्वा वानरकेतनः।
शरान्मुमोच ज्वलितान् दीप्तास्यानिव पन्नगान्। ध्वजे पताकादंडेषु रथयंत्रे हयेषु च। अन्येषु च रथांगे
षु न शरीरे न सारथौ। संरक्ष्यमाणः पार्थेन शरीरे फाल्गुनस्य ह। मन्यमानः स्वकं वीर्यं मागधः प्राहिणोच्छरा
न्। ततो गांडीवभृच्छूरो मागधेन भृशाहतः। बभौ वसंतसमये पलाशः पुष्पितो महान्। अवध्यमानः सोऽभ्यघ्नं
मागधः पांडवर्षभं। तेन तस्थौ स कौरव्यः लोकवीरस्य दर्शने। सव्यसाची तु संक्रुद्धो विकृष्य बलवद्धनुः। हयां
श्चकार निर्देहान् सारथेश्च शिरोहरत्। धनुश्चास्य महच्चित्रं क्षुरेण निचकर्त ह। हस्तावापं पताकां च ध्वजं
चैव न्यपातयत्। स राजा विरथो व्यश्वो विधनुर्हतसारथिः। गदामादाय कौंतेयमभिदुद्राव वीर्यवान्। तस्या

पततस्त्वाभुगदां हेमपरिष्कृतां। त्रारेभ्य कर्तुं बकुधा बकुधा गधुत्वा जित्तिः। सा गदा शाकलीकृता विशीर्णम ६
तिबंधना। व्याली निर्मुच्यमानेव पपातास्य सह सुधा। विरथं विधनुष्कं च गदया परिवर्जितं। नैच्छत्ताडयि
तुं धीमानर्जुनः समराग्रणीः। ततस्तं नं विमनसं क्षत्रधर्मे समास्थितं। सांत्वपूर्वमिमं वाक्यं अब्रवीत्क
पिकेतनः। पर्याप्तः क्षत्रधर्मोयं दर्शितः पुत्र गम्यतां। बह्वो तत्र समरे कर्म तव बालस्य पार्थिव। युधिष्ठिरस्य
संदेशो न हंतव्या नृपा इति। तेनजीवसि राजंस्त्वं अपराद्धोपि मे रणे। इति मत्वा तदात्मानं प्रत्यादिष्टं स मा
गधः। तथ्यमित्यवगम्येनं प्रांजलिर्वाक्यमब्रवीत्। पराजितोस्मि भद्रं ते नाहं योद्धुमिहोत्सहे। यत्कृत्यं म
या तेद्य तद्ब्रूहि कृतमेव तु। तमर्जुनः समाश्वास्य पुनरेवेदमब्रवीत्। आगंतव्यं परां चैत्रीमश्वमेधे नृपस्य
नः। इत्युक्तः स तथेत्युक्त्वा पूजयामास तं हयं। फाल्गुनं च युधांश्रेष्ठं विधिवत्सहदेवजः। ततो यथेष्टमगमत्पु
नरेव स केसरी। ततः समुद्रतीरेण वंगान्पुंड्रान्सकोशलान्। तत्र तत्र च भूरीणि म्लेच्छसैन्यान्यनेकशः
विजिग्ये धनुषा राजन्गांडीवेन धनंजयः॥ आश्वमेधिके मागधपराजयः। वैशंपायन०। मागधेनार्चितो रा
जन्पांडवः परवीरहा। दक्षिणां दिशमास्थाय चारयामास तं हयं। ततः स पुनरावृत्य हयः कामचरो बली। आ
ससाद पुरीं रम्यां चेदीनां शुक्तिकाह्वयां। शरत्तेनार्चितस्तत्र शिशुपालात्मजेन सः। प्रतिपूर्वेणमानेन पूजया च
महाबलः। तत्रार्चितो ययौ राजंस्तदा स तुरगोत्तमः। काशीनंगान्कोशलांश्च किरातानथ तंगणान्। तत्र पू
जां यथान्यायं प्रतिगृह्य स पांडवः। पुनरावृत्य कौंतेयो दशार्णानगमत्तदा। तत्र चित्रांगदो नाम बलवान्
वसुधाधिपः। तेन युद्धमभूत्तस्य विजयस्यातिभैरवं। तं चापि वशमानीय किरीटी पुरुषर्षभः। निषादराज्ञो ७
विषयमेकलव्यस्य जग्मिवान्। एकलव्यसुतश्चैव युद्धेन समवारयत्। ततश्चक्रे निषादैः स संग्राममलोम

हर्षणां ततस्तमपि कौंतेयः समरेष्वपराजितः। त्रिगार्त्तस्समरे वीरो यज्ञविघ्नार्थमागतं। स तं जित्वा महाराज नैषा
दिं पाकशासनिः। अन्वितः प्रययौ स्तु योद्दलिवांसलिलार्णवं। तत्रापि द्रविडैरंध्रै रौद्रै र्माहिषकैरपि तथा कोल्ल
किरीटैस्य युद्धमासीत्किरीटिनः। तुरंगस्य वशो नाथ सुराष्ट्रान्नर्त्तितौ ययौ। गोकर्णमपि चासाद्य प्रभासम
न्तितो ययौ। ततो द्वारवतीं रम्यां वृष्णिवीराभिरक्षितां। आससाद हयः श्रीमान्कुरुराजस्य यज्ञियं। तमुन्मथ्य ह
य श्रेष्ठं यादवानां कुमारकाः। प्रययुस्तांस्तदा राजन्नुग्रसेनो न्यवारयत्। ततः पुराद्विनिःक्रम्य वृष्ण्यंधकप
तिस्तदा सहितो वासुदेवेन मातुलेन किरीटिनः। तौ समेत्य कुरुश्रेष्ठं विधिवत्प्रीतिपूर्वकं। परया भरतश्रेष्ठ पूजया
समवस्थितौ। ततस्ताभ्यामनुज्ञातो ययौ येन हयो गतः। ततः स पश्चिमं देशं समुद्रस्य तदा हयः। क्रमेण व्यचर
त्स्फीतं ततः पंचनदं ययौ। तस्मादपि स कौरव्य गांधारविषयं हयः। विचचार यथाकामं कौंतेयानुगतो मह
मः। तत्र गांधारराजेन युद्धमासीन्महात्मनः। घोरं शकुनिपुत्रेण पूर्ववैरानुसारिणा। इत्याश्वमेधिके ऽ
श्वचारे गांधारविषयप्राप्तिः। ८३॥ वैशंपा०। शकुनेस्तु सुतो धीमान्गांधाराणां महारथः। प्रत्युद्ययौ गुडा
केशं सैन्येन महता वृतः। हस्त्यश्वरथपूर्णेन पताकाध्वजमालिना। अमृष्यमाणास्ते योधा नृपतेः शा
कुनेर्वधं। अभ्ययुः सहिताः सर्वे प्रगृहीतशरासनाः। तानुवाच स धर्मात्मा बीभत्सुरपराजितः। युधिष्ठि
रस्य वचनं न स्यतेजक्र हितं। वार्यमाणास्तु पार्थेन सांत्वपूर्वममर्षिताः। परिवार्य हयं जग्मुस्ततश्चुक्रोध
पांडवः। क्षुरैर्गांडीवनिर्मुक्तैर्नातियत्नादिवार्जुनः। ते वध्यमानाः पार्थेन हयमुत्सृज्य संभ्रमात्। न्यवर्त्तंत
महाराज शरवर्षार्दिता भृशं। वितुद्यमानस्तैश्चापि गांधारैः पांडवर्षभः। आदिश्यादिश्य तेजस्वी शि
रांस्येषां न्यपातयत्। वध्यमानेषु तेजस्वी गांधारेषु समंततः। स राजा शकुनेः पुत्रः पांडवं प्रत्यवारयत्।

तु
तं युध्यमानं राजानं तत्र धर्मे व्यवस्थितं। पार्थो ब्रवीयथा वध्या राजानो राजसत्तमा। सनातनः अलं युद्धेन ते वीर
न ते स्त्वद्य पराजयः। इत्युक्तस्तद्वनात्तस्य वाक्यमज्ञानमोहितः। शराश्च समकर्षणमवाकिरत सायकैः॥ तस्य
पार्थः शिरस्त्राणमर्धचंद्रेण पत्रिणा। अपाहरदसंभ्रांतो जयद्रथशिरो यथा। तं दृष्ट्वा विस्मयं जग्मु र्गांधाराः
सर्व एव ते। इच्छता तेन न हतो राजेत्यपि च ते विदुः। गांधारराजपुत्रस्तु पलायनकृतक्षणः। प्रययौ तैरवं सहितैस्त्र
स्तैः सुद्रुमगैरिव। तेषां नु तरसा पार्थस्तत्रैव परिधावता तां। विजहार तत्र मांगानि तल्लैः सन्नतपर्वभिः। अपि
तांश्च सुजानश्चके चित्तं नावबुध्य नरा रहः तान्। जित्वा गांडीवनिर्मुक्तैरिषुभिः पार्थचोदितैः। संभ्रांत नरनागा
श्वमथ्य तद्दिक्षु तं बलं। हते विध्वस्तत्वयि च मावर्तत ह्युमु मुक्तः। नास्य दृश्यं तत्त्वरस्यके विदग्र्य कर्मणः
रिपवः पात्यमानावे येसह युद्धनंजयं। ततो गांधारराजस्य मं त्रिवृद्धपुरःसरं। जननी निर्ययौ ताता पुरस्कृ
त्यार्थमुत्तमं। सान्यवारयदव्यग्रा तं पुत्रं युद्धदुर्मदं। प्रसादयामास च तं जिष्णुमक्लिष्टकारिणं। तां पूजयित्वा
कौंतेयः प्रसादमकरोत्तदा। शकुनेः श्यापितनयं सांत्वयन्निदमब्रवीत्। न मे प्रियं महाबाहो यत्ते बुद्धि
रियं कृता। प्रतियोद्धुममित्रघ्नं त्वां तेव त्वं हि मे नघ। गांधारी मातरं स्मृत्वा धृतराष्ट्रकृतेन च। तेन जीवसि
राजंस्त्वं निहता स्त्वनुगास्तथा। मैवं त्वं शाम्य तां वैरं मातेत्तलद्धद्धिरीदृशी। आगंतव्यं परां चैत्रीमश्वमेधेनृ
पस्य नः॥ इत्याश्वमेधिके गांधारपराजयः॥ वैशं॥ इत्युक्तो हि ययौ पार्थो हियं तं कामचारिणं। न्यवर्तत ततो
वाजी येन नागाह्वयं पुरं। निहतं तं तु शुश्राव चारेभ्यो युधिष्ठिरः। श्रुत्वार्जुनं जगत्पालिनं सर्वहृष्टमना
नवत्। विजयस्य तु यत्कर्म गांधारविषये तदा। श्रुत्वान्यद्बुद्रेशोपुसरसुप्रीतो स वभूवपः। एतस्मिन्नेव ४८

कालेनु द्वादशीं माघपाक्षिकीं। इष्टं गृहीत्वा नक्षत्रं धर्मराजो युधिष्ठिरः। समानाय्य महातेजाः सर्वान्भ्रातॄ
न्महात्मनः। भीमं च नकुलं चैव सहदेवं च कौरवः। प्रोवाचेदं वचः काले तदा धर्मभृतां वरः। आमंत्र्य वद
तां श्रेष्ठो भीमं भीमपराक्रमं। आयाति भीमसेनासौ सहाश्वेन तवानुजः। यथा मे पुरुषाः प्राहुर्ये धनंजय
सारिणः। उपस्थितश्च कालोयमभितो वर्तते हयः। माघी च द्यपि मासीश्च मासः शेषो वृकोदर। तत्प्रस्था
प्यंतु विद्वांसो ब्राह्मणा वेदपारगाः। वाजिमेधार्थसिद्ध्यर्थं देशं पश्यंतु यज्ञियं। इत्याश्वमेधिके युधिष्ठिर
वाक्यं। वैशं॥॥ इत्युक्तः स तु तच्चक्रे भीमो नृपतिशासनं। हृष्टः श्रुत्वा नरपतेरायांतं सव्यसाचिनं। ततो ययौ
भीमसेनः प्राज्ञैः स्थपतिभिः सह। ब्राह्मणानग्रतः कृत्वा कुशलान्यज्ञकर्मसु। तं सशालचयं श्रीमत्संप्र
तोलीसुघट्टितं। स्थापयामास कौरव्यो यज्ञवाटं यथाविधि। ब्राह्मणानांश्च वेश्मानि नानादेशसमेयुषां।
कारयामास भीमस्तु सुवितानान्यनेकशः। तथा संप्रेषयामास दूतान्नृपतिशासनात्। भीमसेनो महा
राज राज्ञामक्लिष्टकर्मणां। ते प्रियार्थं कुरुपतेराययुर्नृपसत्तमाः। रत्नान्यनेकान्यादाय स्त्रियोश्वानायु
धानि च। तेषां निविशतां तेषु शिविरेषु सहस्रशः। नर्दतः सागरस्येव शब्दो दिवमथास्पृशत्। तेषां चाभ्या
गतानां च राज्ञां राजीवलोचनः। व्यादिदेशान्नपानानि शय्याश्चातीवमानुषाः। वाहनानां च विविधा
विधाः शालीक्षुगोरसैः। नृपत्ताः पुरुषव्याघ्र व्यादिदेश स धर्मराट्। तथा तस्मिन्महायज्ञे धर्मराजस्य धी
मतः। समाजग्मुर्मुनिगणा बहवो ब्रह्मवादिनः। ये च द्विजातिप्रवरास्तत्रासन्पृथिवीपते। समाजग्मुः स
शिष्यांस्तान्प्रतिजग्राह कौरवः। सर्वांश्चैतानुपादाय यथावावसथादिति। स्वयमेव महातेजा दंभं त्यक्त्वा

युधिष्ठिरः॥ ततः कृत्वा स्थापयतः शिल्पिनोन्ये च ये तदा। कृत्स्नं यज्ञविधिं राजन्धर्मराजे न्यवेदयन्॥ तच्छ्रुत्वा धर्मराजा
य कृतं सर्वमनिंदितः। हृष्टरूपोभवद्राजन्सह भ्रातृभिरच्युत॥ इत्याश्वमेधिके यज्ञायतननिर्माणं॥ वैशंपायन उ॥
तस्मिन्यज्ञे प्रवृत्ते तु वाग्मिनो हेतुवादिनः। हेतुवादान्बहून्प्राहुः परस्परजयैषिणः॥ ददृशुस्तं नृपतयो यज्ञ
स्य विधिमुत्तमं। देवेंद्रस्येव विहितं भीमेन कुरुनंदन॥ ददृशुस्तोरणान्यत्र शातकौंभमयानि ते। शय्यासनविहा
रांश्च बहून्नथवित्तपितान्। घटान्पात्रीः कटाहांश्च कलशान्वर्द्धमानकान्। न ते किंचिदसौवर्णमपश्यं
स्तत्र पार्थिवाः। यूपांश्च शास्त्रविहितान्दारवान्हेमभूषितान्। उपक्लिप्तान्यथाकामं विधिवद्भूरितेज
सः। स्थलजा जलजा ये च पशवः केचन प्रभो। सर्वानेव समानीतांस्तानपश्यंत ते नृपाः। गाश्चैव महिषी
श्चैव तथा वृद्धस्त्रियोपि च। औदकानि श्वापदानि वयांसि च। जरायुजान्यंडजानि स्वेदजान्युद्भि
ज्जिदानि च। पर्वतानूपजातानि सत्त्वानि ददृशुश्च ते। एवं प्रमुदितं सर्वं पशुगोधनधान्यतः। यज्ञवाटं नृपा
दृष्ट्वा परं विस्मयमागमन्। अनिशं दीयते चास्मिन्तत्र सोऽक्षय्यं त्रिविधं। ब्राह्मणानां विशां चैव बहु
मृष्टान्नमृद्धिमत्। पूर्णे शतसहस्रे तु विप्राणां तत्र भुंजतां। दुंदुभिर्मेघनिर्घोषो मुहुर्मुहुरताड्यत॥ विननादा
सकृत्सोथ दिवसे दिवसे तदा। एवं प्रवर्तते यज्ञो धर्मराजस्य धीमतः। अन्नस्य बहवो राजन्पर्वताश्चोछ्रि
ता इव। दधिकुल्याश्च ददृशुः सर्पिषश्च ह्रदान्जनाः। जंबूद्वीपो हि सकलो नानाजनपदायुतः। राजन्नदृश्य
त तस्यैको राज्ञस्तस्य महाक्रतौ। तत्र जातासहस्राणि पुरुषाणां ततस्ततः। गृहीत्वा धनमाजग्मुर्बहूनि पुरुष
र्षभाः। राजानः स्रग्विणश्चैव सुमृष्टमणिकुंडलाः। पर्यवेषन्द्विजाग्र्याणां शतशोथ सहस्रशः। विविधा ६५

न्यन्नपानानि पुरुषाये नुयायिनः। तेषां नृपोपक्लृप्तान्यानि ब्राह्मणेभ्यो ददुस्म ते॥ इत्याश्वमेधिके यज्ञविस्तृतिं वैशंपाना॥
समागतान्वेदविदो राज्ञश्च पृथिवीश्वरान्। दृष्ट्वा युधिष्ठिरो राजा भीमसेनमथाब्रवीत्। उपयाता नरव्याघ्र य इमे
पृथिवीश्वराः। एतेषां क्रियतां पूजा पूजार्हा हि जनेश्वराः। इत्युक्तः स तथा चक्रे नरेंद्रेण यशस्विना भीमसेनो महाते
जा यमाभ्यां सह कौरव। अथाभ्यगच्छद्गोविंदो वृष्णिभिः सह धर्मजं। बलदेवं पुरस्कृत्य सर्वप्राणभृतां वरः। युयुधा
नेन सहितः प्रद्युम्नेन गदेन च। निशठेनाथ सांबेन तथैव कृतवर्मणा। तेषामपि परां पूजां चक्रे भीमः सहानुजः
विविशुस्ते च वेश्मानि रत्नवंति नरर्षभाः। युधिष्ठिरसमीपे तु कथांते मधुसूदनः। अर्जुनं कथयामास बहु
संग्रामकर्षितं। स तं पप्रच्छ कौंतेयः पुनः पुनररिंदमः। धर्मराट् भ्रातरं जिष्णुं समाचष्ट जगत्पतिः। वासुदे
वं। आगतो द्वारकावासी समाप्तः पुरुषो नृप॥ सो ऽद्राक्षीत्पांडवश्रेष्ठं बहुसंग्रामकर्षितं। समीपं च महाबा
हुः समाचष्ट मम प्रभुः। कुरु कार्याणि कौंतेय हयमेधार्थसिद्धये। इत्युक्तः प्रत्युवाचेदं धर्मराजो युधिष्ठिरः।
दिष्ट्या स कुशली जिष्णुः उपयाति च माधव। तव यत्संदिदेशासौ पांडवानां बलाग्रणीः। तदाख्यातुमिहेच्छा
मि त्वत्तो यदुनंदन। इत्युक्तो राजशार्दूल वृष्ण्यंधकपतिस्तदा। प्रोवाचेदं वचो वाग्मी धर्मात्मानं युधिष्ठिरं।
इदमाह महाराज पार्थवाक्यं नरस्तदा। वाच्यो युधिष्ठिरः कृष्ण काले वाक्यमिदं मम। आगमिष्यंति राजानः स
र्व्वतः कौरवान्पुनः। तेषामनेकराः पूजा कार्या वै तद्धि नः क्षमं। इति मद्वचनाद्राजा विज्ञाप्यो माधव त्वया। य
था चात्ययिकं न स्याद्यदर्घाहरणे भवेत्। कर्त्तुमर्हसि तद्राजा भवांश्चाप्यनुमन्यतां। राजद्वेषाद्विनश्येयु
र्नेमा राजन्पुनः प्रजाः। इदमन्यच्च कौंतेय वचः स पुरुषोऽब्रवीत्। धनंजयस्य नृपते तन्मे निगदतः शृणु।

पयास्यतियज्ञंचमणिपूरपतिर्नृपः।पुत्रोममहातेजादयितोबभ्रुवाहनः।तंत्वान्ममदेशार्थेयथावत्पूजयेः।स
हिभक्तोनुरक्तश्चममनित्यमितिप्रभो।इत्येतद्वचनंश्रुत्वाधर्मराजोयुधिष्ठिरः।अभिनंद्यास्यतद्वाक्यमिदंवचन
मब्रवीत्।आश्वमेधिकेअर्जुनसंदेशः।युधिष्ठिरउ०।श्रुतंप्रियमिदंकृष्णयत्त्वमर्हसिभाषितुं।तन्मेमृतरसप्रख्यं
मनोह्लादयितुंप्रभो।बहूनिकिलयुद्धानिविजयस्यनराधिपैः।पुनरासन्हृषीकेश।तत्रतत्रेतिमेश्रुतं।मन्निमि
त्तंहिसततंपार्थःसुखविवर्जितः।अतीवविजयोधीमानितिमेदूयतेमनः।संचिंतयामिवार्ष्णेयसदाकुंतीसुतंर
हः।किंनुतस्यशरीरेस्तिसर्वलक्षणपूजिते।अनिष्टंलक्षणंकृष्णयेनदुःखान्युपाश्नुते।अतीवसुखभागी
ससततंकुरुनंदनः।नचपश्यामिबीभत्सोर्निंद्यंगात्रेषुकिंचन।श्रोतव्यंचेन्मयैतत्तेतन्मेव्याख्यातुमर्हसि।इ
त्युक्तस्तुहृषीकेशोध्यात्वासुमहदुत्तरं।राजानंभोजराजन्यवर्द्धनोविष्णुरब्रवीत्।नास्त्यस्यनृपतेकिं
चिदनिष्टंगात्रमण्वपि।ऋतेपुरुषसिंहस्यपिंडिकेस्यातिकायतः।ताभ्यांसपुरुषव्याघ्रोनित्यमध्वनियु
ज्यते।नह्यन्यमनुपश्यामियेनासौदुःखभाग्भवेत्।इत्युक्तःसकुरुश्रेष्ठस्तथाकृष्णेनधीमता।प्रोवाचवृष्णि
शार्दूलमेवमेतदितिप्रभो।कृष्णातुद्रौपदीकृष्णंतिर्यक्सासूयमैक्षत।प्रतिजग्राहतस्यास्तंप्रणयंचापि
केशिहा।सख्युःसखाहृषीकेशःसाक्षादिवधनंजयः।तत्रभीमादयस्तेतुकुरवोयाजकास्तथा।रेमुःश्रु या
त्वाविचित्रार्थांधनंजयकथांविभो।ततःकथयतामेवतेषामर्जुनसत्कथां।उपायाद्वचनान्नरोविज
यस्यमहात्मनः।सोभिगम्यकुरुश्रेष्ठंनमस्कृत्यचबुद्धिमान्।उपायातंनरव्याघ्रमर्जुनंप्रत्यवेदयत्।
तच्छ्रुत्वानृपतिस्तस्यहर्षबाष्पाकुलेक्षणः।प्रियाख्यानमिनित्तंवैददौबहुधनंतदा।ततोद्वितीयेदि १०

वसेमहान् शब्दोऽस्य वर्द्धते। आयाति पुरुषव्याघ्रे पांडवानां धुरंधरे। ततो रेणुः समुद्भूतो विबभौ तस्य वाजिनः।
अभितो वर्तमानस्य यथोच्चैःश्रवसः पुरा। तत्र हर्षकला वाचो नराणां शुश्रुवेऽर्जुनः। दिष्ट्यासि पार्थ कुशली
धन्यो राजा युधिष्ठिरः। कोऽन्यो हि पृथिवीं कृत्स्नां विजित्य वसुपार्थिवान्। चारयित्वा हयश्रेष्ठं उपायात् त्वदृतेऽर्जु
न। येऽप्यतीता महात्मानो राजानः सागरादयः। तेषामपीदृशं कर्म न किंचिदनुशुश्रुमः। नैतदन्ये करिष्यं
ति राजानः पृथिवीक्षितः। यत्त्वं कुरुकुलश्रेष्ठ दुःकरं कृतवानसि। इत्येवं वदतां तेषां नृणां श्रुतिसुखा गि
रः। शृण्वन् विवेश धर्मात्मा फाल्गुनो यज्ञविस्तरं। ततो राजा सहामात्यः कृष्णश्च यदुनंदनः। धृतराष्ट्रं पु
रस्कृत्य त्वं प्रत्युद्ययुस्तदा। सोऽभिवाद्य पितुः पादौ धर्मराजस्य धीमतः। भीमादींश्चापि संपूज्य पर्यष्वज
त केशवं। तैः समेत्यार्चितस्तान् स प्रत्यर्च्य च यथाविधि। विशश्राम महाबाहुस्तीरं लब्ध्वेव पारगः। एतस्मिन्नेव का
ले तु स राजा बभ्रुवाहनः। मातृभ्यां सहितो धीमान् कुरून् अभ्याजगाम ह। स समेत्य कुरून् सर्वान् सर्वैस्तैरभिनंदि
तः। प्रविवेश पितामह्याः कुंत्या भवनमुत्तमं। इत्याश्वमेधिके अर्जुनप्रत्यागमनं। वैशं।। स प्रविश्य यथान्या
यं पांडवानां निवेशनं। पितामहीमभ्यवंदत् साम्ना परमवल्गुना। ततश्चित्रांगदा देवी कौरव्यस्यात्मजापि च पृथां
कृष्णां च सहिते विनयेनाभिजग्मतुः। सुभद्रां च यथान्यायं याश्चान्याः कुरुयोषितः। ददौ कुंती सुतस्ताभ्यां रत्नानि
विविधान्युत। द्रौपदी च सुभद्रा च याश्चान्याः कुरुयोषितः। अवसत्तत्र ते देव्यो महार्हशयनासने। संपूजिते स्वयं
कुंत्या पार्थस्य प्रियकाम्यया। स च राजा महावीर्यः पूजितो बभ्रुवाहनः। धृतराष्ट्रं महीपालं उपतस्थे यथाविधि।
युधिष्ठिरं च राजानं भीमादींश्चापि पांडवान्। उपागम्य महातेजा विनयेनाभ्यवादयत्। स तैः प्रेम्णा परिष्वक्तः
पूजितश्च यथाविधि। धनं तस्मै ददुर्भूरि प्रीयमाना महारथाः। तथैव स महीपालः कृष्णं चक्रगदाधरं। प्रद्य

मंवहृषीकेशांविनयेनोपतस्थिवान्॥ तस्मैकृष्णोददौराज्ञेराज्ञार्हमनिर्जितं॥ रथंहेमपरिस्कारंदिव्याश्व
युक्तमुत्तमं॥ धर्मराजश्चवृत्तीमश्वयमज्ञोफाल्गुनस्तथा॥ पृथकपृथग्द्वैरथैवेनमर्चाभिःसमपूजयन्॥ ततस्तृ
तीयेदिवसेसत्यवत्यासुतोमुनिः॥ युधिष्ठिरंसमाभाष्यवाग्मीवचनमब्रवीत्॥ अद्यप्रभृतिकौंतेययजस्व
मयाहितोमुहूर्तोयाज्ञिकःप्राहुःश्चोदयंतिचयाज्ञिकाः॥ अहीनोनामराजेंद्रक्रतुस्तेयंविकल्पतो॥ बहुत्वात्कांचनस्या
स्यख्यातोबहुसुवर्णकः॥ सर्वमेवमहाराजदक्षिणात्रिगुणीकुरु॥ त्वद्वित्रंव्रजंतुतेराजन्ब्राह्मणाह्यत्रकारणं॥ त्रीन
श्वमेधान्विधिवत्संप्राप्यबहुदक्षिणान्॥ ज्ञातिवध्याकृतंपापंप्रहास्यसिनराधिप॥ पवित्रंपरमंह्येतत्पावनानांचपा
वनं॥ यदश्वमेधावभृथंप्राप्स्यसेकुरुनंदन॥ इत्युक्तःसतुतेजस्वीव्यासेनामिततेजसा॥ दीक्षांविवेशधर्मात्मावाजि
मेधाप्तयेततः॥ ततोयज्ञंमहातेजावाजिमेधंमहाक्रतुं॥ बह्वन्नदक्षिणंराजासर्वकामगुणान्वितं॥ तत्रवेदविदोरा
राजन्सर्वंचक्रुःकर्माणियाजकाः॥ परिक्रमंतःशास्त्रार्थान्विधिवत्साधुसिक्षिता॥ नतेषांस्खलितंतत्रना
सीदपकृतंतथा॥ क्रमयुक्तंचयुक्तंचचक्रुस्तत्रद्विजर्षभाः॥ कृत्वाप्रवर्ग्यंधर्मज्ञायथावद्द्विजसत्तमाः॥ क्रतुस्ते
विविधंराजन्नतथैवाभिषवंद्विजाः॥ अभिषूयमहाराजसोमंसोमपसत्तमाः॥ सवनान्यानुपूर्वेणचक्रुःशा
स्त्रानुसारिणः॥ नतत्रकृपणःकश्चिन्नदरिद्रोबभूवह॥ क्षुधितोदुःखितोवापिप्राकृतोवापिमानवः॥ भोज
नंभोजनार्थिभ्योदापयामासनित्यदा॥ भीमसेनोमहातेजाःसततंराजशासनात्॥ संस्तरेकुशलाश्चापिसर्वक
र्माणियाजकाः॥ दिवसेदिवसेचक्रुर्यथाशास्त्रार्थचक्षुषः॥ नाषडंगविदत्रासीत्सदस्यस्तस्यधीमतः॥ नाव्रतो
नानुपाध्यायोनचवादाक्षिक्षणः॥ ततोयूपोछ्रयेप्राप्तेषड्बैल्वान्भरतर्षभ॥ खादिरास्तावतोरूपास्तावंतःस ११

ववर्णिनः। देवदारुमयौ द्वौ च यूपौ कुरुपतेः कृतौ। श्लेष्मातकमयं चैकं याज्ञिकाः समकारयन्। शोभार्थं चापरान्
यूपान् कांचनान् भरतर्षभ। स भीमः कारयामास धर्मराजस्य शासनात्। ते व्यकाशंत राजेंद्र वासोभिरुपशोभिताः।
महेंद्रानुगता देवा यथा सप्तर्षिभिर्दिवि। इष्टकाः कांचनीस्तत्र चयनार्थं कृता तदा। शुशुभे चयनं तत्र दक्ष
स्येव प्रजापतेः। चतुश्चित्यः स तत्रासीद् अष्टादशकरात्मकः। स रुक्मपक्षो निचितः त्रिगुणो गरुडाकृतिः। ततो नियु
क्ताः पशवो यथाशास्त्रं मनीषिभिः। तं तं देवं समुद्दिश्य पक्षिणः पशवश्च ये। सर्वांस्तान् स्वयुयुंजंस्ते तत्राग्निचय
कर्मणि। यूपेषु नियतं चासीत् पशूनां त्रिशतं तथा। अश्वरत्नोत्तमं राज्ञः कौंतेयस्य महात्मनः। स यज्ञः शुशुभे तस्य
साक्षाद्देवर्षिसंकुलः। गंधर्वगणसंकीर्णः शोभितोऽप्सरसां गणैः। स किंपुरुषगीतैश्च किंनरैरुपशोभितः। सिद्ध
८ विप्रनिवासैश्च समंतादुपशोभितः। तस्मिन् सदसि नित्यास्तु व्यासशिष्या द्विजोत्तमाः। सर्वशास्त्रप्रणेतारः
कुशला यज्ञकर्मणि। नारदश्च बभूवात्र तुंबुरुश्च महाद्युतिः। विश्वावसुश्चित्रसेनस्तथान्ये गीतकोविदाः।
गंधर्वा गीतकुशला नृत्येषु च विशारदाः। रमयंति स्म तान् विप्रान् यज्ञकर्मांतरेषु वै। इत्याश्वमेधिके यूपच
यनादिनिरूपणो नाम ॥ वैशंपायन उवाच ॥ शामयित्वा पशूनन्यान् विधिवद् द्विजसत्तमाः। तुरगं तं यथान्यायमालभंत तद्वि
जातयः। ततः संज्ञाप्य तुरगं विधिवद् याजकर्षभाः। उपसंवेशयन् राजन् ततस्तां द्रुपदात्मजां। कलाभिस्तिस्
सृभी राजन् यथाविधि मनस्विनीं। उद्धृत्य तु वपां तस्य यथाशास्त्रं द्विजर्षभाः। श्रपयामासुरव्यग्राः शास्त्रव
द्भरतर्षभ। तं वपाधूमगंधं तु धर्मराजः सहानुगः। उपाजिघ्रद् यथान्यायं सर्वपापापहं तदा। शिष्टान्यंगानि या
न्यासंस्तस्याश्वस्य नराधिप। तान्यग्नौ जुहुवुर्धीराः समस्ताः षोडशर्त्विजः। संस्थाप्यैवं तस्य राज्ञस्तं क्रतुं

रित्वेजसह व्यासः सशिष्यो भगवान् वर्द्धयामास तं नृपं। ततो युधिष्ठिरः प्रादात् सदस्येभ्यो यथाविधि। कोटीस
हस्रं निष्काणां व्यासाय तु वसुंधरां। प्रतिगृह्य तु तां राजन् व्यासः सत्यवतीसुतः। अब्रवीद्भरतश्रेष्ठं धर्मा
त्मानं युधिष्ठिरं। व्यास०॥ पृथिवी भवतस्त्वेषा सन्यस्ता राजसत्तम। निःक्रयो दीयतां मह्यं ब्राह्मणा हि धनार्थि
नः। युधिष्ठिरस्तु तान् विप्रान् प्रत्युवाच महामनाः। भ्रातृभिः सहितो धीमान् मध्ये राज्ञां महात्मनां। अश्व
मेधे महायज्ञे पृथिवी दक्षिणा स्मृता। अर्जुनेन जिता येयं ऋत्विग्भ्यः प्रापिता मया। वनं प्रविश्ये विप्रेंद्रं
विभजध्वं महीमिमां। चतुर्धा पृथिवीं कृत्वा चातुर्होत्रप्रमाणतः। नाहमादातुमिच्छामि ब्रह्मस्वं मुनिपुं
गवाः। इदं मनो हि मे नित्यं भ्रातॄणां च ममानघाः। इत्युक्तवति तस्मिंस्तु द्रौपदी भ्रातरोपि च। एवमेतदि
ति प्राहुस्तदभूल्लोमहर्षणं। ततोंतरिक्षाद्वागासीत् साधु साध्विति भारत। तथैव द्विजसंघानां शंसतां
विबभौ स्वनः। द्वैपायनस्तथोक्तस्तु पुनरेव युधिष्ठिरं। उवाच मध्ये विप्राणां इदं संपूजयन्मुनिः। द
त्तैषा भवता मह्यं तां ते प्रतिददाम्यहं। हिरण्यं दीयतामेभ्यो द्विजातिभ्यो धरास्तु वः। ततोऽब्रवीद्वासु
देवो धर्मराजं युधिष्ठिरं। यथाह भगवान् व्यासस्तत्तथा कर्तुमर्हसि। इत्युक्तः स कुरुश्रेष्ठः प्रीता
त्मा भ्रातृभिः सह। कोटिकोटिकृतां प्रादाद्दक्षिणां त्रिगुणां क्रतोः। न करिष्यति तल्लोके कश्चिदन्यो नराधि
पः। यत्कृतं कुरुसिंहेन मरुत्तस्यानुकुर्वता। प्रतिगृह्य तु तद्द्रव्यं कृष्णद्वैपायनः प्रभुः। ऋत्विग्भ्यः प्रददौ
धीमान् चतुर्धा व्यभजंश्च ते। पृथिव्या निःक्रयं दत्वा तद्धिरण्यं युधिष्ठिरः। धूतपाप्मा जितस्वर्गो मुमु
दे भ्रातृभिः सह। ऋत्विजस्तमपर्यंतं सुवर्णनिचयं तदा। व्यभजंत यथोत्साहं द्विजातिभ्यो यथाविधि।
यज्ञवाटे तु यत्किंचिद्धिरण्यमपि भूषणं। तोरणानि च यूपांश्च घटान् पात्र्यस्तथेष्टिकाः। युधिष्ठिर

त्वनुज्ञातास्तत्सुवर्णंनयन्तुद्विजाः।अनंतरंब्राह्मणेभ्यःक्षत्रियालेभिरेवसु।तथाविट्शूद्रसंघाश्चयेचान्येम्लेच्छजातयः
कालेनमहताजग्मुस्तत्सुवर्णंततस्ततः।ततस्तेब्राह्मणाःसर्वेमुदिताजग्मुरालयान्।तर्पितावसुनातेनधर्मराज्ञाम
हात्मना।स्वमंशंभगवान्व्यासःकुंतीपादाभिवंदनात्।प्रददौतस्यमहतोहिरण्यस्यमहाद्युतिः।श्वशुरात्प्रीतिद
यंतंप्राप्यसाप्रीतमानसा।चकारपुण्यकंकालेनसुमहत्तत्पृथातदा।गत्वात्ववभृथंराजाविपाप्माभ्रातृभिस
हासभाज्यमानःशुशुभेमहेंद्रोदैवतैरिव।पांडवाश्चमहीपालैःसमेतैःसंवृतास्तदा।अशोभंतमहाराजयथा
वैश्रवणस्तथा॥राजभ्योपितदाप्रादाद्रत्नानिविविधानिच।राजभ्यःस्वानलंकारान्स्त्रियोरत्नानिकांचनं।
ततानस्वमपर्यंतंपार्थःपार्थिवमंडले।विसृजन्शुशुभेराजन्यथावैश्रवणस्तथा॥आनाय्यचतदावीरंराजा
नंबभ्रुवाहनं।प्रदायविपुलंवित्तंगृहान्प्रस्थापयत्तदा।दुःशलायाश्चपौत्रंचबालकंपार्थिवर्षभः।स्वरा
ज्येपितृनिपुरेप्रीत्यासमभ्यषेचयत्।राज्ञश्चैवापितान्सर्वान्सुविभक्तान्सुपूजितान्।प्रस्थापयामास
यथाकुरुराजोयुधिष्ठिरः।एवंबभूवयज्ञोसौधर्मराजस्यधीमतः।बह्वन्नधनरत्नौघःसुरामैरेयसागरः।
सर्पिष्पंकाह्रदायत्रबहवश्चान्नपर्वताः।रसालाःकर्दमाकुल्याबभूवुर्भरतर्षभ।भक्ष्यषाडवरागा
णांक्रियतांभुज्यतामिति।पशूनांवध्यमानानांनांतस्तत्रस्मदृश्यते।ततोमत्तप्रमुदितंप्रगीतयुवतीजनं।मृदं
गशंखशब्दैश्चमनोरममभूत्तदा।दीयतांभुज्यतांचेतितत्रशब्दोमहानभूत्।नृत्यतांगीयतांचेतिदिवारात्रि
मवारितः।तंमहोत्सवसंकाशंप्रतिहृष्टजनाकुलं।कथयंतिस्ममनसानानादेशनिवासिनः।वर्षित्वाधनधा
राभिःकामैरत्नैरसैस्तथा॥विपाप्माभरतश्रेष्ठःकृतार्थःप्राविशत्पुरं।इत्याश्वमेधिकेपर्वणियज्ञसमाप्तिः॥
जनमेजय०।पितामहस्यमेयज्ञेधर्मपुत्रस्यधीमतः।यदाश्चर्यमभूत्किंचित्तद्भवान्वक्तुमर्हति।वैशं०।श्रूयतां

राजशार्दूलमहदाश्चर्यमुत्तमं। अश्वमेधे महायज्ञे निवृत्ते यदभूद्विभो। तर्पितेषु द्विजाग्र्येषु ज्ञातिसंबंधिबंधुषु
दीनांधकृपणे चापि सदात्ररतसत्तम। बुध्यमाने महानादे दिक्षु सर्वासु भारत। पतत्सु पुष्पवर्षेषु धर्मराजस्य मूर्द्ध
नि। बिलान्निष्क्रम्य नकुलो रुक्मपार्श्वस्तदानघ। वज्राशनिसमं नादं समुंचत विशांपते। सकृदुत्सृज्य तं नादं त्रा
सयानो मृगद्विजान्। मानुषं वचनं प्राह धृष्टो बिलशयो महान्। सक्तुप्रस्थेन वो नायं यज्ञस्तुल्यो नराधिपाः।
उंछवृत्तेर्वदान्यस्य कुरुक्षेत्रनिवासिनः। तस्य तद्वचनं श्रुत्वा नकुलस्य विशांपते। विस्मयं परमं जग्मुः सर्वे ते
ब्राह्मणर्षभाः। ततः समेत्य नकुलं पर्यपृच्छंत ते द्विजाः। कुतस्त्वं समनुप्राप्तो ऽस्मिन्यज्ञसमागमे। किंबलं पर
मं तुभ्यं किंश्रुतं किंपरायणं। कथं त्वं वेत्ति विद्यामो यो नो यज्ञं विगर्हसे। अविलुप्याश्रमं कृत्स्नं विविधैर्याज्ञिकैः कृ
तं। यथागमं यथान्यायं कर्त्तव्यं च तथाकृतं। पूजार्हाः पूजिताश्चात्र विधिवच्छास्त्रचक्षुषा। मंत्रपूर्वं हुतश्चाग्नि
म निर्दत्तमपमत्सरं। तुष्टा द्विजर्षभाश्चात्र दानैर्बहुविधैरपि। क्षत्रियाश्च सुयुद्धेन श्राद्धैरपि पितामहाः। पाल
नेन विशस्तुष्टाः कामैस्तुष्टा वरस्त्रियः। अनुक्रोशैस्तथा शूद्रा दानैश्चान्ये पृथग्जनाः। ज्ञातिसंबंधिनस्तु
ष्टाः शौचेन च नृपस्य नः। देवा हविर्भिः पुण्यैश्च रक्षणैः शरणार्थिनः। यदत्र तथ्यं तद्ब्रूहि सत्यसंधद्विजातिषु।
यथाश्रुतं यथादृष्टं हृष्टो ब्राह्मणकाम्यया। श्रद्धेयवाक्यः प्राज्ञस्त्वं दिव्यरूपं बिभर्षि च। समागतश्च विप्रैस्त्वं
तत्त्वतो वक्तुमर्हसि। इति पृष्टो द्विजैस्तैस्तु प्रहस्य नकुलो ब्रवीत्। नकुल०। नैषा नृता मया वाणी प्रोक्ता दर्पेण
वा द्विजाः। यन्मयोक्तमिदं सर्वं युष्माभिश्चाप्युपश्रुतं। सक्तुप्रस्थेन वो नायं यज्ञस्तुल्यो नराधिपाः। उंछवृत्तेर्वदा
न्यस्य कुरुक्षेत्रनिवासिनः। यद्यवश्यं मयैतद्वै वक्तव्यं मुनिपुंगवाः। शृणुताव्यग्रमनसः शंसतो मे द्विज
र्षभाः। अनुभूतं च दृष्टं च यन्मयाद्भुतमुत्तमं। उंछवृत्तेर्यथावृत्तं कुरुक्षेत्रनिवासिनः। स्वर्गं येन द्विजः प्राप्तः सभा ७२

र्थः स सुतस्नुषः । तथा चार्द्धशरीरस्य मम दृष्टं कांचनीकृतं । इत्याश्वमेधिके पर्वणि नकुलोपाख्याने नकुल० ॥ हंत वः
कीर्तयिष्यामि दानस्य फलमुत्तमं । न्यायलब्धस्य सूक्ष्मस्य विप्रदत्तस्य यद्द्विजाः । धर्मक्षेत्रे कुरुक्षेत्रे धर्मज्ञैर्बहुभि
र्वृते । उंछवृत्तिर्द्विजः कश्चित्कापोतिरभवत्पुरा । स भार्यः सह पुत्रेण सस्नुषस्तपसि स्थितः । बभूव शुक्लवृत्तः स
धर्मात्मा नियतेंद्रियः । षष्ठे काले सदा विप्रो भुंक्ते तैः सह सुव्रतः । षष्ठे काले कदाचित्तु तस्याहारो न विद्यते ।
भुंक्तेऽन्यस्मिन्कदाचिच्च षष्ठे काले द्विजोत्तमाः । कपोतधर्मिणस्तस्य दुर्भिक्षे सति दारुणे । नाविद्यत तदा विप्राः संच
यस्तन्निबोधत । क्षीणौषधिसमावेशो द्रव्यहीनोऽभवत्तदा । काले काले ह्यसुसंप्राप्ते नैवाविद्यत भोजनं । क्षुधाप
रिगताः सर्वे प्रातिष्ठंत तदा तु ते । उंछंस्तथा शुक्लपक्षे मध्ये तपति भास्करे । उष्णार्तश्च क्षुधार्तश्च स विप्रस्त
पसि स्थितः । उंछं संप्राप्नुवानेवं सार्द्धं परिजनेन ह । स तथैव क्षुधाविष्टः स्नात्वा तोयं यथाविधि । क्षपयामास
तं कालं सार्द्धं परिजनेन वै । अथ षष्ठे गते काले यवप्रस्थमुपार्जयत् । यवप्रस्थं तु तं सक्तून कुर्वंत तपस्विनः ।
कृतजप्याह्निकास्ते तु हुत्वाग्निं च यथाविधि । कुडवं कुडवं सर्वे व्यभजंत तपस्विनः । अथागमद्द्विजः क
श्चिदतिथिर्भुंजतां तदा । ते तं दृष्ट्वातिथिं प्राप्तं प्रहृष्टमनसोऽभवन् । तेऽभिवाद्य सुखप्रश्नं पृष्ट्वा तमतिथिं
तथा । विशुद्धमनसः शांताः श्रद्धादमसमन्विताः । अनसूया जितक्रोधाः साधवो गतमत्सराः । त्यक्तमाना गत
क्रोधा धर्मज्ञा द्विजसत्तमाः । सब्रह्मचर्यं स्वं गोत्रं तदाख्याय परस्परं । कुटीं प्रवेशयामासुः क्षुधार्त्तमतिथिं
तदा । इदमर्घ्यं च पाद्यं च बृषी चेयं तवानघ । शुचयः सक्तवश्चेमे नियमोपार्जिताः प्रभो । प्रतिगृह्णीष्व भद्रं
ते मया दत्तान्द्विजोत्तम । इत्युक्तः प्रतिगृह्याथ सक्तूनां कुडवं तथा । भक्षयामास राजेंद्र न च तुष्टिं जगाम सः ।
स उंछवृत्तिस्तं दृष्ट्वा क्षुधापरिगतं द्विजं । आहारं चिंतयामास कथं तुष्टो भवेदिति । तस्य भार्याब्रवीद्राजन्म

त्ता गोमेदीयतामिति। गच्छत्वेष यथाकामं संतुष्टो द्विजसत्तमः। इति ब्रुवंतीं तां साध्वीं धर्मात्मा स द्विजर्षभः। क्षुधा
परितां ज्ञात्वा सहर्षं स्नात्वान्नं ततो ददौ। आनच्छ द्वां क्षुधार्तोऽवि श्रीलां म्लानां तपस्विनीं। त्वगस्थिभूतां वेपंतीं ततो
जायामुवाच तां। अपि कीटपतंगानां मृगाणां चैव शोभने। स्त्रियो रक्ष्याः प्रयत्नेन नैवं त्वं वक्तुमर्हसि। न
रोऽनुकंपितो नार्या पुष्टो रक्षित एव वा। धर्मकामार्थकार्याणि शुश्रूषा कुलसंततिः। दारेष्वधीनधर्मश्च पितॄणा
मात्मनस्तथा। न वेत्ति कर्मतो नार्या रक्षणे योऽक्षमः पुमान्। अयशो महदाप्नोति नरकांश्चैव गच्छति। प्रपते
द्घोरांसो दीप्तान्न च लोकानवाप्नुयात्। इत्युक्ता सा ततः प्राह धर्मार्थौ नौ समौ द्विज। सह्यु प्रसभं तु मां गृहा
णेमं प्रसीद मे। सत्यं रतिश्च धर्मश्च स्वर्गश्च गुणनिर्जितः। स्त्रीणां पतिसमाधीनं कांक्षितं च द्विजोत्तम। न तु मा
तुः पितुर्वाऽपि दैवतं परमं पतिः। भर्तुः प्रसादात्स्त्रीणां वै रतिः पुत्रफलं तथा। पालनाद्धि पतिस्त्वं मे भर्तासि
भरणान्मम। पुत्रप्रदानाद्वरदस्तस्मात्सत्कुरु च गृहाण मे। ऽत्रापरिप्राप्तो वृद्धः क्षुधार्तो दुर्बलो हृदं। उपवासपरि
श्रांतो यदा त्वमपि कर्षितः। इत्युक्तः स द्विजः सत्कृत्य प्रगृह्येदं वचोऽब्रवीत्। द्विजसत्कृ निमान्नूत्तपः प्रतिगृ
ह्णीष्व सत्तम। स तान्प्रगृह्य भुक्त्वा च नत्यसि ममाम द्विजः। तमुंछवृत्तिरालेख्य ततश्चिंतापरोऽभवत्। पुत्रं
सत्कृत्य निमान्नं प्रगृह्य त्वं देहि विप्राय सत्तम। इत्येवं सुकृतं मन्ये तस्माद्देतत्करोम्यहं। तवायं परिपाल्यश्च सर्व
यश्चैव द्विजोत्तम। साध्वी नाकोऽसि तं ह्येतत्पितुर्वृद्धस्य पोषणं। पुत्रार्थौ त्ति हितो ह्येष स्त्रीभिर्वै पतिपोषणं। श्रुति
रेषा हि विप्रर्षे त्रिषु लोकेषु विश्रुता। प्राणधारणमात्रेण कार्यं कर्तुं तपस्त्वया। प्राणो हि परमो धर्मः स्थितो देह ७४
षु देहिनां। पितामह। अपि वर्षसहस्री स्त्वं बाल एव मतो मम। भृत्याश्चेह पिता पुत्रैः कृतकृत्यो भवत्युत। बाला

नांसुद्बलवती ज्ञानाम्येतदहं प्रभो। वृद्धोहं धारयिष्यामि त्वं बली भव पुत्रक। जीर्णो न वयसा पुत्र न मांसुद्धा
धतेपि वा दीर्घकाले तपस्तप्तं न मे मरणतो भयं। पुत्र॰ अपत्यमस्मि ते तात त्राणात्पुत्रो हि विश्रुतः। आत्मा सुत
स्म तस्मात्त्राह्यात्मानमिहात्मना। पितो वा॰ रूपेण सदृशस्त्वं मे शीलेन वदमेन च। परिक्षितस्त्वं बहुधा सक्तू
नादद्मि ते ततः इत्युक्त्वा दायताच्च सक्तून्प्रीतात्मा द्विजसत्तमः। प्रहसन्निव विप्राय स तस्मै प्रददौ तदा। श्व
स्का तानपि सक्तून्स नैव तुष्टो बभूव ह। तं दृष्ट्वा तिस्तत्सब्राह्मणो बभूव द्विजसत्तम। तं वै वधूः स्थिता साध्वी ब्राह्म
णप्रियकाम्यया। सक्तूनादाय संहृष्टा तं गुरुं वाक्यमब्रवीत्। संतानादेव संतानं मम विप्र भविष्यति। सक्तू नि
मान्गृहीत्वा त्वं प्रयच्छ वै। तव प्रसवनिर्वृत्या मम लोकाः किलाक्षयाः। पौत्रेण तानवाप्नोति यत्र गत्वा न
शोचति। धर्माद्याद्धि यथा त्रेता वह्निस्त्रेता तथैव च। तथैव पुत्रपौत्राणां स्वर्गस्त्रेता किलाक्षयः। पितॄन्त्रा
रयति पुत्र इत्यनुशुश्रुमः। पुत्रपौत्रैश्च नियतः साधुलोकानुपाश्नुते। श्वसुर उवाच। तात तपविरूपाङ्गी विवर्णा वि
निराश्रयो। कर्शितां सुव्रताचारां क्षुधाविकलचेतसं। कथं सक्तून्ग्रहीष्यामि त्वत्साधमोपि धातकः। कल्या
णवृत्ते कल्याणि नैवं त्वं वक्तुमर्हसि। षष्ठे काले व्रतवती शौचशीलसमन्विता। कृच्छ्रवृत्तिर्निराहारा दृश्या
मि त्वां कथं तु हा। बाला क्षुधार्ता नारी च रक्ष्या त्वं सततं मया। उपवासपरिश्रान्ता त्वं हि बान्धवनन्दिनि। स्नुषो
वाच। गुरोर्मम गुरुस्त्वं वै तथा देवत देवतं। देवादिदेवस्तस्मात्त्वं सक्तूनादत्स्व मे विभो। देहः प्राणश्च धर्मश्च
शुश्रूषार्थमिदं गुरोः। तव विप्र प्रसादेन लोकान्प्राप्स्याम्यतीप्सितान्। अवेक्ष्य इति कृत्वा त्वं दृढभक्त्येति वा द्वि
ज। चिन्त्याममेयमिति या सक्तून्दातुमर्हसि। श्वसुर॰। अनेन नित्यं साध्वि त्वं शीलवृत्तेन शोभने। या त्वं धर्मगुणा

पेतागुरुवृत्तिमवेक्ष्य सोतस्मात्स कृतानुग्रहः। ष्यामि वधु नार्हसि वंचनां। गणयित्वा विशालाक्षि त्वं हि धर्मस्तुतां वरा।
इत्युक्त्वा तामुपादाय सक्तूनप्रादात्तु द्विजातये। ततस्तुष्टो नवद्विप्र तस्य साधो महात्मनः। प्रीतात्मा स तदा वाक्य
मिदमाह द्विजर्षभः। वाग्मी तदा द्विजश्रेष्ठो धर्मः पुरुषविग्रहः। शुद्धेन तव दानेन न्यायोपात्तेन यत्नतः। यथा
शक्ति विमुक्तेन प्रीतोस्मि द्विजसत्तम। अहो दानं ते पश्यंति स्वर्गे स्वर्गनिवासिनः। गगनात्पुष्पवर्षं च पश्य त्वं प
तितं द्विजाः। सुरर्षिदेवगंधर्वा ये चान्ये देवपुरःसराः। स्तुवंति देवदूताश्च स्थिता दानेन विस्मिताः। ब्रह्मर्षयो विमा
नस्था ब्रह्मलोकगताश्च ये। कांक्षंते दर्शनं तुभ्यं दिवं गच्छ द्विजर्षभ। तापि तल्लोकगताः सर्वे तारिताः पितरस्त्व
या। अनागताश्च बहवः सुबहूनि युगानि वा। ब्रह्मचर्येण दानेन यज्ञेन तपसा तथा। अगाद्धरेण धर्मेण तस्मा
द्गच्छ दिवं द्विज। श्रद्धया परया यस्त्वं तपश्चरसि सुव्रत। तस्माद्देवास्तवानेन प्रीता द्विजवरोत्तम। सर्वस्वमेत
द्यस्माद्धि दत्तं शुद्धेन चेतसा। कृच्छ्रकाले ततः स्वर्गो जितोयं कर्मणा त्वया। क्षुधा निर्णुदति प्रज्ञां धर्म्यां बु
द्धिं व्यपोहति। क्षुधापरिगतज्ञानो धृतिं त्यजति मानवः। बुभुक्षां जयते यस्तु स स्वर्गं जयति ध्रुवं। यदा दानरुचिस्त
स्य तदा धर्मो न सीदति। अनपेक्ष्य सुतस्नेहं कलत्रस्नेहमेव वा। धर्ममेव गुरुं ज्ञात्वा तृष्णा न गणिता त्वया। द्रव्याग
मो नृणां सूक्ष्मः पात्रे दानं ततः स्मृतं। कालः परतरस्तस्मात् श्रद्धा चापि ततः परा। स्वर्गद्वारं च सूक्ष्मं हि नरैर्मोहा
न्न दृश्यते। स्वर्गार्गलं लोभबीजं रागगुप्तं दुरासदं। तं तु पश्यंति पुरुषा जितक्रोधा जितेंद्रियाः। ब्राह्मणास्तपसा
युक्ता यथाशक्तिप्रदायिनः। सहस्रशक्तिश्च शतं शतशक्तिर्दशापि च। दद्यादपश्च यः शक्त्या सर्वे तुल्यफलाः स्मृ
ताः। रंतिदेवो हि नृपतिरपः प्रादादकिंचनः। शुद्धेन मनसा विप्र नाकपृष्ठं ततो गतः। न धर्मः प्रीयते तात दानैर्दत्तै ५५

तैर्मूलफलैः। न्यायलब्धैर्यथा स्तस्मैः श्रद्धापूतैः स तुष्यति॥ गोप्रदानसहस्राणि द्विजेभ्योदात् गो नृपः। एकां दत्वा
तु पारक्यां नरकं स समवाप्तवान्। आत्ममांसप्रदानेन शिबिरौशीनरो नृपः। प्राप्य पुण्यकृतान् लोकान् मोदते दि
वि सुव्रतः। वित्तवो न नृणां पुण्यं स्वशक्त्या स्वार्जितैः सतां। न यज्ञैर्विविधैर्विप्र यथान्यायेन संचितैः। क्रोधा
दानफलं हंति क्रोधात्स्वर्गं न गच्छति। न्यायवृत्तिर्हि तपसा दानेन विन्स्वर्गमश्नुते। न राजसूयैर्बहुभिरि
ष्ट्वा विपुलदक्षिणैः। न चाश्वमेधैर्बहुभिः फलं सममिदं तव। सक्तुप्रस्थेन हि जितो ब्रह्मलोकस्त्वया
नघ। विरजं ब्रह्मभुवनं गच्छ विप्र यथेच्छकं। सर्वेषां वो द्विजश्रेष्ठ दिव्यं यानमुपागतं। आरोहत यथा
कामं धर्मोऽस्मि द्विज पश्यतां। पावितो हि त्वया देहो लोके कीर्तिश्च शाश्वती। सभार्यः सहपुत्रश्च सस्नुषश्च
दिवं व्रज। इत्युक्त्वा वाक्यं धर्मो यानमारुह्य स द्विजः। सभार्यः ससुतश्चापि सस्नुषश्च दिवं ययौ। तस्मि
न्विप्रे गते स्वर्गं ससुते सस्नुषे तदा। भार्याचतुर्थे धर्मज्ञे ततोऽहं निःसृतो बिलात्। ततस्तु सक्तुगंधेन
क्लेदेन सलिलस्य च। दिव्यपुष्पावमर्दाच्च साधोर्दानलवैश्च तैः। विप्रस्य तस्य तपसा शिरो मे कांचनी
कृतं। तस्य सत्याभिसंधस्य सक्तुदानेन चैव हि। शरीरार्धं च मे विप्राः शातकुंभमयं कृतं। पश्यतेदं
सुविपुलं तपसा तस्य धीमतः। कथमेवंविधं मे स्यादन्यत्पार्श्वमिति द्विजाः। तपोवनानि यज्ञांश्च हृष्टोऽभ्ये
मि पुनः पुनः। यज्ञं त्वहमिमं श्रुत्वा धर्मराजस्य धीमतः। आशया परया प्राप्तो न चाहं कांचनीकृतः। त
तो मयोक्तं तद्वाक्यं प्रहस्य द्विजसत्तमाः। सक्तुप्रस्थेन यज्ञोऽयं संमितो नेति सर्वथा। सक्तुप्रस्थलवैः एकृतस्तदा
हं कांचनीकृतः। न हि यज्ञो महानेष सदृशस्तैर्मतो मम। इत्युक्त्वा नकुलः सर्वान् यज्ञे द्विजवरांस्तदा।

जगामादर्शनं राजन् विप्रास्ते च ययुर्गृहान्॥ वैशं०॥ एतत्ते सर्वमाख्यातं मया परपुरंजय। यदाश्चर्यमभूत्तस्मिन् वा
जिमेधे महाक्रतौ। न विस्मयस्ते नृपते यज्ञे कार्यः कथंचन॥ ऋषिकोटिसहस्राणि तपोभिर्ये दिवं गताः। अद्रोहः स
र्वभूतेषु संतोषः शीलमार्जवं। तपो दमश्च सत्यं च दानं चेति समं मतं। इत्याश्वमेधिके पर्वणि। नकुलोपाख्याने स
कुप्रस्थप्रशंसा। जनमेजय०॥ यज्ञैः सक्ता नृपतयस्तपः शक्ता महर्षयः। संतिष्ठ्य वसिता विप्राः शमो दम इति प्र
भो। तस्माद्यज्ञफलैस्तुल्यं न किंचिदिह विद्यते। इति मे वर्त्तते बुद्धिस्तथा चैतदसंशयं। यज्ञैरिष्ट्वा हि राजानो
बहवो द्विजसत्तम। इह कीर्त्तिं परं प्राप्य प्रेत्य स्वर्गमितो गताः। देवराजः सहस्राक्षः क्रतुभिर्भूरिदक्षिणैः। देवरा
ज्यं परं प्राप्य निखिलं महतो महत्। यदा युधिष्ठिरो राजा भीमार्जुनपुरःसरः। सदृशो देवराजेन समृद्ध्या विक्रमे
ण वा। अथ कस्मात्स नकुलो गर्हयामास तं क्रतुं। अश्वमेधं महायज्ञं राज्ञस्तस्य महात्मनः॥ वैशं०॥ यज्ञस्य विधि
मग्र्यं वै फलं चैव नरर्षभ। गदतः शृणु मे राजन् यथावदिह भारत। पुरा शक्रस्य यजतः सर्व ऊचुर्महर्षयः। ऋत्वि
क्षु कर्मव्यग्रेषु वितते यज्ञकर्मणि। हूयमाने तथा वह्नौ होत्रे बहुगुणान्विते। देवेष्वाहूयमानेषु स्थितेषु परमर्षिषु।
सुप्रीतैस्तैस्तथा विप्रैः स्वागमैः सुस्वरैर्नृप। अनैयेष्वपि गुरुभिरध्वर्युवृषभैस्तथा। आलंभसमये तस्मिन् गृही
तेषु पशुषु तथा। महर्षयो महाराज संबभूवुः कृपान्विताः। ततो दीनान् पशून् दृष्ट्वा ऋषयस्ते तपोधनाः। ऊचुः
शक्रं समागम्य नायं यज्ञविधिः शुभः। अपविज्ञानमेतत्ते महान्तं धर्ममिच्छतः। नहि यज्ञे पशुगणा विधिदृष्टाः पुरं ९८
दर धर्मोपघातकस्त्वेष समारंभस्तव प्रभो। नायं धर्मकृतो धर्मो नहिंसा धर्म उच्यते। आगमेनैव यज्ञं ते कुर्वन्तु
यदि हेच्छसि। विधिदृष्टेन यज्ञेन धर्मस्ते सुमहान् भवेत्। यज्ञबीजैः सहस्राक्ष त्रिवर्षपरमोषितैः। एष ध

ह्नो महान्नृशाक्रविंयमानो हि धिगम्यते। शतक्रतुस्ततद्वाक्यमचिंत्तिस्तत्त्वदर्शिभिः। उक्तं न प्रतिजग्राहमानमो
हवशानुगः। तेषां विवादः सुमहान्यज्ञे शक्रतपस्विनां। जंगमैः स्थावरैश्चैव यष्टव्यमिति स्मारताते नुरविन्नातिवा
दे न ऋषयस्तत्त्वदर्शिनः। ततः संधाय शाक्रेण पप्रच्छुर्नृपतिं वसुं। महाप्राज्ञ कथं युद्धेत्वागमो नृपते स्मृतः। य
ष्टव्यं पशुभिर्मेध्यैरथो बीजैरथो बुधैः। ततस्तत्वालु वचस्तेषां अविचार्य बलाबलं। यथोपनीतैर्यष्टव्यमि
ति होवाच पार्थिवः। यष्टव्यं पशुभिर्मेध्यैरथ बीजैः फलैरपि। एवमुक्त्वा स नृपतिः प्रविवेश रसातलं। उक्त्वै
वं वितथं राजा वेदीनामीश्वरः प्रभुः। तस्मान्नवाच्यं ह्येकेन बहुज्ञेनापि संशये। प्रजापतिमपाहाय स्वयंभुव
मते प्रभुः। तेन दत्तानि दानानि पापेनाशुद्धबुद्धिना। तानि सर्वमनादृत्य नश्यन्ति विपुलान्यपि। तस्याध
र्मप्रवृत्तस्य हिंसकस्य दुरात्मनः। दानेन न कीर्तिर्भवति न प्रेत्येह च दुर्मतेः। अन्यायोपार्जितं द्रव्यं अतीतं यो ह्य
पंडितः। धर्माभिकांक्षी यजते न धर्मफलमश्नुते। धर्मवैतंसिको मूढः पापात्मा पुरुषाधमः। ददाति दानं वि
प्रेभ्यो लोकविश्वासकारणं। पापेन कर्मणा विप्रो धनं लब्ध्वा निरंकुशः। रागमोहान्वितः सर्वांकलुषांगलिप्
सुतो। अपि संचयबुद्धिर्हि लोभमोहवशं गतः। उद्वेजयति भूतानि पापेनाशुद्धबुद्धिना। तेन दानानि दत्तानि य
पे न हृतबुद्धिना। तानि तत्त्वे मनासाद्य नश्यन्ति विपुलान्यपि। तस्याधर्मप्रवृत्तस्य हिंसकस्य दुरात्मनः। एवं लब्ध्वा
धनं मोहात् यो यजते यो ददाति च। स तेन कर्मणा तेन न सिध्यति दुरागमात्। उंछमूलं फलं शाकमुदपात्रं तपो
धनाः। दानं विभवतो दत्त्वा ततः स्वर्गमितो गताः। एष धर्मो महानेषां गोदानं तत्तदयातथा। ब्रह्मचर्यं तथा सत्यं अनु
क्रोशः समाधृतिः। सनातनस्य धर्मस्य मूलमेतत्सनातनं। श्रूयते हि पुरा सिद्धा विश्वामित्रादयो नृपाः। विश्वामित्रोऽसि

तथैव जनकश्च महीपतिः।ऋषभसेनार्ष्टिषेणौ च सिंधुद्वीपश्च पार्थिवः।एते चान्ये च बहवः सिद्धिं परमिकां गता
नृपाः सत्यैश्च दानैश्च न्यायलब्धैस्तपोधनाः।ब्राह्मणाः क्षत्रिया वैश्याः शूद्रा ये चाश्रितास्तपः।दानधर्माश्रिताःसि
द्धास्ते स्वर्गं यांति भारत।इत्याश्वमेधिके पर्वणि नकुलोपाख्याने दानप्रशंसा॥जनमेजय उ०॥धर्मागतेन वित्तेन त
गवन्फलमस्ति चेत्।एतन्मे सर्वमाचक्ष्व कुशलो ह्यसि भाषितुं।तथोञ्छवृत्तेर्यद्वृत्तं सक्तुदानफलं महत्।कथं हि
ते महाब्रह्मंस्तथ्यमेतदसंशयं।कथं हि सर्वयज्ञेषु निश्चयः परमो भवेत्।एतदर्हसि मे वक्तुं निखिलेन द्विजर्षभ।
वैशं०।अत्राप्युदाहरंतीममितिहासं पुरातनं।अगस्त्यस्य महायज्ञे पुरावृत्तमरिंदम।पुरागस्त्यो महातेजा दी
क्षां द्वादशवार्षिकीं।प्रविवेश महाराज सर्वभूतहिते रतः।तत्राग्निकल्पा होतार आसन्सत्रे महात्मनः।मूला
हारा निराहाराश्मकुट्टा मरीचिपाः।परिमृष्टिनो वैघसिकाः संप्रक्षालास्तथैव च।यतयो भिक्षवश्चात्र बभूवुः
पर्यवस्थिताः।सर्वे प्रत्यक्षधर्माणो जितक्रोधा जितेंद्रियाः।दमे स्थिताश्च ते सर्वे तमोदंभविवर्जिताः।वृत्ते शुद्धे स्थि
ता नित्यं इंद्रियैश्चापि वाहिताः।उपासते स्म तं यज्ञं भुंजंतस्ते महर्षयः।यथाशक्त्या भगवता तदन्नं समुपार्जि
तं।तस्मिन्सत्रे न तत्किंचिद्विद्वद्योग्यं तत्र नाभवत्।तथा ह्यनेके मुनिभिर्महांतः क्रतवः कृताः।एवं विधे त्वगस्त्य
स्य वर्तमाने महाध्वरे।न ववर्ष सहस्राक्षस्तदा भरतसत्तम।ततः कर्मांतरे राजन्नगस्त्यस्य महात्मनः।कथेयमभि
निर्वृत्ता मुनीनां भावितात्मनां।अगस्त्यो यजमानोसौ ददात्यन्नं विमत्सरः।न च वर्षति पर्जन्यः कथमन्नं भ
विष्यति।सत्रं चेदं महद्विप्राः कथमन्नं भविष्यति।न वर्षिष्यति देवश्च वर्षाण्येतानि द्वादश।एतद्भवंतः सं
चिंत्य महर्षेस्तस्य धीमतः।अगस्त्यस्यातितपसः कर्तुमर्हस्त्यनुग्रहं।इत्येवमुक्ते वचने ततोगस्त्यः प्रतापवान्। ११

न

प्रोवाचेदं वचो वाग्मी प्रणम्य शिरसा मुनीन्। यदि द्वादश वर्षाणि न वर्षिष्यति वासवः। चिंतायज्ञं करिष्यामि विधि
रेषः सनातनः। यदि द्वादश वर्षाणि न वर्षिष्यति वासवः। स्पर्शयज्ञं करिष्यामि विधिरेषः सनातनः। यदि द्वाद
शवर्षाणि न वर्षिष्यति वासवः। व्यायामेनाहरिष्यामि यज्ञानन्यान् तिव्रतान्। बीजयज्ञो मयायं तो बहुवर्षसमावि
तः। बीजैः कृतैः करिष्ये च नात्र विघ्नो भविष्यति। नेदं शक्यं वृथा कर्तुं मम सत्रं कथंचन। न वर्षिष्यति देवो वा न
२ वादेवो भविष्यति। अथवाभ्यर्थितामिंद्रः कुर्यान्नैव हि कामतः। स्वयमिंद्रो भविष्यामि जीवयिष्यामि च प्रजाः। यो
यदाहारजातश्च स तथैव भविष्यति। विशेषं चैव कर्तास्मि पुनः पुनरतीव हि। अद्येह स्वर्णमभ्येतु यच्चान्य
द्वसु दुर्लभं। त्रिषु लोकेषु यच्चास्ति तदिहागच्छतां स्वयं। दिव्याश्चाप्सरसां संघाः सगंधर्वाः सकिंनराः। विश्वा
वसुश्च ये चान्ये तेप्युपायांतु वः सदा। उत्तरेभ्यः कुरुभ्यस्तु यत्किंचिद्वसु विद्यते। सर्वं तदिह यज्ञे मे स्वयमेवोप
तिष्ठतु। स्वर्गः स्वर्गसदश्चैव धर्मश्च स्वयमेव च। इत्युक्ते सर्वमेवैतदभवत्तस्य धीमतः। ततस्ते मुनयो दृष्ट्वा मुने
स्तस्य तपोबलं। विस्मिता वचनं प्राहुरिदं सर्वं महार्थवत्। ऋषय ऊचुः। प्रीताः स्म तव वाक्येन न त्विच्छामस्तपो
व्ययं। तैरेव यज्ञैस्तुष्टाः स्म न्यायेनेच्छामहे वयं। यज्ञान्दीक्षां तथा होमान् यच्चान्यन्मृगयामहे। न्यायेनोपार्जिताहा
राः स्वकर्मनिरता वयं। वेदांश्च ब्रह्मचर्येण न्यायतः प्रार्थयामहे। न्यायेनोत्तरकालं तु गृहेभ्यो निःसृता वयं। धर्म
दृष्टैश्च विविधैस्तपस्तप्स्यामहे वयं। भवतः सम्यगेवैषा बुद्धिर्हिंसाविवर्जिता। एकोयं विधियज्ञेषु ब्रूयास्त्वं स
ततं प्रभो। प्रीतास्तव भविष्यामो यद्वि द्विजवरोत्तम विसर्जिताः समाप्तौ च सत्रादस्माद्व्रजेमहि। तथा कथयतां
मेव देवराजः पुरंदरः। ववर्ष सुमहातेजा दृष्ट्वा तस्य तपोबलं। असमाप्तौ च यज्ञस्य तस्यामितपराक्रमः। निकाम

वर्षी पर्जन्योऽभवत्तत्र जनमेजय । प्रसादयामास च तमगस्त्यं त्रिदशेश्वरः । स्वयमभ्येत्य राजर्षे पुरस्कृत्य बृहस्प-
तिं । ततो यज्ञसमाप्तौ तान्विससर्ज महामुनीन् । अगस्त्यः परमप्रीतान्पूजयित्वा यथाविधि ॥ इत्याश्वमेधिके न-
कुलोपाख्याने अगस्त्योपाख्यानं ॥ जनमेजय० ॥ कोसौ नकुलः रूपेण शिरसा कांचनेन वै । प्राह मानुषवद्वाचं
एतत्पृष्टो ब्रवीहि मे । वैशं० ॥ एतत्पूर्वं न पृष्टोहं न चास्माभिः प्रभाषितं । श्रूयतां नकुलो योसौ यथा वाक्त-
स्य मानुषी । श्राद्धं संकल्पयामास जमदग्निः पुरा किल । होमधेनुस्तमागाच्च स्वयमेव दुदोह तां ॥ तत्क्षीरं स्था-
पयामास नवे भांडे दृढे शुचौ । तच्च क्रोधः स्वरूपेण पितरः पर्यधर्षयन् । जिज्ञासुस्तमृषिश्रेष्ठं किं कुर्याद्धि-
षमे कृते । इति संचिंत्य दुर्मेधा धर्षयामास तत्पयः । तमाज्ञाय मुनिः क्रोधं नचास्य विचुकुधे ततः । स तु क्रोध-
स्तमाहेदं प्रांजलिर्मूर्तिमान्स्थितः । जितोस्मीति भृगुश्रेष्ठं भृगवो ह्यतिरोषणाः । लोके मिथ्यापवादोयं य-
त्वयास्मि पराजितः । वशे स्थितोहं त्वय्यद्य क्षमावति महात्मनि । बिभेमि तपसः साधो प्रसादं कुरु मे प्रभो ।
जमदग्नि० साक्षाद्दृष्टोसि मे क्रोध गच्छ त्वं विगतज्वरः । न त्वयापकृतं मेद्य न च मे मन्युरस्ति वै । यान्
समुद्दिश्य संकल्पः पयसोस्य कृतो मया । पितरस्ते महाभागास्तेभ्यो बुध्यस्व गम्यतां । इत्युक्तो जात-
संत्रासस्तत्रैवांतरधीयत । पितॄणामभिषंगात्तु नकुलत्वमुपागतः । स तान्प्रसादयामास शापस्यां-
तो भवेदिति । तैश्चाप्युक्तः क्षिपन्धर्मं शापस्यांतमवाप्स्यसि । इत्युक्तो याज्ञियान्देशान्धर्मारण्या- २८
नि चैव ह । जुगुप्सन्परिधावन्स तं यज्ञं समुपागमत् । धर्मपुत्रमथाक्षिप्य सक्तुप्रस्थेन तेन सः । मु

हः शापात्ततः क्रोधो धर्म्मोह्यासीद्युधिष्ठिरः एवमेतद्यथावृत्तं तव तस्य महात्मनः पश्यतामेव नस्तत्र
नकुलोंतर्हितो भवत्। इति श्रीमहाभारते शतसहस्र्यां संहितायां वैयासिक्यां आश्वमेधिके पर्व
णि नकुलोपाख्यानं संपूर्णं विश्वेश्वरार्प्पणमस्तु॥ ॥ श्रीकालभैरवाय नमः॥ श्रीगुरुभ्यो नमः॥
शिवराम॥ छ॥

वैदेशास्पैव

॥०॥ अश्वमेधपर्वभानंत ॥०॥